M-1

(16)

AccNo - SKM 104/89 (d)

Sridhara krita Bhawartha Deepika Teeka.

Bhagavata IVth canto

Time - 1835 AD.

Pages/Leaves - 98.

Language - Sanskrit.

पुस्तकश्रीमद्भागोवतको

श्रीचतुर्थस्कंधकापत्र ८६

पुस्तकस्वामीडौश्रीचेतनदास
डीकोश्रुत्रं

भा० स्कं० १ ॥ श्रीरामसहाय ॥ श्रीहयग्रीवाय नमः ॥ श्रीगणेशाय नमः ॥ श्रीपरमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्त-
हृदयमानसनिवासाय श्रीरामाय नमः ॥ अथैकत्रिंशताध्यायैर्विसर्गस्तुर्यपुरुषे ते ॥ विसर्गस्तीश्वराधीनैर्ब्रह्ममन्वादिभिः कृ-
तः ॥ तत्र तु प्रथमेऽध्याये मनुकन्यान्वयः पृथक् ॥ वर्ण्यते यत्र यज्ञादिमूर्तिभिः प्रभवो हरेः ॥ मनुकन्यान्वयं विस्तरेण वक्तुमाह

॥ श्रीमैत्रेय उवाच ॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति ४
विश्रुताः ॥ १ ॥ आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः ॥ पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥ २ ॥
प्रजापतिः स भगवान्रुचिस्तस्यामजीजनत् ॥ मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ॥ ३ ॥ यस्तयोः पु-
रुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ॥ ४ ॥ आनिन्ये स्वगृहं
पुत्र्याः पुत्रं विततरोचिषम् ॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् ॥ ५ ॥ तां कामयानां भगवानुवाह
यजुषां पतिः ॥ तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥ ६ ॥

मनोस्त्विति ॥ चकाराद्द्वौ पुत्रौ च ॥ १ ॥ तु शब्दादन्यतोऽपि पुत्रलाभः सूचितः तद्दर्शयितुमाह ॥ पुत्रिकाधर्ममाश्रित्येति ॥ अभ्रात-
का प्रदास्यामि तुभ्यं कन्यामलंकृताम् ॥ अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥ नाम्नाऽवबन्धेन कन्यादानं पुत्रिकाधर्मः सा
चाभ्रातृकायां कन्यायां पुत्रार्थिना एव प्रसिद्धस्तथापि पुत्रवाञ्छया कामतस्तथा कृतवानित्याह ॥ भ्रातृमतीमपीति ॥ मि-
थुनं पुरुषं स्त्रियं च समाधिना ईश्वरध्यानेन २ ॥ नन्वेतस्याभ्रातृ भूतात्वतस्तयोर्विवाहो न विरुद्ध इति नाव ४ ॥ ५ ॥ यजु- १

द्विषट् द्वादश ॥ ७ ॥ प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह ॥ तुषिता इति द्वाभ्यां ॥ मन्वंतरं मनुर्देवाः मनुपुत्राः सुरेश्वर
ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥ इति वक्ष्यति तत्र स्वायंभुवो मनुः । तुषिता देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञो हरेरवता
रः स एव सुरगणेश्वर इंद्रः ८ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ ॥ तदेवं यज्ञस्य देहरूपेण षड्विधत्वं ॥ तयोः पुत्रौ

तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः ॥ इध्मः विभुः कविस्वह्नः सुदेवो रोचनो द्विषट् ७ ॥ तुषिता नाम ते
देवा आसन्स्वायंभुवांतरे ॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौज
सौ तत्पुत्रपौत्रनप्तृणामनुवृत्तं तदंतरं ॥ ९ ॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः ॥ तत्संबंधि श्रुतप्रायं
भवता गदतो मम ॥ १० दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः । प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो म
हान् ॥ ११ ॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे ॥ १२ पत्नी मा वं
रीचेस्तु कला । सुषुवे कर्दमात्मजा । कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥ पूर्णिमासूत विरजं विश्वगं
च परंतप ॥ देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः ॥ १४ ॥ अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान्
दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥ १५ ॥ विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतहेतवः ॥
किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो १६

(म) त्रनप्तृणामनुवृत्तं व्याप्तं पालितं तन्मन्वंतरं ९ ॥ श्रुतप्रायं बाहुल्येन श्रुतं । तत्कर्दमवं
त्रा ख्यानाम श्रुतत्वाय ग्रहणं ॥ १० ॥ ११ ॥ प्रसूतिप्रसवं पुत्रपौत्रादिनिर्विस्तारं ॥ १२ ॥ ययोर्वंशेनापूरितं ॥ १३ ॥ कश्यपस्य वंशं षष्ठे वक्ष्य
ति द्वितीयस्य वंशमाह । पूर्णिमेति देवकुल्या नाम त्यां च ॥ हरेः पादक्षालनात् जन्मांतरे या दिवः सरिद्गंगाभूत ॥ १४ ॥ आत्मे
शब्रह्मसंभवान् विष्णुरुद्रब्रह्मणामंशेन संभवान् । किंचित् किंस्वित् ॥ १६ ॥

भा० च० ऋक्षं नाम कुलाद्रिं तपसि स्थितः सन् १७ तस्मिन् कुलाद्रौ प्रसूनानां स्तबकाः येषु पलाशाशोकेषु तेषां कानने निर्विंध्याः
२ नाम नद्याः तस्याः स्रवद्भिर्वार्भिः उद्घुष्टे नादिते १८ १९ प्राणायाम एव एधः संदीपकः यस्य तेन मुनेः मूर्ध्नो निर्गतेनाग्निना
तप्यमानं समीक्ष्य तदाश्रमपदं ययुरित्यन्वयः २१ अप्सरः प्रभृतिभिः वितायमानं विस्तीर्यमाणं यशः येषां ते २२ तेषां प्रादुर्भा

मैत्रेय उवाच ॥ ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः १७ तस्मिन् प्रसूनस्तबकपलाशाशोककानने वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः १८ प्राणायामेन संयम्य मनो वर्षशतं मुनिः अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः १९ शरणं तं प्रपद्येऽहं य एव जगदीश्वरः प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् २० तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः २१ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः वितायमानयशसस्तदाश्रमपदं ययुः २२ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् २३ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणांजलिः वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान् २४ कृपावलोकेन हसद्वदनेनोपलंभितान् तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः २६

वः प्राकट्यं तत्र संयोगः संनिधिः तेन विद्योतितं मनो यस्य उत्तिष्ठन् २३
अर्हणं पुष्पादिकं अंजलौ यस्य उपतस्थे पूजयामास वृषादिवाहनान् स्वैः स्वैश्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः २४ कृपया
अवलोको यस्मिन् हसच्च तद्वदनं च तेन उपलंभितान् प्रसन्नत्वेन ज्ञापितान् तेषां रोचिषा दीप्त्या २५ श्लक्ष्णया मधुरया सू २

अनुयुगंकल्पेकल्पेविभज्यगृहीतोदेहोयैःतेप्रसिद्धाःब्रह्मविष्णुगिरिशाख्याःयूयंवःयुष्मान्प्रणतोस्मितेभ्यःसकाशादेकएवमेमा
यात्रउपहूतःशरणंतंप्रपद्येइत्येकस्यैवनिर्दिष्टत्वात्सत्वयुष्माकमुकइतियुष्माभिरेवकथ्यतामित्यर्थः २७ अस्याप्रपंचयन्ना-
कइतिविविधैःप्रधानैरुपचारैः विबुधप्रधानइतिवापाठः प्रजननायपुत्रोत्पत्त्यैचित्तीकृतःचित्तेनैकंनीतः मनसोपिदूरा-
द्गोचराःसंतःकथंनुत्रयोऽत्रागताः २८ तेऊचुःयथाकृतःसंकल्पस्तेनतथैवभाव्यंनान्यथायतःसत्संकल्पस्यतेसं

अत्रिरुवाच विश्वोद्भवस्थितिलयेषुविभज्यमानैर्मायागुणैरनुयुगंविगृहीतदेहाः तेब्रह्मविष्णुगिरिशाःप्रण
तोस्म्यहंवस्तेभ्यःकएवभवतांमइहोपहूतः २७ एकोमयेहभगवान्विविधप्रधानैश्चित्तीकृतःप्रजननायक
थंनुयूयं अत्रागतास्तनुभृतांमनसोपिदूराद्ब्रूतप्रसीदतमहानिहविस्मयोमे २८ श्रीमैत्रेयउवाच इति
तस्यवचःश्रुत्वात्रयस्तेविबुधर्षभाः प्रत्याहुःश्लक्ष्णयावाचाप्रहस्यतमृषिंप्रभो २९ देवाऊचुः यथाकृ-
तस्तेसंकल्पोभाव्यंतेनैवनान्यथा सत्संकल्पस्यतेब्रह्मन्यद्वैध्यायतितेवयं ३० अथास्मदंशभूतास्तेआत्म-
रि जालोकविश्रुताः भवितारोंगभद्रंतेविस्रप्स्यंतिचतेयशः ३१ एवंकामवरंदत्त्वाप्रतिजग्मुःसुरेश्वराः सभा २
जितास्तयोःसम्यग्दंपत्योर्मिषतोस्ततः ३२

कल्पस्तर्हिकथमेकस्मिन्ध्यायमानेत्रयःप्रतीतास्तत्राहुः यदेकंजगदीश्वराख्यंतत्त्वंभवान्ध्यायति तएतेवयंत्रयो
पितदेवैकंतत्त्वंनास्माकंभेदोस्तीत्यर्थः ३० विस्रप्स्यंति विस्तारयिष्यंति अंतर्गतानिजगत्येस्यमगतावित्यस्वरूपं ३१ ता
भ्यांसम्यक्सभाजिताः पूजिताःसंतःततःस्थानात्प्रतिजग्मुः ३२

ना० च० निबोध बुध्यस्व ताः कन्या निर्दिशति सिनीवालीति ॥३४॥३५॥ पुलस्त्यश्च हविर्भुवि पत्न्यामित्यन्वयः सोगस्त्यः दह्राग्निर्जा
३.पु ठराग्निः विश्रवा लस्त्यस्य सुत इति पोषः तस्य विश्रवसः इडविडायां जातः सुतः कुबेरः अन्यस्यां भार्यायां केशिन्यां रावणादि

सोमोभूद्ब्रह्मणोंशेन दत्तो विष्णोस्तु योगवित् ॥ दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ॥३३॥ श्रद्धा त्वं वा
गिरसः पत्नी चतस्रोसूत कन्यकाः ॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥३४॥ तत्पुत्रावपरावास्तां ख्या
तौ स्वारोचिषेंतरे ॥ उतथ्यो भगवान्साक्षात् ब्रह्मिष्ठश्च बृहस्पतिः ॥३५॥ पुलस्त्योजनयत्पत्न्यामगस्त्यं च
हविर्भुवि ॥ सोन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ॥३६॥ तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासुतः ॥
रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः ॥३७॥ पुलस्त्यस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥ कर्मश्रे
ष्ठं वरीयांसं सहिष्णुं च महामते ॥३८॥ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ॥ ऋषीन् षष्टिसहस्राणि
ज्वलतो ब्रह्मतेजसा ॥३९॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप ॥ चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयो मा
लाः ॥४०॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ॥ उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोपरे ॥४१॥ चि
त्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं ॥ दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे ॥४२॥ भृगुः ख्यात्यां महाभा
गः पत्न्यां पुत्रानजीजनत् ॥ धातारं च विधातारं श्रियं च भगवत्परां ॥४३॥ आयतिं नियतिं चैव सुते मेरुस्तयो
रदात् ॥ ताभ्यां तयोरभवतां मृकंडः प्राण एव च ॥४४॥ मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरो मुनिः ॥ कविश्च भार्गवो

यस्य यः सुताः ॥३८॥३९॥ चित्रकेतुप्रमुखा जज्ञिरे इति च सप्तर्षयो जाताः ॥४०॥ तानेवाह चित्र (यस्य भगवानुशना सुतः ॥४५॥
केतुरिति वसुभृद्यानो नामैकः शक्त्यादयोपरे [illegible] ण्याः पुत्रा सुतौ पुत्री च तानेवाह धातारमि

वा

३

कविश्च भार्गवः भृगोः पुत्रः ॥ ४५ ॥ ४६ ॥ आत्मजः ब्रह्मपुत्रः ॥ ४७ ॥ युक्तेभ्यः संयुतेभ्यः मिलितेभ्यो वा ॥ ४८ ॥ ५१ ॥ सर्वेषां गु
णानामुत्पत्तिर्येभ्यस्तेषां ॥ ५२ ॥ उपलक्ष्यते भेद्यः ॥ ५४ ॥ निजया मायया यस्मिन्नात्मनि स्वे जगत् स्वरूपभेदं गंधर्वनगरमिवेदं वि
श्वं विरचितं । तस्यात्मनः प्रतिच्छन्नायोपकाराय आत्मानं योवधः प्रादुष्चकार प्रकटितवान् । तस्मै पुरुषाय नमः केनरूपेण

सर्वे ते मुनयः स्वतल्लोकान् सर्गैरभावयन् ॥ एषकर्दमदौहित्रसंतानकथितस्तव ॥ शृण्वतः श्रद्दधानस्य सद्यः
पर पापहरः ॥ ४६ ॥ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः ॥ तस्यां ससर्ज दुहितः षोडशामललोचनाः ॥ ४७ ॥ त्रयोदशा
मो दाद्धर्माय तथैकामग्नये विभुः ॥ पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥ ४८ ॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रि
योन्नतिः ॥ बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥ ४९ ॥ श्रद्धासूत शुभं मैत्री प्रसादमभयं दया ॥ शांतिः सु
खं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥ ५० ॥ योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ॥ मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः
प्रश्रयं सुतं ॥ ५१ ॥ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतं ॥ ५२ ॥
मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः ॥ दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ॥ ५३ ॥ मुनयस्तुष्टुवुस्तुष्टा
जगुर्गंधर्वकिंनराः ॥ नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलं ॥ देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ॥ ५४ ॥
यो मायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय च ॥ एतेन धर्मसदने ऋषिमूर्तिनाद्य ॥
प्रादुश्चकार पुरुषाय नमः परस्मै ॥ ५५ ॥ सोयं स्थितिव्यतिकरोपशमाय सृष्टान् सत्वेन नः सुरगणाननुमेयतत्वः ॥
दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदं ॥ ५६ ॥

प्रादुश्चकार रूपे मूर्तेराकारो यस्मिन् तेनैव रूपेण ॥ ५५ ॥ सोयं नोस्मान् सुरगणान् अनल्पकरुणायुक्तेन विलोकनेन विश्रि
ष्टनेत्रेणाद्रष्यात् पश्यतु । कथंभूतेन यच्छ्रीनिकेतममलं मरविंदं तत् क्षिपता तिरस्कुर्वता । कथंभूतः ॥ अनुमेयं शास्त्रतो विचा

भा० स्क० र्यं तल्लमस्माकं अपरोक्षं तत्त्वं तस्य ॥ कथंभूतान् अस्मान् स्थितेर्दुर्गमर्यादायाव्यतिकरो यथा स्यात्तथा तस्योपपामायसलेन गुणे
४ नत्र षान् ५६ ॥ एवं लब्धावलोको यैः सुरगणैस्तैरभिष्टुतौ अर्चितौ सन्तौ ययतुः ५७ भुवो भारव्ययाय नाशाय च कार एकवाक्यता
अ र्थः ॥ तौ एव सांप्रतमिहागतावित्यर्थः ॥ तदुक्तं तत्र अंशेन तु यावेशः कृष्णो नारायणः स्वयमिति ॥ यदु उद्वहः श्रेष्ठः कृष्णः कुरू

१ एवं सुरगणैस्तात भगवन्तावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरर्चितौ गंधमादनं ५७ ॥ ताविमौ वै भगवतो हरेरंशा
२व विहागतौ ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५८ ॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकं
पवमानं च शुचिं च हुतभोजनं ॥ ५९ ॥ तेभ्योग्नयः समभवन् चत्वारिंशाच्च पंच च ॥ त एवैकोनपंचाशात् साकं पि
तृपितामहैः ॥ ६० ॥ वैतानिके कर्म्मणि यन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्या इष्टयो यज्ञे निरूप्यंतेग्नयस्तु ते ॥ ६१ ॥
अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः ॥ साग्नयोनग्नयो तेषां पत्नी दाक्षायणी स्वधा ॥ ६२ ॥ ते
भ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥ ६३ ॥ भवस्य पत्नी तु
सती भवं देवमनुव्रता ॥ आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥ ६४ ॥

द्वहौ श्रेष्ठौ ॥ कृष्णावपि कृष्णनामानौ ५८ ॥ अग्न्याभिमानिनो देवात् स्वाहानामतस्य भार्या हुतभोजनमिति त्रयाणां विशे
षणं ५९ ॥ पितरस्त्रयः पितामहा एकः ते साकं सह ६० ॥ वैतानिके वैदिके कर्मणि यज्ञे येषां नामभिरग्निदेवताका इष्टः
यो निरूप्यंते किं ते यंते ते यैते ग्रयो न लौकिकाः ॥ अतो बहूनां नैव्यर्थमिति भावः सौम्याः सोमपाः येषामग्नौ करणमस्ति
तेसाग्नयः ॥ तद्रहितास्त्वनग्नयः ॥ ६२ तयोस्त्यमंततिर्नाभवत् जीवनमुक्तत्वात् इत्याह ॥ उभे ते इति ॥ ६३ ॥ गुण
शीलतश्चात्मनः सदृशं देवमनुव्रतापि सती पुत्रं न लेभे ६४ ॥ ४

तत्रहेतुः स्वपितरिदृष्टेऽप्रतिरूपेऽसदृशेऽप्रतिकूले सतीत्यर्थः ॥ आत्मनास्वयमेवात्मानं देहमजहात् त्यक्तवती योगसं
युतायोगमाश्रितेत्यर्थः ६५ ॥ इति चतुर्थे प्रथमोऽध्यायः ॥ १ ॥ द्वितीये प्रथमाध्यायोपाक्षिप्तभवदक्षयोः ॥ विद्वेषवर्ण्यते हेतु
विश्वसृजस्त्वत्रसंसवः २ सती सतीनाम्नी १ नचासौ कस्यचिद्द्वेषार्हकइति ॥ चराचरगुरुं जगतो दैवतं च को द्वेष्टि ॥ कथं च निर्वैरं द्वे

पितर्यप्रतिरूपे स्वेभवायागसे रुषा ॥ जहौ देवात्मनात्मानमजहाद्योगसंयुता ६५ ॥ इति श्रीभागवते महा
पुराणे चतुर्थस्कंधे [illegible] नाम प्रथमोऽध्यायः ॥ १ ॥ विदुर उवाच ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्स
लः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजां सती १ ॥ कस्तं चराचरगुरुं निर्वैरं शांतविग्रहं ॥ आत्मारामं कथं द्वेष्टि ज
गतोदैवतं महत् २ ॥ एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च ॥ विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्
सती ३ ॥ मैत्रेय उवाच ॥ पुरा विश्वसृजां सत्रे समेताः परमर्षयः ॥ तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥
४ ॥ तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा ॥ भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः ॥ ५ ॥ उदतिष्ठन्सद
स्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः ॥ ऋते विरिंचं शर्वं च तद्भासाक्षिप्तचेतसः ६ ॥

द्विनिर्वैरत्वे हेतुः शांतः शांतं शीलं तिरेव विग्रहो यस्य कुतः ॥ आत्मन्येवारामो रतिर्यस्य तं प्रत्याकः ॥ प्रजापतिर्दक्षः कथं द्वेष्टि
एवंभूते तस्मिन्द्वेषो युक्तोऽप्राक्तस्येत्यर्थः २ ॥ यतो हेतोर्विद्वेषात्प्राणांस्तत्याज एतदाख्याहि ३ ॥ तदेवाख्यातुमितिहासं प्र
स्तौति पुरेति समेता आसन् ४ ॥ प्रविष्टं दक्षमिति शेषः ॥ महत्सदः महतां सभां ५ ॥ स्वधिष्ण्येभ्यः स्वीयासनेभ्यः ६ ॥

भा० च०
५

७ प्राक् स्वोपवेशनात् पूर्वमेव निषण्णमुपविष्टं मृदं प्रियं ॥ तस्मादृतः तेनाभ्युत्थानादिभिरकृतादरः ॥ नाम श्रुतं नाम सहतु का
मं वक्तुं यथा भवति तथाभिवीक्ष्य ८ मेवं तं श्रूयतां अज्ञानान्मत्सराद्वा न तु वक्तः ९ स्तव खेनोचितक्रियाश्रूयेत च्छेन्तेनो

सदैस स्वपतिर्निर्दिष्टो भगवान्साधुसत्कृतः ॥ अज्ञं लोकगुरुं नत्वा निषसाद तदाज्ञया ७ ॥ प्राद्विवर्णां मण्डं दृष्ट्वा
नामश्रुत तस्मादृतः ॥ उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ८ ॥ श्रूयतां ब्रह्मर्षयो मे सह देवाः सहाग्नयः ॥ सा
त्रै धूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ९ ॥ अयं तु लोकपालानां यशोघ्नो निरपत्रपः ॥ सद्भिराचरितः पंथा येन लु
प्तेन दूषितः १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् । पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ११
गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः ॥ प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितं १२ ॥ लुप्तक्रिया
याशुचये मानिने भिन्नसेतवे ॥ अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरं ॥ १३ ॥ प्रेतावासेषु घोरेषु प्रेतैर्भू
तगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन् रुदन् ॥ १४ ॥

तिपाठे भ्रष्टेन १० ॥ तदेवाहं एव इति यद्यस्माद्विप्राग्निसमक्षं सावित्रीतुल्याया मे दुहितुः पाणिमग्रहीत ११ मृगशावस्येक्षिणी
बालस्या ईक्षिणी इवाक्षिणी यस्याः प्रत्युत्थानाभिवादार्हे मयि उचितसन्मानं वाचापि नाकरोत १२ अनर्हाय कन्या दत्तेत्यनुतप्
यमान आह लुप्तक्रियायेति सार्धैः अशुचिः उशतीं वेदलक्षणां गिरं ॥ १३ ॥ प्रेतावासेषु श्मशानेषु सुप्ताः ॥ विकीर्णाः केशा ५

चिताभस्मनाकृतं स्नानं येन प्रेतानां स्रजो माल्यानि यस्य स प्रेतस्रक्। नराणामस्थीनि भूषणानि यस्य त्रिविधं इत्यपदे रोनाममात्रं
यस्य। तमोमात्रात्मकः केवलतमोरूपश्चात्मा भावो येषां ॥१५॥ उन्मादाभूतविशेषास्तेषां नाथाय दुर्हृदे दुः शुचिताय। वेतेति
च्छेदः वास्तवस्त्वयमर्थः॥ लुप्ता क्रिया यस्मिन् परब्रह्मरूपत्वात् अत एव नास्ति शुचिर्यस्मात्। अमानिने अभिन्नसेतव इति
च्छेदः तस्य परमेश्वरस्य महीयामानुषी कन्या कथं योग्या स्यादिति लज्जादिना दातुमनिच्छन्नपि तत्स्वबंधलोभेन दत्तवान्
शूद्रायेत्यनर्हत्वमात्रदृष्टांतः नहीनत्वे॥ पूर्वापरस्ववचनविरोधापत्तेः॥ एतदुक्तं भवति॥ यथा कश्चित् शूद्राय वेदमर्थलोभे

चिताभस्मकृतस्नानः प्रेतस्रक् न्रस्थिभूषणः॥ शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः॥ पतिः प्रमथभूता
नां तमोमात्रात्मकात्मनां।१५॥ तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे॥ दत्ता वत मया साध्वी चोदिते परमेष्ठिना
॥१६॥ मैत्रेय उवाच॥ विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं॥ दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे॥
॥१७॥ अयं तु देवयजनं इंद्रोपेंद्रादिभिर्भवः॥ सह भागं न लभतां देवैर्देवगणाधमः॥१८॥

न ददाति प्रेतावासेष्वित्यादि एवं विडंबनामात्रमिति तद्व्ययमेवाह॥ उन्मत्तवदिति॥ अन्यथा उन्मत्त इत्येवावक्ष्यत्। अशिवः
नास्ति शिवो यस्मात् अमत्तो मत्तजनप्रिय इति च च्छेदः॥ पतिः प्रमथभूतानामिति भक्तवात्सल्यमाह॥ नामसानपि दोषमप
नीय पातीति नष्टानामपि शौचं शुद्धिर्यस्मात्। दुर्हृदे दुष्टेष्वपि मयानुकंप्या इति हृतमनो यस्य स दुर्हृत् तस्मै वनेति हर्षे अहह
एको व्यालज्ञामयादिकं परित्यज्य॥१६॥ अप्रतीपं अप्रतिकूलं यथा भवत्येवमवस्थितमपि विनिंद्य देवानां यजनं स
मये देवैः सह भागं न लभतां किं तु तेभ्यः पृथगेव लभतां अगण्योदितत्वात्। यद्वा तेषु भक्तवत्सलभतां सर्वयोषकत्वात्। अत्र

॥२८॥

द्वे
भा० च०
६

सदसस्तस्मात्स्थानात् विनिःक्रम्य तुंगामहे कौरव्य ॥ १९ ॥ गिरिपास्यानुगानामग्रणी मुख्यः रोषएव कषायस्तेन दूषितः
आरक्तनेत्र इत्यर्थः तस्य गिरिशस्य वाच्यतां वचनानर्हतां निंद्यतामित्यर्थः तेभ्योपि शापं विससर्ज ॥ २० ॥ दक्षं शापं पति सार्द्धं द्वि
भिः एतन्मर्त्यं दक्षशरीरं उद्दिश्य अस्य संमत्वा अप्रतिद्रुहि श्रीशिवे द्रोहमकुर्वति ॥ पृथग्दृष्टिः भेददर्शी तत्त्वतः परमार्थात् २१
अतत्त्वमेवाह ॥ गृहेष्विति ॥ कर्मतंत्रं कर्मपरिकरं ॥ वेदे ये अर्थवादास्तत्प्रपंचैर्हवेचातुर्मास्ययाजिनः सुकृतं भवतीत्या
दयस्तैर्विपन्ना विनष्टा धीर्यस्य ॥ २२ ॥ परो देहादिः तमेवात्मत्वेनाभितो ध्यातुं शीलं यस्यास्तया बुद्ध्या विस्मृता आत्मनो

त्रिविधमानः सदसस्यमुखैर्देहो गिरित्राय विसृज्य शापं ॥ तस्माद्विनिःक्रम्य विवृद्धमन्युर्जगाम कौरव्य
निजं निकेतनं ॥ १९ ॥ विज्ञाय शापं गिरिशानुगाग्रणी नंदीश्वरो रोषकषायदूषितः ॥ दक्षाय शापं विससर्ज
दारुणं ये चान्वमोदंस्तद्वाच्यतां द्विजाः ॥ २० ॥ य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टिः
स तत्त्वतो विमुखो भवेत् ॥ २१ ॥ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ॥ कर्मतंत्रं वितनुते वेदवादविपन्नधीः
॥ २२ ॥ बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ॥ २३ ॥ विद्याबु
द्धिरविद्यायां कर्ममय्यामसौ जडः ॥ संसरंत्विह ये चामुमनु शर्वावमानिनं ॥ २४ ॥

गतिस्तत्त्वं येन अतः पशुतुल्यः अतितरां स्त्रीकामोस्त्विति द्वितीयः शापः ॥ बस्तस्य मुखमिव मुखं यस्येति तृतीयः शा
प पः २३ अयं च शापो अस्यानुरूप एवेत्याह ॥ विद्याबुद्धिः इं मे व तत्त्व विद्येति बुद्धिर्यस्य अतोसौ जड एव ॥ द्विजान् शापा ६
ति संसरंत्विति सार्द्धाभ्यां ॥ सर्वं भवमन्यत इति तथा तममुं दक्षं ये चानुवर्त्तंते संसरंतु जन्ममरणाद्यनुभवंत्विति एकः शापः २४

ते

श्रुतायावेदरूपायाः ॥ पुष्पाणीवार्थवादाः मनःक्षोभकत्वात् ॥ अर्थवादबहुलाया इत्यर्थः मधुगंधतुल्येन अरोचनेन मथ्ना मनः
क्षोभकेण तु उन्मथितः ॥ आत्मा मनो येषां ते संमुह्य ॥ तु कर्मस्वासक्ता भवंत्विति द्वितीयः ॥ २५ ॥ सर्वभक्ष्याः भक्ष्याभक्ष्यविचारशून्याः
॥ वृत्त्यैः देहादिपोषणाय धृतानि विद्यातपोव्रतानि यैः ॥ वित्तादिष्वेवारामो रतिर्येषां ते ॥ याचकाः संतो विचरंत्विति च
शापचतुष्टयं २६ ॥ प्रत्यसृजत प्रत्यदात् शापफलं ब्रह्मदंडं २७ ॥ सच्छास्त्रस्य परिपंथिनः प्रतिकूलाः ॥ २८ ॥ सुरा गोडी पैष्टी

॥ गिरः श्रुतायाः पुष्पिण्या मधुगंधेन भूरिणा ॥ मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः २५ ॥ सर्वभक्षा द्विजा २
वृत्त्यै धृतविद्यातपोव्रतैः ॥ वित्तदेहेंद्रियारामा याचका विचरंत्विह ॥ २६ ॥ तस्यैवं वदतः शापं श्रुत्वा द्विजकुला
य वै ॥ भृगुः प्रत्यसृजत्शापं ब्रह्मदंडं दुरत्ययं २७ ॥ भवव्रतधरा ये च ये च तान् समनुव्रताः ॥ पाखंडिनस्ते भवं
तु सच्छास्त्रपरिपंथिनः ॥ २८ ॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः ॥ विशंतु शिवदीक्षायां यत्र दैवं सुरा वि
सवं २९ ॥ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ ॥ सेतुं धारणं पुंसामतः पाखंडमाश्रिताः ॥ ३० ॥ एष एव हि
लोकानां शिवः पंथा सनातनः यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्द्दनः ॥ ३१ ॥ तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनं च
विगर्ह्य यात पाखंडं दैवं वो यत्र भूतराट् ॥ ३२ ॥

माध्वी च आसवस्तौ (लो) दिसंज्ञं मद्यं द्वैविध्यात् मंडल ॥ तद्यत्र दैवं पूज्यं देवता च तदादरणीयमिति वा २९ ॥ ब्रह्म वेदं कथंभूतं से
तुं मार्यादारूपं ॥ तदेवाह पुंसां वर्णाश्रमाचारवतां विधारकं ३० स तुल्यं प्रपंचयति द्वाभ्यां एष एवेति लक्षणेन व शिवः ॥
पंथाः यं पूर्वे ऋषयः ॥ अनुसंतस्थु आश्रितवंतः ॥ यत्र यस्मिन् जनार्द्दनः प्रमाणं मूलं ॥ ३१ ॥ भूतराट् भूतानां तामसानां पतिः ३२

भा॰च॰ अन्योन्यथा येनोभयोर्नोसाद्भिमना इवेति तथापि भगवदनुगृहीतानां नाशो न स्यादिति भावः ॥३३॥ ऋषभः सर्वश्रेष्ठो हरिर्य्य(स्मि)
७ न्नईज्य पूज्यः तत्सत्रं सम्यग्विधाय हे महेष्वास विदुर ३४ यत्र भया गंगा अन्विता तत्रावभृतस्नानं कृत्वा ततः स्थानात् ययुः ३५
न ॥ इति चतुर्थे द्वितीयोध्यायः ॥२॥ तृतीये तु सती तातयज्ञोत्सवदिदृक्षया । गमिष्यंती महेशेन वारितानीति हेतुभिः ॥१॥ द्विषत्

॥ मैत्रेय उवाच ॥ तस्यैवं वदतः शापं भृगोः स भगवान् भवः ॥ निश्चक्राम ततः किंचित् विमना इव सानुगः
३३ तेपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् ॥ संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥ ३४ आप्लुत्याव
भृथं यत्र गंगा यमुनयान्विता ॥ विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥ ३५ ॥ इति श्रीभागवते महापुरा
णे चतुर्थस्कंधे दक्षशापो द्वितीयोध्यायः ॥ २ ॥ मैत्रेय उवाच ॥ सदा विद्विषतोरेवं कालो वै ध्रियमाण
योः ॥ जामातुः श्वशुरस्यापि सुमहान् अतिचक्रमे ॥ १ ॥ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना ॥ प्रजापतीनां स
र्वेषां माधिपत्ये स्मयोभवत् ॥ २ ॥ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च ॥ बृहस्पतिसवं नाम समारेभे क्रतूत्तमं
॥ ३ तस्मिन् ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः ॥ आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥ ४ ॥

माणयोः अवर्तत धृ भातयोः धृङ् अवस्थाने इत्यस्मात् ॥१॥ ऋङ् विहीनो यज्ञो नास्त्येव तथापि दक्षस्य रुद्रपरित्यागो द्विषाकृतो
स्व ॥ तत्र क्षेपे हेतुरुक्तः गर्वहेतुरुक्तः गर्वहेतुमाह ॥ यदा तु प्रजापतीनामाधिपत्येभिषिक्तः तदा तस्य प्रथमं योगर्वो भवत् ॥ २ ॥
गर्वादेव ब्रह्मनिष्ठान् सेश्वरानभिभूय तिरस्कृत्य ॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यष्टुं तेती प्रवृत्तः ॥ वाजपेयेनेष्ट्वा समारेभे
३ कृतस्वस्त्ययनाः कृतमंगलाः ॥ सभर्तृकाः इति दक्षिणा दिभिः ॥ प्रथमं सहितानामपि पत्न्यर्हणे पुनरर्हणमुक्तं ॥ ४ ॥ ७

ततदा खेचराणां प्रजल्पतां सतां पितृयज्ञमहोत्सवं श्रुत्वा ५ तत्र व्रजंतीरुपदेवानां गंधर्वादीनां वरस्त्रियश्च स्वनिलया
भ्यासे समीपे दृष्ट्वा औत्सुक्यात्पतिमभ्यभाषतेति त्रितयाणामन्वयः कथंभूताः स्त्रियो दृष्ट्वा विमानानि यानानि यासां ताः निष्क
निष्ककानि कंठेषु यासां ६ शोभनानि वासांसि यासां ७ लोलानि चंचलानि अक्षीणि यासां मृष्टान्युज्वलानि यासां ताः ८
निर्यापितः प्रवर्तितः अहे वाम प्रिय ते यद्यर्थिता तर्हि वयं च तत्राभिसराम गच्छाम नचाद्यापि यागो निवृत्तः यतो अमी विबु

तदुपश्रुत्य नभसि खेचराणां प्रजल्पतां सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ५ व्रजंतीः सर्वतो दिग्भ्य उप
देववरस्त्रियः विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः ६ दृष्ट्वा स्वनिलयाभ्यासे लोलाक्षीर्मृष्टकुंडलाः
पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ७ सत्युवाच प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञम
होत्सवः किल वयं च तत्राभिसराम वाम ते यद्यर्थितामी विबुधा व्रजंति हि ८ तस्मिन्भगिन्यो मम भर्तृभिः स्वकै
र्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः अहं च तस्मिन्भवताभिकामये सहोपनीतं परिबर्हमर्हितुं ९ तत्र स्वसॄर्मे न
मा नु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरं द्रक्ष्ये चिरोत्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम् १०

यान्ति व्रजंति औत्सुक्यं प्रकटयंत्याह तस्मिन्निति त्रिभिः पित्रा उपनीतं परिबर्हमलंकारादिद्रव्यं भवता सह अर्हितुं स्वीकर्तुं काम
ये अर्हितुमिति पाठे सत्कृतं परिबर्हमिच्छामिति ९ स्वसॄर्भगिनीः भर्तृभिः सम्मिताः सदृशीः क्लिन्नधियं स्नेहार्द्रचित्तां चिरमुत्कंठमु
त्सुकेन मनो यस्याः साहं द्रक्ष्यामि हे मृड मुनिभिरुन्नीयमानं प्रवर्त्यमानं अध्वरे ध्वजमिव दृश्यं श्रेष्ठमध्वरं यद्वा उन्नीयमानं यज्ञकेतुं
पश्यंती १० अहो किं तत्राश्चर्यं येन तवौत्सुक्यमिति चेत् अत आह त्वयीति हे अज्ञात तद्विश्वमायामयं रूपं त्वय्येव त्वन्मायया रचि

ना० च०
८

तं विसाति। अतोयद्यपितव नाश्चर्यं बुद्धिः॥ तथाप्यहं योषित् पुंस्त्वं कस्मात्वा तव तत्वं च न जानामि अतो दीनां कृपणां सती हे
नव मे नवद्धिति जन्मनः मिंदिद्दसे दृष्टुमिच्छामि॥ ११॥ दिद्दत्या चैमुत्पन्नायेनअनक्रिय यौवेतिद्धात्वां हे नत्त अनवेति सुदृद्धियो गदुः
खं तत्य ताना व्याहितमिति नावः। अस्या योषितः संबंध रहिता अपि प्रयांतीः॥ पप्प कांत सखाः नर्तसहिताः वरूथपाः संघसः क
थं भूताः यासांविमा नै र्नर्त मंडितं ताः हे पितिकंठनीलकंठे परानुग्रहायत्वमा विषमयित्नहितमिति सूचयति॥ १२॥ तदाहहे।

त्वयैतदाश्चर्यमजात्ममायया विनिर्मितं नाति गुणत्रयात्मकं॥ अथाप्यहं योषिद् तत्वविच्चतेदीनादिदृक्षे नव
हितिं॥ ११॥ पप्पप्रयातीव नवान्ययोषितोप्यलंकृताः॥ कांतसखा वरूथपाः यासांवुडद्भिः शितिकंठमंडितं नमो
विभातिः कलहंसपांडुभिः॥ १२॥ कथं सुतायाः पितृगेह कौतुकंनिशाम्य देहं सुरवर्य्य नेंगते॥ अनाहूता अप्या
निर्यंतिसौहृदं नर्तुर्गुरोर्देहकृतस्य केतनं॥ १३॥ तन्मे प्रसीदेदम मर्त्यवांछितं कर्तुं भवान् कारुणिको वहतार्हे
ति॥ त्वयात्मनोर्द्धे हमदभ्रचक्षुषा निरूपिता मानुगृहाण याचितः॥ १४॥ रुषि रुवा च॥ एवं गिरित्रः प्रियया भिभाषि
तः॥ प्रत्यभ्यधत्त प्रहसन् सुहृत्प्रियः संस्मारितो मर्म भिदः कुवागिषून्यानाह को विसृजतां समहत॥ १५॥

सुरश्रेष्ठ पितृगेहोत्सवं निशाम्य सुताया देहं कथं नेंगते दृष्टुं न प्रचलति॥ तथाप्यनाहूताः संतः कथं गच्छामस्तत्राह सौहृदं सुहृदः
केतनं गृहं तथा नर्तादीनां च गृहं अनाहूता अप्यभियांतिसंतः कृष्णमार्गे॥ १३॥ हे अमर्त्य ततस्मात् प्रसीद इदं मे वांछितं कर्तुं
भवानर्हतिति॥ कारुणिकत्वमेवाह॥ त्वद भ्रचक्षुषा अनल्पज्ञानेनापि त्वया आत्मनो देहस्यार्द्धे हं निरूपितातस्तायतो र्द्धना
रीश्वर इति ख्यातोसि॥ अतो मामा अनुगृहाण याचितः सन्॥ १४॥ अभिभाषितो भियाचितः कः द्वः॥ यानाहमर्मभिदः

तिय तानकुवागिषून् दुरुक्तिवाणान् संस्मारितः सन्॥ १५॥

८

अनाहूताम्अपीति त्वया यदुदितं उक्तं तच्छोभनमेव किं तु अनात्मदेहादावहंकारः । ततस्तेन मदेन मन्युना च ते बंधवो यद्यनुत्पादि
तद्दोषदृष्टयो भवंति तर्हि न तु त्वादिते आरोपितेऽदृष्टिर्येषां ते ॥१६॥ ननु विद्यादिगुणयुक्तोऽस्म्यतस्त्वाद्दृश्योषु महत्सु कथं दोषदृष्टि
र्वेत । तत्राह । विद्यादिभिरेव स्मृतौ हतायां विवेकज्ञानेन ये सति न्यसां महत्तमानां धाम तेऽतो न पश्यंति । ननु गुणैः कथं विवेकनाशः ।
तत्राह । सतां गुणैर्विवेकहेतुभिरपि असत्तमानामितरैः दोषस्तैः । अत एव तैर्नेतः धृतः पुष्टो वा अहं विद्वान तापस इत्यादिमानो गर्वो
तेन दुष्टा दृष्टिर्येषां ते ॥१७॥ स्वजनव्यपेक्षया बंधुदृष्ट्या गृहान प्रतीयान्न तावलोकयेत । अनवस्थितचित्तत्वमेवाह । ये वक्रधिया कु

श्रीभगवानुवाच । त्वयोदितं शोभनमेव शोभने अनाहूता अप्यभियंति बंधुषु ॥ ते यद्यनुत्पादितदोषदृष्टयो बलीयसा
ऽनात्म्यमदेन मन्युना ॥१६॥ विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः ॥ स्मृतौ हतायां भृतमानदुर्दृशः स्त
ब्धा न पश्यंति हि धाम भूयसां ॥१७॥ नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनां ॥ येऽभ्यागतान्वक्रधि
याभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥१८॥ तथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दितांगो हृदयेन दूयता ॥
स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥१९॥ व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः । प्रियात्म-
जानामसि सुभ्रु सम्मताः ॥ अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥२०॥ टिलया बुद्ध्याप

श्यंति आरोपिता उत्तंभिता भ्रूर्येषु तान्यारोपितभ्रूणि तैः आरोपितानि भ्रूभिरिति वा ॥१८॥ ननु स्वजनानां गृहं सुहृद्दृष्टित
यंते यां दुश्चेष्टितं च सोढव्यं । न तस्य दुःसहत्वादित्याह । तथेति । अरिभिः शिलीमुखैर्बाणैरर्दितांगः खंडितगात्रो
पि तथा न व्यथते यतः शेते स्वपिति स्वानां दुरुक्तिभिर्मर्मसु ताडितो यथा दूयता व्यथमानेन हृदा दिवानिशं तप्यति
॥१९॥ ननु पितृगतायां नेयं शंकेति चेत् । तत्राह [illegible] गतिः [illegible] ति यस्य तस्यात्मजानां कन्यानां मध्ये त्वं प्रि

येति मे संमतासि पितुः सकाशात्मानं न लप्स्यसे मदाश्रयात्मेव धात ॥२०॥

५५

भा०४० ननु भगवन् त्वया किमिति द्रुह्यन्तः तिरस्कृताः यतोसौ त्वां द्वेष्टि अत आह ॥ पापच्यमाने अलं दह्यमाने न हृच्छयः क्षिते इंद्रियः कामिः पुरुषो जीवस्तस्य
१९ बुद्धिस्थितं तत्साक्षिणां निरहंकारिणामित्यर्थः समृद्धिभिः पुण्यकीर्त्यादिभिः एषां पदं स्थानं मैश्वर्यं अधिरोढुमकल्पः असक्तः सन्परं द्वेष्टि आ
सुरा यथा हरिं केवलं द्विषंति २१ ॥ ननु त्वया पित्रे प्रत्युत्थानविनयाद्यकरणे एव दोषो जातस्तत्राह हे सुमध्यमे प्रत्युद्गमादिकमिषेदं तेषु
द्विधी यते तत्प्राज्ञैः साधु विधीयते तत्प्राज्ञैः साधु विधीयते साधुत्वमेवाह ॥ परस्मै श्रीवासुदेवाय गुहाशयाय अंतर्यामिण एव तच्च
चेतसैव परिपूर्णेन तस्मिन्कायिकव्यापारायोगात् अंतोतर्यामिदृष्ट्या मनसा सर्वं कृतमिति तात्पर्यः २२ किंच ॥ न केवलं मया गते ध्येव

वा एवं मानेन हतात्मनेन्द्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणां अकल्प एषामधिरोढुमञ्जसा पदं परं द्वेष्टि यथासुरा हरिं ॥
२१ ॥ प्रत्युद्गम प्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ॥ प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमा
निने २२ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ॥ सत्त्वे च तस्मिन्भगवान्वासुदेवो ह्यधोक्षजो मे नमसा वि
धीयते २३ ॥

वासुदेव हृद्ध्यानमनु क्रियते किंतु नित्यमेव मनसि वासुदेवश्चिंत्यत इत्याह ॥ विशुद्धं सत्त्वमंतःकरणं सत्त्वगुणो वा वसुदेवशब्दितो
त्रत कुतः यद्यस्मात्तस्मिन्सत्त्वे वासुदेवे ईयते प्रकाश्यते अपगतमावृतमावरणं यस्मात्सः अयमर्थः ॥ वसुदेवे भवति प्रतीयत इति हि वासुदेवः
परमेश्वरः प्रसिद्धः स च विशुद्धसत्त्वे प्रतीयते ॥ अतः प्रत्यायार्थेन प्रसिद्धेन प्रकृत्यर्थो निधार्यते ॥ ततश्च वा समयति देवमिति व्युत्पत्त्या
वा वसत्यस्मिन्निति वा वसुदेवः दीव्यते द्योतत इति वा वसुभिः पुण्यैर्दीव्यति प्रकाशतीति वा वासुदेवशब्दवाच्यं शुद्धसत्त्वं ततः किमि
त्यत आह ॥ स चेत्तस्मिन्नेव मया नमसा नमस्कारेणानुविधीयते सेव्यत इत्यर्थः ॥ मनसेति पाठे मनसा विज्ञानेनाधीयते धार्यते चिंत्य
त इत्यर्थः ॥ यतः अधोक्षजो तेषु प्रत्याहृतेष्वक्षेषु जायते प्रकाश्यते ॥ इंद्रियागोचर इत्यर्थः २३ ॥ १९

तस्मात्त्वया न निरीक्ष्यः देहत्यक्तदपीति यो सकत्वादिति तिरौपचारिकपितत्वमावर्त्तं॥ छिद्रप्राप्नु: तदेवाह हेवरोरु घोरदृक्: विश्वस्त तां
यन्मगतंमां निरपराधं तिरोऽकरोत तिरस्कृतवान् विपक्षेदोषमाह यदीति॥ मद्वचोऽतिक्राय च अतिक्रम्य यतः संजाविततस्य सुप्रतिष्ठि
तस्य यद्दाऽनवतिलहासमपरानवस्तस्य मरणाय २५॥ इति चतुर्थे तृतीयः॥ २ चतुर्थे तुयतिं हित्वा गतापित्राऽवमानिता रूपानिर्नेतस्य

ततो निरीक्ष्योन पिता पिदेह कृतदृष्टो मम छिद्रतदनु अतात्यये॥ यो विश्वस्त कथयन्नगतं वरोरु मामनागसं दुर्वचसा क
त्य रोतिर: २४॥ यदि त्रुष्ठि मे तिहायमद्वचो नइं नवत्पाननतो नविष्यति॥ संजावितस्यैव नतात्पुरा नबोयदामस्तो मर॰
णाय कल्पते॥ २५॥ इति श्री नागावते महापुराणे चतुर्थस्कंधे कुमारडसंवादे नाम तृतीयोऽध्यायः॥ ३॥ मैत्रे
त्रेय उवाच॥ एतावदुक्त्वा विरराम शंकरः पत्नंगनाशं पश्यन्नपत्र चिंतयन्॥ सुहृद्दिदृक्षुः परिशंकिता नवान्निष्क्रा
मती निर्विशती द्विधासमा॥ १॥ सुहृद्दिदृक्षा प्रतिघातदुर्मनाः स्नेहादुदंत्यश्रुकलातिविह्वला॥ नवंभवान्यप्रतिपू
रुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः॥ २॥ ततो विनिःश्वस्यसती विहाय तं शोकनरोषेण च दूयता हृदा॥ पित्रोरगा॰
तस्त्रैणविमूढधीगृहान्प्रेम्णात्मनो योऽर्द्धमदात्सतां प्रियः॥ ३॥

तयदं तदेहो देहमिती र्यते॥ १॥ उभयत्र अनुज्ञाते वलात निवारणे च सुहृद्दिदृक्षुः निष्क्रामती भवात्परिशंकिता पुनर्निर्विशंती चतदासासती
द्विधा आंदोलितचिता असवनूव॥ १॥ सुहृदां दिदृक्षायाः प्रतिघातेन दुर्मना अश्रुणां कलाभिर्लोपैरतिविह्वला व्याकुला अप्रतिपू
रुषं स्वसमानपुरुषांतररहितं॥ प्रधक्ष्यतीव नस्मीकरिष्यतीव रूषा जातो वेपथुः कंपो यस्याः॥ २॥ ततस्तं विहाय पित्रोर्गृहान्गता॥ कथं
नृतं यः प्रीत्या तस्यै आत्मनो देहस्यार्द्धमदात्॥ त्यागे हेतुः स्त्रैणं स्त्रीस्वनावः तेन विमूढाधीर्यस्याः सा॥ ३॥

ना॰ग॰च द्रुतविक्रमां पीयूषं गच्छंती ॥ सहपार्षदैः परैश्च वर्तमानाममरस्त्र्यादिर्यक्षांते ॥ पुरतो वृषेंद्रोपेयांते ॥ गतव्यथा निर्झरियाः रु
१० ह्लातिक्रमेण तस्यागमनादागतव्यथा इति वा ४ ॥ तां वृषेंद्रमारोप्य सारिकादिभिः क्रीडोपकरणैश्च तातपत्रादिभिश्च महाराजवि
त्रि तिः सह विटंकता योऽरितायायुः ॥ सारिकापठननिरूपणानिवृत्तापद्विणी गीतायने गीताश्रये ५ ॥ आसमंताद्घोषो वेदघोषस्तेनो
र्जितं घोषमानं यत्र संबंधिपंसु विपासतं यस्मिन् ॥ यद्वा तेनोर्जितं ॥ अतिपापिर्तं द्वैवे पासं परस्पर्द्धो यस्मिन तद्रुह्नं यज्ञस्थानं समा य

तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः ॥ पुरो वृषेंद्रास्तरसा गत
व्यथाः ४ ॥ तां सारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमा
रोप्य विटंकिता ययुः ५ ॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्म
भिर्निर्मितभांडं यजनं समाविशत् ॥ ६ ॥ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ॥ ऋते
स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥ ७ ॥ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृ
भिश्च सादरं ॥ दत्तां सपर्यां वरमासनं च सा नादत्त पित्राप्रतिनंदिता सती ॥ ८ ॥

विषादे वी विबुधैश्च तुष्टं ॥ मृदादिभिर्निर्मितानि निर्मितानि भांडानि पात्राणि यस्मिन् ॥ ६ ॥ कश्चन नाद्रियत नादृतवान् ॥ यज्ञकृतो द
त्तात् ॥ यद्भयं तस्मात् तत्र हेतुः तेन विमानितां स्वसॄर्जननीं च ऋते विना । तास्तु सादराः परिषस्वजुः ॥ आलिंगितवत्यः प्रेमाश्रुभिः वि
रुद्धकंठो यासां ॥ ७ ॥ अप्रतिनंदिता अनादृता सती नादत्त न गृहीतवती । कथं सौदर्येण सोदरत्वेन भगिनीनां यः संप्रश्नः तत्र
समर्थयोग्या या वार्ता तया सह तां च नादृतनाम्न्यो दिसर्व्यः ॥ ८ ॥ १०

नह्रियेतेनदुःखनागोयस्मिंस्तं ॥ दैवेनहेतुकृतंहेलनंअवज्ञानाह्रात्थिकरणात ९ ॥ उगर्हेतिं दितवती ॥ अमर्षेणकोपेनविपन्नआव्य
क्तातयापिवेदशिखिपि वृद्धिटूतंममपथः कर्ममार्गस्तत्रश्रमोऽभ्यासस्तेनसमयोगार्वेयस्य ॥ दक्षवधायसमुत्थितानसर्वेन्द्रियाणि
गृह्यन्निवार्य ॥ २० ॥ निंदामेवाह ॥ नयस्येति ॥ अयोदृष्टानिः मुक्तवैरकेसम्बन्धविरोधेतस्मिन्पितेनवेतंकृतेविनाकृतमः प्रतीपयेत ॥ प्र
तिकूलमाचरेत ॥ वैरानेहेतवः यस्यलोकेंअतिपापिनः ॥ अतिपापितोनास्तितथाप्रियश्चनास्तिसमानस्तथ ॥ अतिपापेनवि

अरुह्नागतंमनेहयचाध्वरंपित्राचदेवेकृतहेलनंविमो ॥ अनादृतंयज्ञसदस्यधीश्वरीचुकोपलोकानिवधक्ष्यतीरु
षा ॥ ९ ॥ उगर्हेसाम्पर्षविपन्नयागिराप्रियोनहिद्विषेधमस्यपश्चमसम्यम ॥ स्वतेजसानलगणान्समुत्थितान्निगृह्यदे
वीव्रतोनिम्रश्एवन ॥ १० ॥ श्रीदेव्युवाच ॥ नयस्यलोकेस्त्यतिशायिनः प्रियःतथाप्रियोदेहभृतांप्रियात्मनः ॥ त
स्मिन्समस्तात्मनिमुक्तवैरकेऋतेभवन्तंकतमःप्रतीपयेत ॥ ११ ॥ दोषान्परेषांहिगुणेषुसाधवोगृह्णन्तिकेचि
न्नभवादृशाद्विजः ॥ गुणांश्चफल्गून्बहुलीकरिष्णवोमहत्तमास्तेष्वविदद्भवानघं ॥ १२ ॥

योनास्ति ॥ देहभृतांप्रियोऽयमात्मातस्यसमस्तस्यात्मनिकारणभूते ॥ समस्तरूपइतिवा ॥ ३ ॥ तस्यचप्रतिकूलकरणंद्वेषामहत
महद्द्रोहेणसाक्षात्तद्द्रोहेणचातत्रपुरुषाणांचातुर्विध्यंवदती ॥ महत्तमद्रोहमाह ॥ दोषानितिद्वाभ्यांहेद्विजेत्यधिक्षेपस्तवादृशाः ॥
लदिधाः ॥ असत्यकाः ॥ परेषांदोषानेवगृह्णंति ॥ नतुगुणानकेचिन्मध्यस्थागुणेषुदोषान्नगृह्णंति किंतुयथास्थितानगुणा
दोषानविवेकेनगृह्णंतितेतुमहांतउच्यंते ॥ साधवस्तुकेवलगुणानेवगृह्णंति ॥ नदोषानतेतुमहत्तमाउच्यंते ॥ महत्तरादोषानगृह्णंत्येव
प्रत्युतफल्गूनल्पानपिगुणानबहूलीकुर्वंतिकरिष्णवोभवंतितेषुभवानअघमविंदन्विदितवानकल्पितवानित्यर्थः तद्वद्विरुस्थानितिन
यकल्पितवानित्यनेनसूचितं ॥ १२ ॥

गा० च०
११
एतच्चदुर्ज्ञेयेषु युक्तमेवेत्याह। नेति कुणपं तुडं शरीरं तदेवात्मेति वदंति ये तेषु ईर्ष्यारूढां तिः से र्ष्यं यथा न भवत्येवं महतां विनिंदिते तीयत
एतदाश्चर्यं न भवति। सेर्ष्यं निरस्ते ते दुःप्रनावो ये षामिति वा यद्यपि महापुरुषा त्वन्निंदां सहंते तथापि तत्पादरेणव स्तदसहमानाः ते षां ते।
ङोनिरस्यंति। अतोऽपराद्धेषु महन्निदनमेवोचितमित्यर्थः ११ तदेवं महद्द्रोहं मुक्त्वा तस्मिन्नेव भक्तं दोहमाह। यदिति द्विधा सा पुलयस्या
धुरुरमात्रं पि वियतिति तल्लसिद्धनाम नृणां सर्वेषामास्पदं सर्वे हंति। केवलं गिरेवेरितं न तु मनः पूर्वकं तत्तु सकृदपि प्रसंगादपि तपि
वेदेषि। नलंघ्यशासनमाज्ञा यस्य अहो शिवेतरः अमंगलरूपः १० पापहरत्वमुक्त्वा मुक्तिमुक्तिप्रदत्वेन शिवं वर्णयंत्याह। यस्यया

स

नाश्चर्यमेतद्यदहं दमल्स सर्वदा महद्भिनिंदाकुणपात्मवादिषु॥ सेर्ष्यं महापुरुषपाद पांसुभिर्निरस्तते उ सुतदेव पो
मनं १३ यद्युद्धरं नामगिरेरितं नृणां सकृत्प्रसंगाद्‌घमाशुहंतितत्॥ पवित्रकीर्तिमलंघ्यशासनं भवान॥ हो।
हेषि शिवं शिवेतरः १४ यत्पादपद्मं महतां मनोलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः॥ लोकस्य यद्वर्षति चाशिषा
र्थिनस्तस्मै भवान्द्रुह्यति विश्वबंधवे १५ किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्म
शाने॥ तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्द्ध्नि दधति तच्चरणावसृष्टं॥ १६॥

दपद्मं मनांसो वा लयस्ते ः। ब्रह्मरसो ब्रह्मानंदः स एवासवो मकरंदः तदर्थिभिः यच्चार्थिनः सकामस्य लोकस्य ताः आशिषो वर्षति १५
यदुक्तं शिवाख्यदेशोऽप्यशिव यद्योक्तं ये तावास्ते ष्वित्यादि तदाक्षिपंत्याह। किं चेति॥ जटाश्च अवकीर्य प्रमथा तेऽभ्रवसत॥ वसति स्मतस्य
गा प्रमथा तस्य प्रमथा नृस्यमाल्यानि भस्मानि नृकपालानि च न एवं लेनसंति यस्य तं त्वत्तोऽन्ये न विदुः। किं ते विदंत्येवेति चेत्। ननु यासतिते
यां तद्धास्यानुपपत्तेरित्याह। तच्चरणादवसृष्टं गालितं निर्माल्यं ये मूर्द्ध्नि धारयंति १६॥ ११

इदानींदेहंत्यक्तुंकामाधर्मतत्त्वमाह॥कर्णौवाछाद्यनिर्गच्छेत्।यद्यदिमर्त्तुंमारयितुंवाकल्पोनसन्नवति॥कदाधर्मावितरिधर्मकेईप्रो-
स्वामिनिअसृणिभिर्निरंकुशैर्नृभिरस्यमानेअधिक्षिप्यमाणेप्रभुःशक्तश्चेत्रुषतींअकल्याणवादिनींप्रसह्यबलात्छिंद्यात्।ततो
पिस्वयंप्राणान्विसृजेत्इतियत्सधर्मः॥१७॥तवत्वतःउत्पन्नंशितिकंठोनीलकंठःतन्निंदकात्॥प्रमादादापतस्यापविशुद्धस्यत्यागेवि-
न नोशुद्धिरितिदृष्टांतेनाह।जग्धस्यमहतस्यान्नस्योद्धरणंवमनमेवपुंसःशुद्धिंप्रचक्षते॥१८॥यदुक्तंलुप्तक्रियायाशुचयेइतितत्प्रत्या

दमि

कर्णौपिधायनिरयाद्यदकल्पईशेधर्मावितर्यसृणिभिर्नृभिरस्यमाने॥छिंद्यात्प्रसह्यरुषतीमसतींप्रभुश्चेत्
जिह्वामसूनपिततोविसृजेत्सधर्मः॥१७॥अतस्तवोत्पन्नमिदंकलेवरंधारयिष्येशितिकंठगर्हिणः॥ज न
ग्धस्यमोहाद्धिविशुद्धिमंधसोजुगुप्सितस्योद्धरणंप्रचक्षते॥१८॥नवेदवादाननुवर्त्ततेमतिःस्वए
वलोकेरमतोमहामुनेः॥यथागतिर्देवमनुष्ययोःपृथक्स्वएवधर्मेनपरंक्षिपेत्स्थितः॥१९॥

हेनेतिविधिनिषेधरूपानस्वएवलोकेस्वात्मन्येवरममाणस्यमहतोमुनेःसम्यग्विरक्तस्यमतिर्नानुवर्त्ततेनिर्वृताधिकारत्वात्
अधिकारभेदेदृष्टांतःयथादेवानांगतिराकाशएव॥मनुष्याणांपृथिव्यामेव॥अतःस्वधर्मएवप्रवृत्तिलक्षणेवास्थितःसन्त्व
मेनंधर्मंपुरुषंवानक्षिपेत्॥ननिंदेत्॥व्यवस्थिताधिकारत्वेनोभयोःसत्यत्वात्नक्षिपेदेवेतिचान्वयः॥१९॥श्री॥रा॥म॥जी॥
हेत्यादिवार.

ना० च० ११ एतच्चदुर्ज्ञेयंस्वरूपमित्याह। प्रवृत्तिमग्निहोत्रादि निवृत्तं शमदमादि ऋतं सत्यमेव। यतः वेदे आश्रितं विहितं तच्च विविच्य विषयव्यव-
स्थयाश्रितं तत्र विरोधे व्यवस्थामेवाह। उभयं रागवैराग्यलक्षणं लिंगं चिह्नमधिकारिविशेषणं यस्मिन्। ननु यावज्जीवमग्निहोत्रं जुहोति शान्तो दान्त इत्यादिषु नैवं व्यवस्था प्रतीयते सत्यं तथाप्युभयोरेकाधिकारविरोधात्तथा पर्यवस्यतीत्याह। युगपज्ज्ञाते यौगपद्ये यौगपद्येनैककर्तरि तत कर्मद्वयं विरोधि। ननु तर्हि निवृत्तं कर्मापि तेनानुष्ठेयमेव नेत्याह। ब्रह्मणि सदा शिवे किंचिदपि कर्म नर्च्छति न प्राप्नोति। अयमर्थः प्रवृत्तिनिवृत्तयोः परस्परधर्माकरणेन दोषः। तयोस्त्वेतदुभयधर्माकरणेऽपीति भावः

कर्म्मप्रवृत्तंच निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितं। विरोधितद्यौगपदैककर्त्तरि द्वयं तथा
ब्रह्मणि कर्म नर्च्छति॥२०॥ मा वः पदव्यः पितरस्मदास्थिता याः॥ यज्ञशालासु न धूमवर्त्मभिः तद-
न्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा अवधूतसेविताः॥२१॥ नैतेन देहेन हरे कृतागसो देहोद्भवे-
नालमलं कुजन्मना। व्रीडा ममाभूत्कुजनप्रसंगतस्तज्जन्म धिक् यो महतामवद्यकृत॥२२॥ श्लो० ७

२० चिताभस्मकृतस्नानः। तथा न इत्यादि ताभ्यो योगाद्युपायास्तत्राह। हे पितः अस्माभिराश्रिता याः पदव्यः अणिमादिसमृद्धयः
वो युष्माकं ता न सन्तीत्यर्थः। यतो वः पदव्यो यज्ञशालासु विवर्तन्ते ताश्च तदन्नेन यज्ञगतेनान्नेन तृप्तैरसुभृद्भिः केवलमीडिता धू-
मवर्त्मभिरनुष्ठीयन्ते। अस्मत्पदव्यस्तु नैवं भूताः किंतु अव्यक्तलिंगा हेतुर्यासां इच्छामात्रप्रभवत्वात्। अवधूतैः ब्रह्मविद्भिः सेवि-
ता अतो हे मा गर्वो भवेदिदि इति गर्वं मा कृथाः इति भावः २१ किं बहुना तेन त्वद्देहेन त्यक्ष्याम्येवेत्याह। न इत्यं एतेन नालं न पर्याप्तं किं
अपि तु अलमेव। कथं तेन कुजन्मना तद्देवाह। हरे कृतापराधस्य तव देहादुद्भूतेन। ननु अयं शुद्धो देहः कथं त्याज्यस्तत्राह। कुजनस्य
तव प्रसंगतः संबंधात् मम लज्जा आभूत। अतः यो महतामप्रियकर्त्ता तस्माज्जन्म तद्धिक् त्वत्संबंधाद्यन्मम धिगित्यर्थः॥२२॥ १२

किंच परिहासादिषु विनोदेन पि दाक्षायणीति संबोधयन् । त्वदीयं त्वत्संबंधवाचकं गोत्रं नाम यदा वृषध्वज आह ग. ज्ञाति । तदाहं व्यपे
तनर्मस्मितं यथा भवत्येवं सुदुर्मनाः अतिदुःखितचित्ता भवामि । तत्तस्माद्धि निश्चितं ॥ एतत्कुणपं मृतप्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि । २३ ।
दक्षं प्रत्यनुवादं कृत्वा पात्रुहन् क्रोधादिरिपुघातिन् ॥ उदीचीं उदीच्यां दिशि ॥ पाठांतरे उदङ्मुखी शांतवाक् गृहीतमौना दुकूलं ।

गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ॥ व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कु
णपं त्वदंगजं ॥ २३ ॥ मैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शांतवाक् ॥ स्पृष्ट्वा जलं पी
तदुकूलसंवृता निमील्य दृग् योगपथं समाविशत् ॥ २४ ॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभि
चक्रतः ॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदितानयत् ॥ २५ ॥ एवं स्वदेहं महतां महीयसा
मुहुः समारोपितमंकमादरात् ॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणां ॥ २६ । ततः स्वभर्तुश्च
रणांबुजासवं जगद्गुरोश्चिंतयती न चापरं ॥ ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना । २
७ ॥ तत्पश्यतां खे भुवि चाद्भुतं महद्धा हेति वादः ॥ सुमहानजायत हंत प्रिया दैवतमस्य देवी जहावसून् केन सती प्र
कोपिता ॥ २८

स्पृष्ट्वा आचम्य दृक् दृष्टिं । २४ । योगमार्गमेवाह । कृत्वेति । अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिकरौ निरोधेन समानौ
एकरूपौ नाभिचक्रे कृत्वा । तत उदानमुत्थाप्य धिया सह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् ॥ २५ । महतां पूज्यत
मेन । २६ । चरणांबुजे आसवं मज्जनानंदं न चेतुरपरं ददर्श । देहः स्वस्य सद्यः प्रज्वलितोऽभूत् ॥ समाधिना योऽग्निस्तेन । २६ । खे भुवि च हा
हेत्यादि वादः । तमेवाह हंतेति विषादे दैवतमस्य पूज्यतमस्य प्रिया केन दक्षेण प्रकोपिता सती ॥ २८ ॥

भा० च०
१३ महदनात्म्यं दौर्हृदं। अस्य सर्वत्र स्नेहएवन्याय्य इत्याकूतः यस्येति येन विमतात्मजा अवज्ञाता २९ दुर्मर्षं अत्यसहनं हृदयं यस्य लोके
तु जनमध्ये चपावाप्रासकं च यद्यतः स्वीयैर्गणैर्गतां अपराधतः स्वावज्ञया मातये मरणाय उद्यतां न निवारितवान् पुरुषद्विट् पि वे द्विषो
३० अद्भुतं ददृशुः च ३१ यतयज्ञघ्नानहंतीति तद्भिघ्नः तेन अपहतः रक्षस्त्यादिना ३२ उध्वर्युणा ऋगुणाये तपसा सोमपो
सोऽभवन्नामदेवाऽस्थिताः ३३ ब्रह्मतेजसा उपशाक्तिद्भिर्दिदीप्यमानैः ३४ इति चतुर्थे चतुर्थः॥ ४ पंचमेतु सतीदेहत्यागमाकर्ण्य

अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः। जहावसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति
मर्हति २९ सोयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेऽपकीर्तिं महतीमवाप्स्यति। यदंगजां स्वांपुरुषद्विडुद्यतां न प्रत्य
षेधत मृतयेऽपराधतः ३० वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतं दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः ३१ ते
षामापततां वेगं निशाम्य भगवान् भृगुः ३१ यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ३२ अध्वर्युणा हूयमा
ने देवा उत्पेतुरोजसा ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ३३ तैरलातायुधैः सर्वे प्रमथाः सह गुह्यकाः
हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ३४ इति श्रीभागवते महापुराणे चतुर्थस्कंधे सतीदेहोत्सर्गो नाम चतुर्थो
ऽध्यायः॥ श्री॥ मैत्रेय उवाच॥ भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात्। स्वपार्षदसैन्यं च तदध्व
रर्भुभिर्विद्रावितं क्रोधमपारमादधे १ क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषं। उत्कृत्य रुद्रः
पंचकरः वीरभद्रं कृत्वोत्पाद्य तेन दक्षमघातयत् १ प्रजापतेर्हतो निधनं सहसोत्थितो हसन् गंभीरनादो विससर्ज तां भुवि २
कृतः तेनासत्कृतायाः तस्या अध्वरे ये ऋभवो देवाः तैः स धूर्जटिः रुद्रः घोरः सनजटामुत्कृत्योत्पाद्य उत्थितः सन तां भुवि ससर्ज सुद १३
ष्टौष्ठपुटो येन तडित्तां वह्नीनां च सटा ज्वाला तद्वत् उग्रं रोचिर्यस्याः २

ततो रुद्रायाः॥ श्लोकाष्टकम् अतिकायो वीरभद्रो जात इति योज्यः तनुवा तन्वा देहेन दिवं स्पृशन् अत्यच्छस्पर्शः घनरुक् कृष्णवर्णः त्रयः
सूर्या इव दृशो यस्य करालास्त्वग्रा दंष्ट्रा यस्य ज्वलदग्निरिव मूर्द्धजा यस्य कपालमालायुक्तः विविधान्युद्यतान्यायुधानि यस्य ३ हे
रुद्र हे मद्भटयुद्धकुशल मद्भटानां त्वमग्रणीः सन् सयज्ञं दक्षं जहि बद्धतेजोऽपि दुर्मर्षमिति मा मंस्थाः यतस्त्वं मे ऽंशकः ४ मन्युना रुद्रेण पा-
रिचक्रमे प्रदक्षिणं चकार असंगमप्रतीघातं यत्र रंहो वेगः तेन नीतात्म महीयसां बलीयसामपि सहः सहिष्णुं बलं सोढुं क्षमं मेने ५ रुद्रा-

ततोतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घनरुक्त्रिसूर्यदृक्॥ करालदंष्ट्रो ज्वलदग्निमूर्द्धजः कपालमाली विविधो-
द्यतायुधः॥ ३॥ तं किं करोमीति गृणंतमाह बद्धांजलिं भगवान्भूतनाथः॥ दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांश-
को मे ४ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुं॥ मेने तदात्मानमसंगरंहसा महीयसां तात सहः सहिष्णुं
नदद्भिर्व्य ५ अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नैरवं॥ उद्यम्य शूलं जगदंतकांतकं संप्राद्रवद्घोषणभूषणांघ्रिः ६
अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुं॥ तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च
दध्युः ७ वाता न वांति न हि संति दस्यवः प्राचीनबर्हिर्जीवति होग्रदंडः॥ गावो न काल्यंत इदं कुतो रजो लोकोधुना किं प्र-
लयाय कल्पते ८

[illegible] ग दंतको मृत्युः तस्याप्यंतकं शूलं घोषयंति शब्दं कुर्वंतीति घोषणानि नूपु-
राणीति भूषणानि ययोः तावंघ्री यस्य सः ६ ककुभि दिशि स्थितमोऽन्न भवति किंतु रजः प्रतिज्ञात्वा कुः रज एतत्कुतो जातमिति दध्युः चिंतयामासुः ७
हे वत्तरा सं नरवेभ्यो त्रिलोकीति किं कल्पयंति वाता इति दस्यूनामभावे हेतुः प्राचीनबर्हिस्तदानीं तनो राजा जीवति न काल्यंते न पीड्यंते ८

ना० च० परस्तिरस्कृत्य पत्नीसा मिथ्यामुखायासांविपाकः फलं ॥ पश्यंतीनामितितस्याः दुःखाधिक्ये हेतुः ॥ अवरुद्धोऽम्बुदवातवान् ॥ अनागामनागा
२४ मतं ॥ नचेदंमुखावहमात्रं ॥ किंतुरुद्रवत्तानं ॥ अतोनास्यनष्टं नविष्यतीत्याह ॥ यस्त्विति द्वाभ्यां ॥ व्युत्तोविकीर्णोजटाकलापोयस्यस्थूलस्तम्भ
श्चांसौ अग्रेऽर्पिताः प्रोतादिग्गजेडायस्य ॥ दुदितान्युन्नमितानि ॥ अस्त्राणि येनतेदोषावाहवं ॥ एव ध्वज्ञात्तान्वितत्यहर्षेणनृत्यति ॥ उच्चैरट्ट
हासः कठोरोहास एवस्तनयित्नुगर्जितं तेनविन्नावि दीर्णोदिग्गोयेनसः ॥ १० ॥ अमर्षेयित्वाअहसेनयुक्तं क्लामन्यूक्तं क्रोधव्याप्त

परस्ति मिथ्या स्त्रियमुद्विग्नचित्ताकृच्छ्रविपाकोजनितस्यैषतस्य ॥ यत्पश्यंतीनांदुहितॄणांप्रजेशः सुतांसतीमवरुध्याम्बुना
गां ९ ॥ यस्त्वंतकालेव्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः वितत्यनृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयि
त्नुभिन्नदिक् ॥ १० ॥ अमर्षयित्वातममन्युतेजसंमन्युप्लुतंदुर्विषहंनकुर्यात् ॥ करालदंष्ट्राभिरुदस्तभागणांस्यात्स्वस्तिकिं
जने कोपयतोविधातुः ॥ ११ ॥ बह्वेवमुद्विग्नदृशोच्यमानेतैनदक्षस्यमुखंमहात्मनः ॥ उत्पेतुरुत्पाततमाः सहस्रशोभयावहा
हादिविनमोक्षपर्यङ्क ॥ १२ ॥ तावत्सरुद्रानुचरैर्मखोमहान्नानायुधैर्वामनकैरुदायुधैः पिङ्गैःपिशंगैर्मकरोदराननै
नैः ॥ पर्याद्रवद्भिर्विदुरान्वरुध्यत ॥ १३ ॥ केचिद्बभंजुः प्राग्वंशंपत्नीशालांतथापरे ॥ सद आग्नीध्रशालांचतद्विहारंम

दुरस्तविक्षिप्तोनगवतोनन्दत्रसंघोयेनपुनश्चसंकोपयतोविधातुरपिकिंस्वस्तिस्यान्नस्यादेवकान्यस्यकथा ॥ ११ ॥ उद्विग्नाश्चलिताद्दृक्यस्यडने
नवधूजनेनउच्यमानेसतिउत्पाततमामहोत्पाताउताः पर्यङ्कसर्वतश्च ॥ कथंभूतामहात्मनोपिदक्षस्यभयावहा ॥ १२ ॥ नानाप्रायु
धानियेषांवामनकैः ह्रस्वैः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्यवोदरमाननंचयेषांतैः परितोधावद्भिः अवरुद्धः ॥ १३ ॥ अ
वरुद्धः यथयज्ञ[illegible]शालायाः पूर्वंपश्चिमस्तंभयोः स्थर्पितंपूर्वपश्चिममायतंकाष्ठंप्राग्वंशः ॥ तंयज्ञशालायाःपश्चिमतः पत्नीशालायज्ञ
शालायाः [redacted] ःपुरतोहविर्धानं ॥ तस्योत्तरतआग्नीध्रशालातद्विहारंयजमानगृहंमहानसंपाकशालेतनपालो ॥ १४ ॥ २४

रुरुजुः बभंजुः उत्तरवेद्या मेखलास्तिस्रः सूत्राणि ॥१५॥१७॥ ग्रावभिर्विद्यमाना अनेकधा नेकधा दुद्रुवुः ॥१८॥ स्कंधो हस्ते यस्य स भवो वीरभद्रः लु
लुंचे उत्पाटितवान् ॥१९॥ उज्जहार उद्धृतवान् सदस्थः सन् शपंतं पितृवन्निंदां कुर्वंतं दक्षं स्वनेत्रसंज्ञया चेतनाक्षेपेण प्रेरितवान् ॥२०॥ कलिंग
देशाधिपस्य अनिरुद्धविवाहे बलभद्रो यथा दंतान्पातितवान् ॥ गरिमणि गुरुतरे रुद्रे शप्यमाने ॥ दतः दंतान् दर्शयन् योऽहसत् ॥ परुषोति
तिपाठे द्विवचनमेवं ज्ञायते तस्मान्तुर्नवतीयत्र तत्सहितस्यापि परुषेणेदं तपात प्राप्यर्थं संचितवान तथा हि परुषा अपि परुषनागोदंतकोहितं देवा—

रुरुजुर्यज्ञपात्राणि तथैके ग्नीननाशयन् ॥ कुंडेष्वमूत्रयन्केचिद्विभिदुर्वेदिमेखलाः ॥१५॥ अबाधंत मुनीनन्ये एके प
त्नीरतर्जयन् ॥ अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान् ॥१६॥ भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिं ॥ चंडीशः
पूषणं देवं भगं नंदीश्वरोऽग्रहीत् ॥१७॥ सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः तैरर्द्यमानाः ॥ सुभृशं ग्रावभिर्नैकधा
द्रवन् ॥१८॥ जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः ॥ भृगोर्लुलुंचे सदसि योऽहसत् श्मश्रु दर्शयन् ॥१९॥ भगस्य
नेत्रे भगवान्पातितस्य रुषा भुवि ॥ उज्जहार सदस्थोऽक्ष्णा यः शपंतमसूसुचत् ॥२०॥ पूष्णो ह्यपातयद्दंतान्कालिंगा
स्य यथा बलः ॥ शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः ॥२१॥ आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिंदन्न
पि तदुद्धर्तुं नाशक्नोत्त्र्यंबकस्तदा ॥२२॥ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुप
तिश्चिरं ॥२३॥

अनुवृत्तिर्विहितस्य पोषणस्य द्विदैवत्या नाकात ॥ तत्र तस्य दंतानसंतीति वक्तव्यं स्यात ॥ न चैतत्संगच्छते तदल्पार्थं कातत्रापि तस्य दं
तपातो अवस्थान्तरे प्रवर्तते न द्विवचनेन ज्ञाप्यते ॥ अतएव परूष्णोऽनुग्रहं हि धावक्ष्यति ॥ पश्चात् यजमानस्य दद्भिर्भक्षयतु पिष्टभुगिति
॥ केवलस्यैव तु पिष्टभुक्तं न विष्यति ॥ अन्यसहितस्यैव तु यजमानस्य दद्भिर्भक्षयिष्यतीत्यर्थः ॥ छिंदन्नपीत्यत्रापि रक्षसुपरिवाज्ञीनवि
ष्यति त्र्यंबको वीरभद्रः ॥२२॥ शस्त्रास्त्रान्वितैर्मंत्ररहितैः नानिर्भिन्नत्वक पशुस्तथा न तं छिंदेति भावः ॥२३॥

सयजमानांपतिः मखेसंज्ञापनंयोजकंतन्निष्पीडनादिरूपंमरणोपायंदृष्ट्वातेनोपायेनाहरत् २४ अन्येषांबुध्यणादीनांतद्विपर्ययः
असाधुवादः अनुदितिपोषः २५ गुह्यकालयंकैलासं २६ इति चतुर्थे पंचमो ऽध्यायः ५ षष्ठेतुदेवसंघेनसहगत्वाजनवंविधिः सांत्वया
मासदक्षेस्तात्दिग्जीवितायूर्धमाहरात् १ अथदेवगणास्त्वयंभुवेतिवेदयन्नितिद्वितीयेनान्वयः शूलादिभिः संछिन्नानित्रुटितानिभिन्ना

दृष्ट्वासंज्ञापनंयोगंपशूनांसपतिर्मखे यजमानपशोःकस्यकायात्तेनाहरच्छिरः २४ साधुवादस्तदातेषांकर्मतत्त
स्यसंपश्यतां नतच्चैतविप्राणांनामन्येषांतद्विपर्ययः २५ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः तद्देवयजनं
दग्ध्वाप्रातिष्ठद्गुह्यकालयं २६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेदक्षयज्ञविध्वंसनोनामपंचमो
ध्यायः ५ मैत्रेयउवाच अथदेवगणाःसर्वेरुद्रानीकैःपराजिताः शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः
१ संछिन्नभिन्नसर्वांगाःसर्त्विक्सभ्याभयाकुलाः स्वयंभुवेनमस्कृत्यकार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्यपुरैवैत
द्भगवानब्जसंभवः नारायणश्चविश्वात्मानकस्याध्वरमीयतुः ३ तदाकर्ण्यविभुःप्राहतेजीयसिकृतागसि
क्षेमायतत्रसाभूयान्नप्रायेणबुभूषतां ४ अथापियूयंकृतकिल्बिषाभवंयेबर्हिषोभागभाजंपरादुः प्रसा
दयध्वंपरिशुद्धचेतसाक्षिप्रप्रसादंगृहीतांघ्रिपद्मं ५

त्रिविष्टीर्णात्यंगानियेषांसहऋत्विग्भिःसभ्यैश्चवर्त्तमाना २ कस्यचित्तस्यनेयतुर्नजग्मतुः ३ विभुर्ब्रह्मातेजीयसिअतितेजस्विनिपु
रुषेकृतागसिसतिसत्यपिचयंतत्रकृतागसांबुभूषतांअपराधंकर्तुमिच्छतांमातथाबुभूषतांतेषांक्षेमायननभूयात् प्रायेणेतिलोको
क्तिंनतुवेदेष्वेत्यर्थः अथापिप्रसादयध्वंक्षमापयतयेनयूयंततः बर्हिषोयज्ञस्यभागभाजंपरादुःदूराद्वर्जितवंत अगृही
तांघ्रिपद्मंपादौप्रगृह्येत्यर्थः ५

अध्वरस्य जीवितं पुनः संधानं प्रार्थयमानाः संतः यस्मिन् कुपिते सति सपालो लोकः न वेत्तन प्रपेदिरे सर्वे ६ वयं तु तत्र गंतुं किंन्निमः ल
व मेवं कं विदुपायं विधत्स्वेति चेत् अत आह नेति यद्यस्तदानीं तद् इंद्रः यस्य तत्त्वं वलवीर्ययोः प्रमाणमियत्तां च न विदुः वीर्यं पराक्रमः पायमिति
वाडेः अपराधं ७ ८ कैलासं वर्णयति जन्मौषधीत्यादि चतुर्दशभिः नरेतरैः देवैर्जुष्टं ९ शृंगैरमणं रतिप्रदमित्युत्तरेणान्वयः कथं
नैतैर्नानाधातुभिर्विचित्रितैर्नानाद्रुमलतागुल्मा येषु नानामलानि प्रस्रवणानि येषु नानाकंदरासानवश्च येषु रमणैः सह क्रीडयंती

आपाणानां जीवितमध्वरस्य लोकः सपालः कुपितेन यस्मिन् तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः
६ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं विदुः प्रमाणं वलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं विधित्से
त् ७ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं
प्रियं प्रभोः ८ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः जुष्टं किंनरगंधर्वैरप्सरोभिर्वृतं सदा ९ नानामणिमयैः
शृंगैर्नानाधातुविचित्रितैः नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः नानामलप्रस्रवणैर्नानाकंदरसानुभिः र
मणं विहरंतीनां रमणैः सिद्धयोषितां ११ मयूरकेकाभिरुतं मदांधालिविमूर्छितं प्लावितै रक्तकंठानां कूजितैश्च
पतत्रिणां १२ आह्वयंतमिवोद्धस्तैर्द्विजान् कामदुघैर्द्रुमैः व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः १३

नां ११ मयूराणां केकाभिः स्वनैर्नादितं मदांधैरलिभिर्विमूर्छितं मूर्छना रागगतिविशेषः तद्युक्तं संस्कृतं रक्तकंठानां कोकिलानां
प्लावितैः प्लुतलक्षणैः स्वरैः अन्येषां पतत्रिणां च कूजितैः १२ उद्धस्तैः उन्नतशाखैः द्रुमैर्द्विजान्पक्षिणः आह्वयंतमिव लोके हि
हस्तमुन्नमय्योच्चैः स्वरेणाह्वानमर्थिनां कुर्वंति अद्रिश्चोद्धस्तैः सह स्तोकैरिंद्रुमैस्तत्पक्षिस्वनैश्च तथा लक्ष्यत इत्यर्थः व्रजंतमि
मातंगैर्गजैर्व्रजंतमिवाद्रिं निर्झरध्वनिभिर्गृणंतं स्तुवमाणमिव १३

च्युता मृयोरवांतरजातिभेदः वेणकीचकयोश्च नीरंध्रत्वेन भेदः १५ वेणकजातिभिरित्यत्र वेणकाएव लाजातिमालती १६ ॥ १७ द्रुमजातिभि
रित्यत्र जातिरवांतरभेदः सामान्यं १८ कुमुदादिसमृद्धिर्निहेतुभिन्नलिनीसुसरः मुकलमधुरं यथा नवत्वेवं कुड्मलितियानिपद्मानिलैरुपचो
चितं यगादिभिर्निर्भिद्दिरिक्षंनिवेष्टितं १९ नाभिः कस्तूरीमृगः पर्वंमृगगणाः शृंगाविशेषणलेनोक्तः ॥ इदानीं स्वातंत्र्येणोपलक्षितं कदली

मंदारैः पारिजातैश्च पाटलैश्चोपशोभितं ॥ तमालैस्तालतालैश्च कोविदारासनार्जुनैः ॥ १४ ॥ चूतैः कदंबनीपैश्च नाग
पुन्नागचंपकैः ॥ पाटलाशोकबकुलैः कुंदैः कुरबकैरपि ॥ १५ ॥ स्वर्णार्णपातपत्रैश्च वरवेणकजातिभिः ॥ १५ ॥ कुब्ज
कैर्मल्लिकाभिश्च माधवीभिः समंडितं ॥ १६ ॥ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥ १७ ॥ खर्जूरैराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः ॥
राजपूगैश्च जंबुभिः ॥ १६ ॥ खर्जूरैराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः द्रुमजातिभिरन्यैश्च राजितं वेणकीचा
कैः ॥ १७ ॥ कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः ॥ नलिनीषु कलं कूजन् खगवृंदोपशोभितं ॥ १८ ॥ मृगैः शाखामृ
गैः क्रोडैः मृगेंद्रैरृक्षशल्यकैः ॥ गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः ॥ २० ॥ कदलीखंडसंरुद्धनलिनीपुलिनश्रि
यं ॥ पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया ॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः ॥ २१ ॥ ददृशुस्तत्र ते रम्या
मलकां नाम वै पुरीं ॥ वनं सौगंधिकं चापि यत्र तन्नाम पंकजं ॥ २२ ॥ नंदा चालकनंदा च सरितौ बाह्यतः पुरः ॥ तीर्थपादप
दांभोजरजसातीव पावने ॥ २३ ॥ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः ॥ क्रीडंति पुंसः सिंचंत्यो विगाह्य रतिकर्षिताः ॥ २४ ॥

खंडैः संरुद्धानि च्छन्नानि यानि नलिनीनां पुलिनानि तैः श्रीः शोभा यस्मिन् २० नंदया गंगया पर्यस्तं परिवेष्टितं सत्याः सत्याः स्नानेन पुण्यतर
मति सुगंधमुदकं यस्यां २१ तत्र गिरौ वनं च ददृशुः यत्र वने तन्नाम सौगंधिकं पंकजं भवति जातावेकवचनं २२ पुरीं वर्णयति नंदा
चेति चतुर्भिः सरितौ पुराद्बाह्यतो भवतः तीर्थपादस्य हरेः पादांभोजरजसा २३ ययोर्विगाह्य प्रविश्य क्रीडंति ॥ २४ ॥ १६

ग

पयोरंगो विगतत्वचोपि गात्राः पिबंति तत्र हेतुः तासां सुरस्त्रीणां स्नानेन स्रस्तं गलितं यन्नवकुंकुमं तेन पिंजरं पीतवर्णं गात्री कारिणीः
२५ तारं रूप्यं तारादिमयविमानानां पातैः संकुलं तडिद्भिः स्त्रीणां घंटैर्विमानानां रवेन पुर्यः साह्यपयं ॥२६॥ यक्षेश्वरपुरीं हित्वा त्यति
क्रम्य तद्वनं वंदं धूर्जटिदेवा आरात् तद्राद्ददृशुरिति चतुर्थेनान्वयः ॥ कथं न तं वनं चित्राणि माल्यानि फलानि छदा यस्य येषु तेषु सुम
स्पृष्टं सुखकरं ॥२७॥ रक्तकंठखगानामनीकस्य स्वरैर्मंडिताः षट्पदस्वरा यस्मिन् ॥ कलहंसानां कुलस्य प्रेष्ठ खरदंडानि पद्मानि

पयोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं ॥ वितृषोपि पिबंत्यंभः पाययंतो गजा गजीः ॥२६॥ तारहेममहारत्नविमानशतसं
कुलं जुष्टं पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनं ॥२६॥ हित्वा यक्षेश्वरपुरीं वनं सौगंधिकं च यत् ॥ द्रुमैः कामदुघैर्हृद्यं
ले चित्रमाल्यफलच्छदैः ॥२७॥ रक्तकंठखगानीकस्वरमंडितषट्पदं कलहंसकुलप्रेष्ठं खरदंडजलाशयं ॥२७॥ वन
कुंजरसंघृष्टहरिचंदनवायुना ॥ अधि पुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ॥२६॥ वैडूर्यकृतसोपाना वाप्युत्पलमा
लिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटं ॥३०॥ स योजनशतोत्सेधः पादोनविटपायतः ॥ पर्यक्कृताचल
छायो निर्नीडस्तापवर्जितः ॥३१॥ तस्मिन् महायोगमये मुमुक्षुशरणे सुराः ॥ ददृशुः शिवमासीनं त्यक्तामर्षमि
वांतकं ॥३२॥ सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहं ॥ उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां ॥३३॥

तैर्युक्ता जलाशया यस्मिन् ॥२८॥ वनकुंजरैः संघृष्टा ये हरिचंदनद्रुमाः तत्संबंधिना वायुना पुण्यजनस्त्रीणां मनः ॥ अधि अधिकमुन्मथ
यत ॥२९॥ यत्र च उत्पलमालिन्यो वाप्यस्तत्पुरुषैः आसंवनदृष्टः ॥ पाठांतरे किंपुरुषैः आसां वापीनां द्रष्ट्वेत्यर्थः ॥३०॥ योजनशतमु
त्सेधः उत्सायो यस्य पादपस्य ॥ सर्वतः पंचसप्ततियोजनप्रमाणो विटपैः शाखा विस्तारा यतो विस्मृतः ॥ पर्यंकसर्वतः ॥ कृता चलाछायायेन

भा० च०
१७

निर्गतंतीतुंयस्मात् ३१ मुमुक्षूणांशरणेआस्थवेत्यक्तामर्षंतकस्तत्तुल्यं ३२ तंविशिनष्टिसनंदनाद्यैरितिपंचभिः सख्याकुवेरेणोपास्य
मानं ३३ विद्यातपयासनातपश्चित्तैकाग्र्यंयोगःसमाधिस्तेषांपंथानंप्रवर्त्तनद्वारालोकस्यमंगलंसहितं तपोवात्सल्यात्स्नेहाद्वाचरं
तं ३४ संध्याभ्रवद्रुचावाक्क्ववर्णेनांगरागेनतस्मादिलिंगंचंद्रलेखांचविभ्रतं ३५ ब्रतीनस्यासनंवृसीतस्यांब्रह्मप्रवोचंतं ३६ सव्य
स्व्यंपादपद्मंदक्षिणेऊरौकृत्वाविन्यस्यजानुनिच सव्यंवाहुंकृत्वादक्षिणंवाहुंप्रकोष्ठेमणिवंधस्थानेऽक्षमालांकृत्वाह

विद्यातपोयोगपथमास्थितंतमधीश्वरं चरंतंविश्वसुहृदंवात्सल्याल्लोकमंगलं ३४ लिंगंचातापसाभीष्टंभ
स्मदंडजटाजिनं अंगेनसंध्याभ्ररुचाचंद्रलेखांचविभ्रतं ३५ उपविष्टंदर्भमय्यांवृस्यांब्रह्मसनातनं नारदायप्र
वोचंतंपृच्छतेशृण्वतांसतां ३६ कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि वाहुंप्रकोष्ठेक्षमालामासीनंत
र्कमुद्रया ३७ तंब्रह्मनिर्वाणसमाधिमाश्रितंव्युपाश्रितंगिरिशंयोगकक्षां सलोकपालामुनयोमनूनामा
द्यंमनुंप्रांजलयःप्रणेमुः ३८ सतूपलभ्यागतमात्मयोनिंसुरासुरेशैरभिवंदितांघ्रिः उत्थायचक्रेशिरसाभि
वंदनमर्हत्तमःकस्ययथैवविष्णुः ३९ तथापरेसिद्धगणामहर्षिभिर्येवैसमंतादनुनीललोहितं नम
स्कृतःप्राहशशांकशेखरंकृतप्रणामंप्रहसन्निवात्मभूः ४०

दक्षिणहस्तेनकृतयातर्कमुद्रयाउपलक्षितमासीनमित्यर्थः तदुक्तंयोगपट्टे एकपादमथैकस्मिन्विन्यस्योरुसंस्थितं इतरस्मिंस्त
थावाहुंवीरासनमिदंस्मृतं तर्कमुद्राचोक्ता तर्जन्यंगुष्ठयोरग्रेमिथःमिथःसंयोज्यचांगुलीः प्रसार्यवंधनंप्राहुस्तर्कमुद्रेतिमांत्रि
काइति ३७ ब्रह्मनिर्वाणंब्रह्मानंदःततःसमाधिरैकाग्र्यमाश्रितंयोगकक्षांयोगपट्टंचवामजानुदृढीकरणार्थंविशेषेणाश्रि
श्रितवंतं मननशीलानांमनवस्तेषामाद्यंमनुंस्वं ३८ अर्हत्तमोविष्णुर्वामनमूर्त्तिर्यथाकश्यपस्ययथामरीचिभिःसहिताः येनीललोहि
तमनुवर्त्ततेपितस्मैवंदनंचक्रुः एवंसर्वेन ४०

१७

त

तथापि त्वं तीव्रवन्मां नमस्करोषि तथापि वेश्वर्यमहं वेद्मीत्याह ॥ ज्ञानमिति विश्वस्य पांज्ञाने । तत्र हेतुः जगतो योनिर्यथात्वं प्रकृ
तिर्बीजं च शिवः पुरुषः । तयोः कारणं तथापि निर्मलं रूपं शुद्धं निर्विकारं तदेव त्वमिति ज्ञाने ॥१॥ ननु विरुद्धमेतत् तत्राह त्वमेव सरू
पयोर विसक्तयोः ॥ शिवशाक्तयोः क्रीडनं विश्वस्य सृष्ट्यादिकरोषि क्रूपेणाभिरिव सत्त्वरूपयोरिति पाठे स्वांशायोऽमुतो न विरोधः ॥२॥
धर्ममर्यादेति यावत्रयी तस्याश्च निपतये रक्षणाय धारसि भवानसि ॥ यद्वा हे धर्मार्थेदुग्धधर्मादि निपतये लज्जयते सेतुना सत्त्रेण निमितेन से
तवो वर्णाश्रममर्यादा श्रश्व सिताः ॥ निवद्धा निर्णीता प्रतिवाक्श्रद्दधते श्रेयः श्रनुतिष्ठंति ॥३॥ सर्वकर्मफलदाता पि त्वमेवेत्याह हे मंगल मा

त्वं जैमा ॥ ज्ञाने त्वामीशं विश्वस्य जगतो योनिबीजयो ॥ प्रकृतेः शिवस्य च परं यत ब्रह्मनिरंतरं ॥१॥ त्वमेव सगुणेत तत् क्री
डया ज्ञयोः ॥ स्वरूपयोः विभ्रंस जसि पासस्त्वं सिकी उतलीपटोयथा ॥२॥ त्वमेव धर्मार्थे दुधानि पतये सेतुना सत्त्रेण
ससर्जिथा ध्वरं ॥ त्वयैव लोके वसितास्त्वसे तवोपानतृषणां श्रद्दधते धतव्रताः ॥३॥ त्वं कर्मणां मंगल मंगलानां
कर्त्तुः स्वलोकं तनुषे स्वःपरं वा ॥ अमंगलानां च तमिस्रमुल्वणं विपर्ययः ॥ केन तदेव कस्यचित् ॥४॥ नवै सतां त्व
च्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ॥ भूतानि चात्मन्यपृथक्दिदृक्षतां प्रायेण रोषोऽभिभवेत् यथा पशुः ॥ ५

गलानां शुभानां कर्मणां कर्त्तुः । स्वर्गपरं मोक्षं वा तनुषे ॥ अमंगलानां अशुभानां कर्मणां कर्त्तुः तमिस्रं नरकं तनुषे ॥ तत्र केन हेतुना तदेवा
तस्मिन्नेव कस्यचिद्विपर्ययो भवति ॥४॥ त्वत्कोपो ऽत्र हेतुरित्यसंभावितमिति केमुत न्यायेनाह ॥ नवै सतां सतः रोषोऽभिभवेत् ॥ तव त्वां द्वितीया
पैव श्यो ॥ पशु अज्ञं यथा भिभवति तद्वत ॥५॥

अतः ये पृथग्धियः भेददृशः अतः कर्म्मण्येव दृष्टिर्येषां दुराशयाः आशयो येषां ॥ परेषामुदयेन संपदा अर्पिता हृदि रुक् येषां अरुंतुदा मर्म्मभेत्तारः दैवेने-
व वधो येषां तान् भवद्विधः निरुपमः साधुः मावधीत् न हन्यात् ४६ ॥ यस्मात् साधूनां उत्तमालोकयानुग्रहमेव कर्त्तुमर्हसीत्याह द्वाभ्यां ॥ यस्मिन्देशे
यदा काले स्पृष्टधियो मोहं चिताः पृथग्दृशो भवंति ॥ तत्राप्यपराधे साधवो हि अनुकंपया अंतरमेव परं दुःखासहिष्णुतया चित्तप्रकंपेन सुकृपां कुर्वंति
न

पृथग्दृशः कर्म्मदृशो दुराशयाः ॥ परोदयेनार्पितहृद्रुजोनिशं ॥ परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्देववधान्भवद्विधः ४६ ॥
यस्मिन्यदा पुष्करनाभमायया दुरंतयास्पृष्टधियः ॥ पृथग्दृशः कुर्वंति तत्र ह्यनुकंपया व बलात्कृतेक्रमं ४७ ॥ भवांस्तु पुंसः
परमस्य मायया दुरंतयास्पृष्टमतिः समस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो ४८ ॥ कुर्वध्वरस्योद्धर-
णं हतस्य भोत्वयासमाप्तस्य मनो प्रजापतेः ॥ न यत्र भागं तव भागिनो ददुः कुयज्विनो येन मखो निनीयते ४९ ॥ जीवताद्यजमा-
नोयं प्रपद्येताक्षिणी भगः ॥ भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् ५० ॥ देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः
भवतानुगृहीतानामाशु मन्योस्त्वनातुरं ॥ ५१ ॥

कृपां न सा
धवो दै

न तत्क्रमं परात्क्रमं कुतः दैवबलेन कृतेर्थे ममैवं दैवमेवं न तं कोप्यापराधस्तेषामिति मलात्तं न तु कुर्वंत इत्यर्थः ॥ भवांस्तु अस्पृष्टमतिः अतः स
स्प मस्तदृक् सर्वज्ञः ॥ तया मायया हत आत्मा येषां तेषु ॥ अत एव कर्म्मानुगतचित्तेषु ह्यपराधे नु ग्रहं कर्त्तुमर्हसि ४८ ॥ एवं सामान्यतो का प्रस्तुतमाह
कुर्विति त्रिभिः ॥ त्वया हतस्य अत एवासमाप्तस्य प्रजापतेरध्वरस्य हे ॥ मन्यो यत्राध्वरे कुयाज्ञिकाः भागिनोपि भागं न ददु ॥ भागहेतुमाह ॥ येन त्वया
मखो निनीयते फलं प्राप्यते ४९ हे मन्यो अनातुरमारोग्यमस्तु ॥

नागश्च तवास्तित्याह ॥ एषड इति ॥ हे रुद्र यावदिदं त्वया यदित्यमयं ॥ यज्ञे कृते याव दनुच्छिष्टः । अवपिशेषः तावानेष तव भागोस्तु ॥ हे रुद्र
तेन भागेनायं यज्ञः कल्प्यतां संपद्यतां ॥ ५२ ॥ इति चतुर्थे षष्ठोध्याय ॥ ६ ॥ सप्तमे विघ्नरुद्रः स्तुतो दक्षाय न वादिभिः ॥ यज्ञं प्रवर्तयामास द्रैरैते
ति निरूते ॥ १ ॥ अजेनेत्यो अनुनीतः प्रार्थितो भवमेणा निहित ॥ हे महाबाहो विदुर ॥ १ ॥ अघमपराधं ॥ २ ॥ स्वापराधमपह्नुत्यनुगृह्णाति ॥ दग्धं
शीर्षं यस्य तस्य प्रजापतेः ॥ अजस्य मुखं यस्मिन् तत्तथा भूतं शिरोस्तु ॥ बर्हिषसंबंधिनं भागं मित्रनामो देवस्य ॥ ३ ॥ यज्ञकर्मणा कृतानि

एषते रुद्र भागो यदुच्छिष्टोऽध्वरस्य वै ॥ यज्ञस्ते रुद्र भागेन कल्प्यतामद्य यज्ञहन् ॥ ५२ ॥ इति श्रीभागवते महापु
राणे चतुर्थस्कंधे रुद्रसांत्वनं नाम षष्ठोध्यायः ॥ ६ ॥ मैत्रेय उवाच ॥ इत्यजेनानुनीतेन भवेन परितुष्य
ता ॥ अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ॥ १ ॥ श्रीमहादेव उवाच ॥ नाघं प्रजेश बालानां वर्णये नानुचिंतये । दे
वमायाभिभूतानां दंडस्तत्र धृतो मया ॥ २ ॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः ॥ मित्रस्य चक्षुषेक्षेत भागं स्वं बर्
हिषो भगः ॥ ३ ॥ पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् ॥ देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ॥ ४ ॥ बाहुभ्यामश्
श्विनोः पूष्णो हस्ताभ्यां कृतबाहवः ॥ भवंत्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ॥ ५ ॥ मैत्रेय उवाच ॥ तदा सर्वा
णि भूतानि श्रुत्वा मीढुष्टमोदितं ॥ परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ॥ ६ ॥ ततो मीढ्वांसमामंत्र्य शुना
सीराः सहर्षिभिः ॥ भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥ ७ ॥

लिंग लिंगानि सर्वांगाणि येषां ते भवंतु उच्छेषणं यज्ञभागं प्रिय ॥ ४ ॥ येषां त्वंगानि विनष्टानि ते तु अश्विनोर्बाहुभ्यां कृतबाहवः । पूष्णो
हस्ताभ्यां कृतहस्ताश्च भवंतु । अध्वर्यवः । अन्ये च ऋत्विजः । बस्तस्य पशोः श्मश्रूणि एव श्मश्रूणि यस्य ॥ ५ ॥ मीढुष्टमः शिवः तेनोक्तं परितुष्टे
८ श्चित्ते ॥ ६ ॥ मीढ्वांसं शिवं त्वयाऽगंतव्यं सर्वकार्ये इत्यामंत्र्य संप्रार्थ्य शुनासीराः देवाः सह मीढुषा वेधसा च वर्तमानाः समीढ्वद्वेधसः ॥ ७ ॥

भा० द० कार्त्स्न्येन वक्त्रकादिसाधरः एवं विधाय सर्वं वत्सवत्सपरूपेण कलिलः॥ कलुषीकृत। आत्मा यस्य सः तदा पारतः कालीनो चंद्र इवामलो नव त
२९ १० ११॥ यद्यपि पद्मयोनिर्विप्रलब्धः परान्नस्तो न नवान् तथापि त्वया दंडो न ततः पीडाकृता न युक्तेति तोषमि॥ पुत्तमनेवैतदित्याह॥ ब्रह्मन्त्वं धु
पु अहंमानावेष्टयितुं नत्वत्वहरेश्चेति वायुवयोरवज्ञानुपेक्षा नास्ति॥ १२॥ तत्र हेतुमाह विद्येति॥ ब्रह्मन्नत्वा त्वमस्माकं अस्माकमीः।

विधाय कार्त्स्न्येन च तद्गृहान् हरिर्गावान् तनुवः संदधुः कस्य काये न सवनीयपशोः पिरः॥ ८॥ संधीयमाने पितरसिद
हो कज्ञानिवीक्षितः सद्यः सुप्तश्चोतस्योदृद्दशो वा ग्रत्तोमदं॥ ९॥ तदा वत्सवत्सरूपकलिलात्मा प्रजापतिः पि
वा वल्लोकाद नवकोरचंद्र इवामल॥ १०॥ न वत्स वापकृतधीर्नीभाक्को रनुरागतः॥ औल्कं ररा द्वाघ्यकलया संपरे
तां सुतां स्मरन्॥ ११॥ कृच्छ्रात्संस्तन्य च मनः प्रेमविक्लवितः सुधीः॥ पापौ निर्व्यलीकेन नावेन प्रापजापतिः॥ १२॥ व स
तुवाच॥ नस्यान्न नुग्रहः अहो न वता कृतो मे दंड त्वया मयि नितोयदविप्रलब्धः॥ न ब्रह्मबंधुषु च वां नगाव नु
व ज्ञातुं त्वं हरे स्वकृत एव धतवृतेषु॥ १३॥ विद्यातपोव्रतधरान मुखतः स्म विप्रान्॥ ब्रह्मात्मतत्त्वमवितुं प्रथमं
त्वमस्माक॥ तद्ब्राह्मणान्परमसर्वविपत्सु पासि [illegible] पम्म निवृत्तितो प्रगरहीसदंडः॥ १४॥ योसो मयाविदितत
त्वदृशा सनायां हि सोदुरन्ति विप्रियैरगण्यतन्मां॥ अर्वाक्प्रये तं तमर्हतमनिंदयापात दृश्या ईयासनग
वान सुकृतेन तुष्येत॥ १५॥

किमर्थं मात्मतत्त्वमवितुं यद्वा ब्रह्मवेदं॥ आत्मतत्त्वं च अवितुं संप्रदायप्रवर्तनेन ज्ञापयितुमित्यर्थः। ततस्मात् हे परम इतकृ यः॥ १४॥
अन्यच्च प्रसुपकारेनास्तीत्याह॥ योसाविति॥ अविदितत्वदृशा। अप्राप्ततत्त्वज्ञानेन तद्विगाण्यां विस्मत्यत्यहंतमस्य निंदया अर्वागध
म पतंतं मां मा पात रक्षितवान्॥ स्वकृतेनैव परानुगृहेणैव तुष्येत्। न मयाऽकृतिकर्तुं पांक्यमित्यर्थः॥ १५॥ २९

पृ

अनुमंत्रितोऽनुज्ञातः उपाध्यायसहितैः ऋत्विगादिभिः अनुवर्तयामास १६ वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये निर्वर्त्य १७
उपात्तहविषा अध्वर्युणा सह विशुद्धया बुद्ध्या दध्यौ हे विशांपते विदुर १८ स्वया प्रभया तेषां तेजो मुष्णन् तिरस्कुर्वन् उपानीतः समी
पं प्रापितः स्तोत्रे बृहद्रथंतरे वाजौ पक्षौ यस्य तेन बृहद्रथंतरे पक्षाववतिष्ठते १९ तमेवानुवर्णयति श्याम इति हिरण्यवर्ण
रसनायस्येति वस्त्रं लक्ष्यते अर्कतुल्येन किरीटेन जुष्टः नीलालका एव भ्रमरास्तैर्मंडितं कुंडलमास्यं यस्य कंबादिभिरायुधैः व्यग्रैः

श्री मैत्रेय उवाच क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमंत्रितः कर्म संतानयामास सोपाध्यायर्त्विगादिभिः १६ वै
ष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः पुरोडाशं निरवपन् वीरसंसर्गशुद्धये १७ अध्वर्युणात्तहविषा यजमानो वि
शांपते धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः १८ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश मुष्णंस्तेज उपानी
तस्तार्क्ष्येण स्तोत्रवाजिना १९ श्यामो हिरण्यरसनोऽर्ककिरीटजुष्टो नीलालकभ्रममंडितकुंडलास्यः कंबब्जचक्र
शरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः २० वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोक
कलया रमयंश्च विश्वं पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः २१ तमुपागतमा
लक्ष्य सर्वे सुरगणादयः प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः २२ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः
मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजं २३

रत्नार्के भुजैर्हिरण्मयैर्नृवृंदैः पुष्पितः कर्णिकार इव शोभमानः नुद्रांहिरण्मयत्वं केयूरकंकणमुद्रिकाद्यलंकारैः २० वक्षसि अधिश्रि
ता वधूर्लक्ष्मीर्यस्य सः उदारो हासो अवलोकश्च तयोः कलया लेशेन पार्श्वे उभयतो भ्रमती व्यजनचामरे चामरव्यजनेन वरा राजहंसो य
स्मिन् सः रज्यमानः शोभातिशयं नीयमानः २१ ब्रह्मेंद्रत्र्यक्षा नायका मुख्या येषां ते २२ हतरुचः तिरस्कृतप्रभाः सन्नजिह्वा गद्
गदवाचः साध्वसान्महिमानुचरितचित्ताः उपतस्थुस्तुष्टुवुः २३

भा० च० तस्य महि महिमानं प्रति तत्त्वं अर्वागेव वृत्तिर्येषां ते ऽपि यथामति गृणंति स्म अस्तुवन् ॥ कृतः प्रकटीकृतो नुग्रहार्थं विग्रहो येन तं । यद्वा ते ब्रह्मा-
२० र्वागवृत्तित्वे हेतुः तेतु महिम्नि मायया विभूतिमात्ररूपा इत्यर्थः ॥२४॥ तत्र तावद्दक्षस्तुतिप्रकारमाह ॥ दक्ष इति । दक्ष इति ॥ गृहीतकमर्हणं सा-
दनोत्तमं येन तं ॥ उत्तमे पात्रे आगते आसाद्य ऽर्हणं सुसमर्पितं प्रीत्या साऽर्हणा यत्र मेव येन गृहीतमित्यर्थः ॥ यद्वा कथं प्रपेदे ॥ गृहीतमर्ह-
णसादनोत्तमं यथा भवति तथा । तद्गृहीत्वा प्रपेदे इत्यर्थः ॥ गृहीतेति पाठस्तु सुगमः । गृणन् स्तुवन् ॥ प्रपेदे शरणं जगाम । दक्षत्विक्सद-
स्यान्गुरुत्वेनोपेक्षितः ॥ रुद्र एष यस्तु तथा सिद्धाय चंडमानी च लोकपालः ॥ योगि ब्रह्मा गिरिदेवाभ्यस्तुवंति इत्यादौ श्लोकं तथा गंधर्वा
विद्याधरब्राह्मणाश्च पृथक् स्तुवते ॥२५॥ ननु साक्षात्परमेश्वर एव कद्रुः । तस्य ब्रह्म[illegible]पुत्रत्वेन जीवत्वमनुकरमात्रं ॥ हे तत हि मिति त्वयान्ने
दद्दृश्य ऽसौ तत्त्वज्ञात इति मां भगवान् ॥ आच्छे पश्यतीत्याशंक्याह स्तुतस्य रूपस्य डीव धर्मेणाद्यं तवैव संगच्छते नान्यस्येत्याह शुद्धमि-

अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः ॥ यथामति गृणंति स्म कृतानुग्रहविग्रहं ॥२४॥ दक्षो गृहीतार्हणसादनो-
त्तमं यज्ञेश्वरं विश्वसृजां परं गुरुं ॥ सुनंदनंदाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः कृतांजलिः ॥२५॥ दक्ष उवाच ॥ शुद्धं स्व-
ति धाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायां ॥ तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध-
इवात्मतंत्रः ॥२६॥

ति ॥ स्वधाम्नि स्वस्वरूपे तिष्ठन् भवान् शुद्धं चिन्मात्रं चैतन्यघनः ॥ शुद्धत्वे हेतुः उपरता नित्यनिवृत्ता अखिला बुद्ध्यवस्था य-
स्मात् । अतः एकं भेदशून्यं ॥ अत एव अभयं द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ ईदृशोपि वस्तुत एवं भूतत्वादेव लक्ष्मणपार्श्वमुक्तं मायां प्रतिषिध्य
अनिरूप्य स्वतंत्र एव सन् तया मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां [illegible]तिष्ठन् अपरिशुद्ध इव रागादिमानिवास्ते रामकृष्णादिवता-
रेतच्च प्रतीयते भवानित्यर्थः ॥ अन्येतु विद्योपाधयो मायायाभिभूतास्संसरंति अतस्त्वमेव स्वतंत्रो न तु ब्रह्मादयः इति भावः ॥ [illegible] स्तुत एवेमां ते- २०
द्दृषि भगवान् वारयिष्यति ॥ अहं ब्रह्मा च सर्वश्च जगतः । कारणं परमिति ॥२६॥

ऋत्विजो दक्षस्यापराधं परिहरंतः स्तुवंति ॥ नो अनंजन उपाधिमलरहित यद्यपि त्वमेव रुद्रादिदेवतारूपः तथापि नंदीश्वर शापात् कर्मण्येव
दुराग्रहधियः संतस्त्वत्तत्त्वं न विद्मः ॥ किंतु धर्मस्य सर्वस्योपलक्षणात्ततं त्रिवृत् त्रयीश्रुतिपाद्यमध्वराख्यं तत्त्वरूपमस्माभिर्ज्ञातं कीदृशं ॥ य
दर्थं यस्य सिद्धये अधिदैवतं देवताधिकारेण अदो व्यवस्था मर्त्यावस्थाः अत्र इमे वदेवता नान्ये त्येवस्तानियमाऽत्यर्थः ॥ यद्वाऽव्यवस्थाऽत्या
ख्यातं अडागमाद्यभाव आर्षः ॥ यदर्थं रुद्र हृदट ॥ रुद्राद्यधिदेवरूपं विपरोधेणास्थितवानसीत्यर्थः ॥ २७ ॥ सदस्यास्तु निरीश्वरेपि दक्षाध्वरे
धनलोभेन रूपत्वप्रतिमनुचिंत्यानुतप्ता विरक्तिमाशासाना स्तुवंति ॥ हे शरणद आश्रयप्रद ॥ उत्पत्य ध्वनि संसारमार्गे विदहमानोऽज्ञानां

ऋत्विज ऊचुः ॥ तत्वं न ते वयमनंजन रुद्रशापात् कर्मण्यवग्रहधियो भगवन् विदामः ॥ धर्मोपलक्षणमिदं त्रिवृद
ध्वराख्यं ज्ञातं यदर्थमधिदैवमदोव्यवस्थाः ॥ २७ ॥ सदस्या ऊचुः उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्याला
न्विष्टे विषयमृगतृष्ण्यात्मगेहोरुभारः ॥ द्वंद्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः ॥ पादौकस्ते शरणद
कदा याति कामोपसृष्टः ॥ २८ ॥ रुद्र उवाच ॥ तव वरद वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्
हणीये ॥ यदि रचितधियं माऽविद्यलोकोऽपविद्धं जपति न गणये तत्त्वत्पराऽनुग्रहेण ॥ २९ ॥

सार्थः समूहस्ते पादौकः त्वत्पादरूपं निवासं कदा यास्यति ॥ अशरणे विश्रामस्थानरहिते ॥ उरुक्लेशा एव दुर्गमस्थानानि यस्मिन् ॥ अं
तक एवोग्रव्यालस्तेनान्विष्टे लक्षीकृते विषयरूपा मृगतृष्णिका यस्मिन् ॥ आत्मा अहंकारास्पदं शरीरं ममत्वास्पदं गेहे च स एवोरुभारो य
स्य सः ॥ द्वंद्वानि सुखदुःखादीन्येव श्वभ्राणि गर्ता यस्मिन् ॥ खला एव मृगास्तेभ्यो भयं यस्मिन् ॥ शोक एव दावाग्निर्यस्मिन् कामे
नोपसृष्टः ॥ पीडितः ॥ २८ ॥ श्रीरुद्रस्तु पूर्वं ममनिंदाकुः सहासीत् इदानीं तु तां न गणयामीत्याह ॥ तवेति ॥ आशिषा कामेन अपक्षे
निष्कामैः रचितधियं अभिनिवेशितचित्तं अविद्याहीनो लोकः यदि अपविद्धं वदति ॥ आचार त्र संयत्पतिमा मांतत उत्पतंतवयः परो

भा० च० नुग्रहः । बहुपराणां वा यो नुग्रहस्तेन ॥२९॥ न गुणस्तु स्वभावतस्तत्त्वज्ञानहीना ऋषीवाः अतोऽज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह । यन्माययेति । आ
२१ त्मन्यात्मनि स्थितं अनुगातं तव तत्त्वं न विदंति ॥ प्रणतानामात्मबंधुस्व ॥३०॥ अस्मादयो न विदंतीति न गुणोक्ते तद्सहमानो ब्रह्मा तत्त्वज्ञानमाविकुर्व
न्निवाह ॥ नैतदिति पदार्थभेदग्राहकैरिंद्रियैः ॥ गुणस्येंद्रियस्य च यद्ज्ञानार्थयोः कारणस्य सत्वादे ॥३१॥ इंद्रस्तु इंद्रियविषयः सर्वोपि मि
थ्येति ॥ ब्रह्मणोक्तमसहमान आह ॥ इदं तव वपुरपि अध्यपन्नमेव ॥ न तु प्रपंचवदनिर्वचनीयतयाऽनुपपन्नं ॥ सुराणां विद्विषः क्षपयंतीति । तथा ते म

त्मा

नमुरुद्वा ॥ यन्मायया गहनयाऽपहृतात्मबोधाः ॥ ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः ॥ नात्मिश्रितं तव विदंत्यधुना
पि तत्त्वं सोयं प्रसीदतु भवान् प्रणतात्मबंधुः ॥३०॥ ब्रह्मोवाच ॥ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षे
त ॥ ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वं ॥३१॥ इंद्र उवाच ॥ इदमप्यच्युत विश्वभावनं व
पुरानंदकरं मनोदृशां ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ॥३२॥ पत्न्य उवाच यज्ञोयं तव यज
नाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् ॥ तं नस्त्वं शवशयनाभशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥३३॥

भुजदंडैरुपलक्षितं ॥३२॥ ऋत्विजां पत्न्यस्तुवंति । यज्ञोयं तव यजनाय त्वां यष्टुं केन ब्रह्मणा पूर्वं सृष्टः हे यज्ञात्मन् । तन्नो यज्ञं नलिनकांत्या दृशाने
ण पुनीहि पवित्रं कुरु ॥ कथंभूतं यज्ञं प्रावाः शेरते ॥ यस्मिन्निति प्रावशयनं । तद्वदाभाशीतीति र्येस्य । स चासौ शांतमेधश्च उपरतो मखः ॥ मेधपावे
न पशुहिंसायुक्तस्त्वोल्लक्ष्यते ॥ प्रावमुदकस्तत्र शेत इति तथाप यं तन्नामेति संबोधनं च ॥३३॥ २१

कृष यस्तु कर्मो एव नुतिर्यतः स्तस्तु पुण्येन तत्फलेन च युज्यते ॥ भगवति तु तस्याभावमालस्य विस्मिता स्तुवंति ॥ अनन्वितं अघटमानं यद्यस्मात् आत्म
ना स्वयं कर्माचरसि ॥ अनुतिष्ठसि ॥ न त्वदुपसेलिप्यसे ॥ यतस्त्वमात्मवित्तत्वे संपदे ईश्वरी लक्ष्मीमुपसेदुः ॥ पद्मापतइति सा वविनक्ति कस्तसिः
यामित्यर्थः ॥ स्वतांस्त स्वयमेवानुवर्तमानां तां तानामन्यते न ढियते ३४ ॥ सिद्धास्तु तत्कथामृतमतिनंदंत स्तुवंति ॥ अयं सोमनोगाढः ॥ त्वत्
कथैवमृष्टस्मुद्धपी यूषं तन्मयी या नदी तस्यां अवगाढः ॥ प्रविष्टो दावाग्निलुप्तसंसारतापं न संस्मरति स्मरंश्च ततो निर्गच्छति ॥ ब्रह्मसंपन्न
वत ब्रह्मैक्यं प्राप्त इव ३५ ॥ यजमानीदक्षपत्नी स्तौति ॥ ते स्वागतं न इमामामनङ्घातं ॥ हे अधीश यथा शिरसा हीनः कबंध मात्र पुरोगो

कृ ष य ऊ चु ॥ अनन्वितं तव भगवद्विचेष्टितं यदात्मना चरसि हि कर्मनाज्यसे ॥ विभूतये यत उपसेदुरीश्वरीं न मन्यते स्व
यमनुवर्ततीं भवान् ॥ ३४ ॥ सि द्धा ऊ चुः अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः ॥ तृषार्तो
वगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥ ३५ ॥ यजमान्यूचु ॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवा
स श्रिया कांतया त्राहि नः शिरोहीनः कबंधो यथा पुरुषः ॥ ३६ ॥ लोकपाला ऊचुः दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा
दृश्यते येन दृश्यं ॥ माया ह्येषा भवदीया हि भूमन्नपस्त्वं षष्ठः पंचभिर्भासि भूतैः ॥ ३७ ॥

करचरणाद्यवयवैः परिपूर्णैरपि न शोभते ॥ तथा त्वां विना केवलं प्राप्तो यागैर्मखो न शोभते ॥ अतो नः श्रिया सह त्रायस्व लज्जातान्कुर्वित्यर्थः ।
३६ ॥ लोकपाला लोकेश्वराभिमानिनः भगवतस्तेमपपत्तयूचुः । दृष्टः किं नो दृष्ट इत्यर्थः ॥ कुतः असद्ग्रहैः पुंस्त्वमाविष्कलिंगत्वाद्दृश्य
प्रकाशकत्वादिः ॥ दृग्भिरिंद्रियैः अयं भावः अचिंतितां त्वां मुक्तसत्वस्त्वमसि न तोसि । अस्माकं तु बहिर्मुखेंद्रियाणां पंचभूतोपलक्षिता
डीव विशेषश्च इव नासि ॥ अतस्त्वमस्मदिंद्रियगोचरो न भवसि धिगस्मज्जीवितमिति ॥ ३७ ॥

भा० च० योगेश्वरास्तदभेदे मनडतामनुग्रहं भक्तिमन्यमानाः स्वामित्वभावेन न तु तामप्यनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्यां त्वय्यात्मनि विश्वात्मनि
२२ परब्रह्मणि त्वयि य आत्मनः पृथङ्नेक्षेत ॥ अमुतः अमुष्मात्त्वत्तः ते प्रेष्ठो नास्ति आत्मनो जीवात्पृथक्त्वेनेक्षेतेति वा । वत्सल भक्तप्रिय अ-
न न्यवृत्त्या अनन्यया भक्त्या निश्चायिन्या तन्मयान्मडतोऽनुगृहाण त्वयि अव्यभिचारिणी भक्तिः कथं स्यात् तत्तृतीयाणां व कृत्वा दि स्वायां क्या
कुः ॥ जगदुद्भवादिषु ॥ निमित्तेषु दैवतो जीवादृश्यात् ॥ बहुधा भिद्यमाना गुणा यस्यास्तया मायया आत्मनि स्वस्वरूपे रचिता बुद्ध्यादिभेदमति- ८
र्येन तस्मै स्वसंस्थया केवलस्वरूपावस्थानेन च विनिवर्तितो नेदं भ्रमो गुणात्मकदेहो वा ॥ आत्मनियेन तस्मै । पापं ब्रह्मस्तौति नमस्ते

योगेश्वरा ऊचुः ॥ प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः ॥ अथापि भक्त्येश तयोपधाव-
तामनन्यवृत्त्यानुगृहाण वत्सलः ॥ ३८ ॥ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया ॥ रचिता-
त्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ॥ ३९ ॥ ब्रह्मोवाच ॥ नमस्ते श्रितसत्वाय धर्मादीनां सूतये ॥ नि- वे
र्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥ अग्निरुवाच ॥ यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसि-
क्तं ॥ तं यज्ञियं पंचविधं च पंचभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञं ॥ ४१ ॥

इति श्रितं स्वीकृतं सत्वं येन अतः भक्त्या फलप्रसवित्रे । सत्वं गुणात्वं च कथमित्याशंक्याह ॥ यस्य काष्ठां तत्त्वं नाहं वेद्मि अपरे रुद्रादयश्च वि-
दुः तस्मै ॥ ४० ॥ अग्निस्तु यज्ञमूर्तिं प्रणमति यस्य तेजसा सुसमिद्धं प्रदीप्तं तेजो यस्य सोऽहं सुसमृद्धे अध्वरे हविर्वहामि ॥ तं यज्ञं यज्ञाय हितं पा-
लकं यज्ञं यज्ञमूर्तिं पंचविधत्वमैतरेयकमुक्तं स एष यज्ञः ॥ पंचविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति । पंचभिर्यजु-
र्मंत्रैरपि विष्टं हुतं तथा च श्रुतिः ॥ आश्रावयेति चतुरक्षरमस्तु श्रौषडिति च चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पंचाक्षरं द्व्यक्षरो- २२
वषट्कार इति सप्तदश ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदत्विति ॥ ४१ ॥

देवास्तु सत्यं वयमिति देवाः तथापि तु गदाद्यंतयोस्त्वमेव नान्यः कश्चिदित्याहुः पुरेति कल्पापाये प्रलये विकृतं कार्यजातं मुदरीकृ
त्य संहृत्य त्वमेवाद्यः पुमान् उरगेंद्र एवाधिशयनं यस्यां तस्मिन्पयोधौ शयनं करोषि सिद्धैर्द्रनलोकादिभिः विमृसिता विचिंतिता ध्यात्म
पदवी ज्ञानमार्गो यस्य स एव त्वं यदिदानीमक्ष्णोर्मार्गे पथि चरसि प्रवृत्तोसि ४२ गंधर्वास्तु सत्यं वयं मिथ्या केवलं सर्वोपि परमे
श्वरे तेनांशस्ततो वयमेव तु परमेश्वरः अंशेषु तु ल्लव इत्याहुः अंशांशा इति हे विभूमन् महत्तम क्रीडाभांडं क्रीडोपक

दे ऊ पुराकल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेंद्राधिशयने पुमान् शेषे
प सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः गं र्वा चुः अंशांशास्ते
देवमरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः क्रीडाभांडं विश्वमिदं यस्य विभूमन् तस्मै नित्यं नाथ
नमस्ते करवाम ४२ विद्याध त्वन्माययार्थमभिपद्य कलेवरेस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्प
थैः स्वैः क्षिप्तोप्यसद्विषयलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ४४ ब्रा ण चुः
त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च त्वं सदस्यर्त्विजो दंपती देवता अग्नि
होत्रं स्वधा सोम आज्यं पशुः ४५

रणं विश्वं ब्रह्मांडं यस्य तस्मै ते नमनं कुर्मः ४३ विद्याधरास्तु केवलं विद्याभिः संपदः प्राप्यंते अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रव
णं विना नास्तीत्याहुः अर्थं पुरुषार्थसाधनं कलेवरं अभिपद्य प्राप्य त्वन्माययास्मिन् ममेत्यहमिति चाभिमानं कृत्वा इममात्ममोहं युष्मत्
कथामृतनिषेवकः उत उच्चैर्व्युदस्येत् परित्यजेत् तत्रान्वयः ननु स्वपुत्रादिभिरधिक्षिप्तोहं स्वैः स्वपरित्यजेत् तेनेत्याहुः क्षिप्तोपि दुर्
मतिः असत्सु विषयेषु लालसा तद्भावस्य सः ४४

मा० च० कृष्णेन स्तुवं तिलमिलमिति त्रिभिः मदस्याच्युत स्तुतिर्भगवान् पृथ्वीरसायाः रसातलात्तदं ष्ट्राग्रे कृत्वाहारार्थं विष्णोर्वराहरूपेण धृतवान् ऽ सियोगिभिः स्तू
२३ यमानः हे त्रयीगात्र वेदमूर्ते यज्ञो यागः स एव स्तम्भः ष्टक्रतुस्त्वं ऽय॥ यज्ञसंकल्प इत्युच्यते इति यत्क्रतुः कर्म यस्येति वा यज्ञ इदं कर्मेत्यादरूपः
४६॥ सत्वमस्माकं त्वद्दर्शनयाकांक्षतां प्रसीद अस्मद्युक्तमभ्युद्धरेत्यर्थः॥ तवासकय तवैतद्भूतस्तव नामकीर्त्यमानाएव यज्ञविघ्नान्नपयां
ति एवं प्रभावो यस्य तस्मै नमः ४७॥ इत्यनेन प्रकारेण सर्वैर्विकीर्त्यमाने हे मद्दाविदुर सन्निध्यप्रवर्त्तयामास ४८॥ सर्वात्मतयासर्वनागान्तात्मकायि

त्वं पुराणां रसायां महाम्बु करोद्दंष्ट्रया याभिनीवारणेन्द्रो यथा॥ स्तूयमानो नदन्लीलया योगिभिर्भ्युद्धहर्थ त्रयीगात्र यज्ञक्र
तुः ४६॥ प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिनष्टसत्कर्मणां॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेशा ते यज्ञविघ्नान्
पयांति तस्मै नमः ४७॥ मैत्रेय उवाच॥ इति दक्षकविर्यज्ञं न ऽमद्भावमर्षितं॥ कीर्त्यमाने हृषीकेशे सन्निन्ये यज्ञभा
वने ४८॥ भगवान् स्वेन नागेन सर्वात्मा सर्वनागनुक्॥ दक्षं ब भाष आभाष्य ऽयमाण इवाघ ४९॥ श्रीभगवा
नुवाच॥ अहं ब्रह्मा च सर्वश्च जगतः कारणं परं॥ आत्मेश्वर उपद्रष्टा स्वयंदृग विशेषणः॥ आत्ममायां समाविश्य सो
हं गुणमयीं द्विज॥ सृजन्रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचितां॥ तस्मिन्ब्रह्मण्यद्वितीये केवले परमात्मनि ब्रह्मरुद्रौ च
भूतानि भेदेनाज्ञोनुपश्यति ५१॥

भगवन्निदानरत्नसोपि स्वेननागेन त्रिकपालपुरोतापोनप्रीयमानः इवदक्षमानाभ्यं सबोधसाप्ये ४९॥ योहं जगतः कारणं आत्मा
चेश्वरश्चउपद्रष्टा साक्षी स्वप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च सर्वश्चेत्यन्वयः ५०॥ कुतइत्यत आह॥ अहमेवात्ममायामधिष्ठाय
जगत्सृष्ट्यादि कुर्वन्सर्वप्रक्रियोचितां संज्ञां धारयामि तस्मिन्केवले द्वितीये समानाज्ञानी यभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि २३
च भेदेनाज्ञः पश्यती त्यर्थः ५१॥

भिदां स्तु नेदं न पश्यतीति सदृष्टांतमाह ॥ यथेति ॥ तस्माद्देवैर्मे कृतं यत्पूजनं तत्तार्थ्यत्ववतीत्याह । त्रयाणामेकोभावः स्वरूपं येषां ॥५४॥ स्वेन
क्रतुना त्रिकपाले संपादनयतः अंगैः प्रधानेन च ॥५५॥ स्वेन भावेन यद्भागमपि येन उदवस्यते समाप्यते तेन उदवसानं तेन कर्मणा सोमपा
नितरानपि उपाधावदिति अनुषंगः ॥ ततश्च उदवस्य कर्म समाप्य अवभृथं यत्स्नानं यथा भवति तथा स्नातवान् ॥५६॥ स्वेनैवानुभावेन स्वराधसे

यथा पुमान्न स्वांगेषु शिरः पाण्यादिषु क्वचित ॥ पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥ त्रयाणामेकभावानां यो न पश्यति
वै भिदां सर्वभूतात्मनां ब्रह्मन् स शांतिमधिगच्छति ॥ मैत्रेय उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिं ॥ अर्चि
त्वा क्रतुना स्वेन देवानुभयतो [illegible] यजत ॥ रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः ॥ कर्मणोदवसानेन सोमपा
नितरानपि ॥ उदवस्य सहर्त्विग्भिः सस्नावबभृथं ततः ॥ तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ धर्म एव मतिं दत्वा
त्रिदशास्ते दिवं ययुः ॥ एवं दाक्षायणी हित्वा सती पूर्वकलेवरं ॥ जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ तमे
व दयितं भूय आवृंक्ते पतिमंबिका ॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषं ॥५९॥ एतद्भगवतः शंभोः कर्म दक्षाध्वरद्रु
ने हः ॥ श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥ ६० ॥ इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणं ॥ यो नि
त्यदाकर्ण्य नरोनुकीर्त्तयेद्धुनोत्यघं कौरव भक्तिभावतः ॥ ६१ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे दक्षय
ज्ञसंधानं नाम सप्तमोध्यायः ॥ ७

प्राप्तसिद्धये तस्मा अपि ॥५७॥५८॥ आवृंक्ते भजते स्म । अनन्यभावानामेकैव गतिर्यस्य तं ॥
प्रलयकाले सुप्ते साधारणं पुरुषं शक्तिरीश्वरमिव ॥५९॥ बृहस्पतेः शिष्यात्मनः श्रुतं ॥ ६० ॥ परं पवित्रं यच्चाकर्ण्य तथानुकीर्त्तयेत्तस्य । आत्मनः प
रस्यापि च अघं संसारव्यसनं सर्वं विधुनोति ॥ ६१ ॥ इति भागवते चतुर्थस्कंधे टीकायां सप्तमोध्यायः ॥ ७ ॥

भा० च०
२४

दक्षकन्यान्वयेऽप्याह स्वायंभुवकथोदिता ॥ मनुपुत्र्यान्वयेऽप्याह ध्रुवचर्यां च पंचभिः ॥ अष्टमे गुरुदारोक्तिरोषमत्सरतः पुरात्
निर्गतेन ध्रुवेणाहृतपःसातो वनं हरेः ॥१॥ एवं तावन्मनुकन्यान्वयो नैव मरीच्यादीनां ब्रह्मपुत्राणां वंशावंप्राव वर्णिताः ॥ तत्रावशिष्ट
किंचिदाह । सनकाद्या इति तावत्सनत्नाश्रिताः । ऊर्ध्वरेतसो नैष्ठिकाः अतस्तेषां वंशो नास्ति ॥१॥ अधर्मोऽपि ब्रह्मणः पुत्रस्तस्य वंशमाह

मैत्रेय उवाच ॥ सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ॥ नैते गृहान्ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥१॥ मृषाध
र्मस्य भार्यासीद्दंभं मायां च शत्रुहन् ॥ असूत मिथुनं तत्तु निरृतिर्जगृहेऽप्रजः ॥ तयोः समभवल्लोभो निकृतिश्च म
हामते ॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥ दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम ॥ तयोश्च मिथुनं य
ज्ञे यातना निरयस्तथा ॥ संग्रहेण मयाख्यातः प्रतिसर्गस्तवानघ ॥ त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं
॥५॥ अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह ॥ स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥६॥ प्रियव्रतोत्तानपादौ
शतरूपापतेः सुतौ ॥ वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥७॥

ह ॥ मृषेति चतुर्भिः दंभः परप्रतारणं ॥ माया तद्रचिता चेष्टा तयोः सोदरयोरपि दांपत्यम् अधर्मे प्रातया एवमुपर्यपि अप्रजः अपु
त्रः ॥२॥ निःकृतिः शाठ्यता तत् ॥ यात्मा कलिः अतस्या स्वसा दुरुक्तिश्चेत्यर्थः ॥३॥ यातना तीव्रवेदना ॥४॥ प्रतिसर्गे तु सर्ग एव यद्यपि प्रतिसर्गः
प्रलयः । अधर्मस्य प्रलयहेतुत्वात् प्रति । सर्गत्वं एतत् एतमधर्मवंशं पुण्यमिति वर्जनद्वारा पुण्यहेतुत्वात् ॥६॥ मनोः पुत्रवं
शं ॥ हरेरंशो ब्रह्मा तस्यांशात् देहाज्जन्म यस्य ॥६॥ जगतो रक्षायां स्थितौ ॥७॥ २४

जै

मनोः पुत्रद्वयं प्राह हे पौत्रोऽप्यस्मात्तस्यां प्रात ॥७॥ सुनीति ॥ सुरुचिर्द्वयेतयोर्मध्ये ॥८॥ तयोः प्रियाप्रियत्वेन प्रपंचयन् ध्रुवचरित्रमाह
पंचभिरध्यायैः ॥ स रुचेः पुत्रमुत्तमं संज्ञं लालयन् ॥९॥ तमंकमारोहणं चिकीर्षमाणं ॥१०॥ गर्वोक्तिमेवाह ॥ त्रिभिः नैतिन्नृपतेर्धिष्ण्यमासनं

जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः ॥ सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥८॥ एकदा सुरुचेः पुत्रमंकमारो
प्य लालयन् ॥ उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत ॥ तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं ॥ सुरुचिः शृण्वतो
राज्ञः सेर्ष्यमाहातिगर्विता ॥ न वत्स नृपतेर्धिष्ण्यं भवान्नारोढुमर्हति ॥ न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥ ११
बालोऽसि बत नात्मानं मन्यस्त्रीगर्भसंभृतं ॥ नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः ॥ तपसाराध्य पुरुषं तस्यैवानु
ग्रहेण मे ॥ गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनं ॥१३॥ मैत्रेय उवाच ॥ मातुः सपत्न्याः सदुरुक्तिविद्धः श्वस
न् रुषा दंडहतो यथाहिः ॥ हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशं ॥१४॥ तं निःश्वसंतं
स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं ॥ निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्या ॥१५॥ सो
त्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ॥ वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकला
मुवाह ॥१६॥

नृपात्मजोऽपि न भवान् नारोढुमर्हति ॥१२॥ पुरुषमीश्वरं ॥ मिषंतं पश्यंतं ॥ सन्नवाचं कुंठितवाचं ॥१४॥ उदूह्य आरोप्य अंतःपुरजनमुखात्
श्रुत्वा ॥१५॥ शोक एव दावाग्निस्तेन दावाग्निगता लतेव व्यथिता बाला विलापं चकार ॥१६॥

भा० च० वृजिनस्य दुःखस्य अमङ्गलमपराधं परेषु मा मंस्थाः यद्यतः परेभ्यो दुःखं ददाति यः स तत्तदेव दुःखं भुङ्क्ते। १७ दुर्भगाया मया उदरे
२५ गृहीतः तस्या एव स्तन्येन वृद्धश्च। दुर्भगात्वमेवाह। यां मां इडस्पतिं नृपती भार्येति वोढुं स्वीकर्तुं विलज्जते। बाधा दासी त्वाधि। १८ वि-
गतमात्सर्येण समा मात्रा मातुः सपत्नी तया यदपि यद्दुरुक्तं तदपि साराध्यपुरुषमित्यादि इति तत् आतिष्ठ कुरु अध्यासनं यदीच्छसि। १९ परि-

दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बालकमाह बाला। मामङ्गलं तात परेषु मंस्था भुङ्क्ते जनो यत्परदुःखदस्तत्
॥१७॥ सत्यं सुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः॥ स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिड-
स्पतिर्माम्॥१८॥ आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकम्॥ आराधयाधोक्षजपादपद्मं यदीच्छसे-
ऽध्यासनमुत्तमो यथा॥१९॥ यस्याङ्घ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः॥ अजोऽध्यतिष्ठत्खलु पा-
रमेष्ठ्यं पदं जितात्मश्वसनाभिवन्द्यम्॥२०॥ तथा मनुर्वो भगवान्पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः॥
इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम्॥२१॥ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदा-
ब्जपद्धतिम्॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम्॥२२॥ नान्यं ततः पद्मपलाशलोचनाद्दुः-
॥ ॥ ॥॥ खच्छिदं ते मृगयामि कंचन॥ यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरङ्ग विमृग्यमाणया॥२३॥

चर्य निषेव्य विश्वस्य विभावनाय आत्ता स्वीकृता गुणाभिपत्तीः सत्त्वगुणाधिष्ठानं येन तस्य तत् आत्मा मनः श्वसनः प्राणो यैस्तैरभिवन्द्यं
२०॥ एकमत्या सर्वात्मना ईदृश्या। २१। मृग्या पदाब्जयोः पद्धतिमार्गो यस्य तमेवाश्रयः शरणं बुधः। ततो भजस्व॥ नान्यस्मिन् भावो
यस्य तस्मिन्। निजधर्मेण भाविते शोधिते। २२। तमेवं तत्पन्ने न सूचितं सर्वोत्तमं पूर्वं च यति नान्यमिति। हस्तेन गृहीतं पद्मं यया
इतरैर्ब्रह्मादिभिः २३॥ २५

एवंसङ्कल्पितंविलापांतत॥ अर्थस्यागमोयस्मात। तथाभूतंवचः। आकर्ण्य २४॥ विस्मितइत्युक्तं। तदेवाह॥ अहोतेजः। प्रभाव २६। २७ विकल्पे
मानापमानविवेकेसत्यपिभिन्नानसंति। किंतुमोहकल्पिताइत्यर्थः। कुतः। यतःसुखंदुःखंवातन्निजकर्मभिरेवभवतियतः २८॥ दैवप्रामोप
देशेननिवर्तयति॥ परितुष्येदितिषड्भिः। ईश्वरमतिंवादृष्टंईश्वरानुकूल्यंविनानोद्यमाःफलहेतवइतिज्ञात्वा २९। दुष्करस्यसमुद्यमस्या

मैत्रेय उवाच॥ एवंसंजल्पितंमातुराकर्ण्यार्थागमंवचः॥ संनियम्यात्मनात्मानंनिश्चक्रामपितुःपुरात। नारदस्तदुपाक
र्ण्यज्ञात्वातस्यचिकीर्षितं॥ स्पृष्ट्वामूर्द्धन्यघघ्नेनपाणिनाप्राहविस्मितः॥ अहोतेजःक्षत्रियाणांमानभंगममृष्यतां
बालोप्ययंहृदाधत्तेयत्समातुरसद्वचः। नारद उवाच। नाधुनाप्यवमानंतेसम्मानंवापिपुत्रक॥ लक्षयामःकुमार
स्यसक्तस्यक्रीडनादिषु॥ विकल्पेविद्यमानेपिनह्यसंतोषहेतवः॥ पुंसोमोहमृतेभिन्नाःयल्लोकेनिजकर्मभिः॥ परितु
ष्येत्ततस्तातताव्नमात्रेणपूरुषः॥ दैवोपसादितंयावद्वीक्ष्येश्वरगतिंबुधः॥ अथमात्रोपदिष्टेनयोगेनावरुरुत्स
सि॥ यत्प्रसादंसवैपुंसांदुराराध्योमतोमम॥ मुनयःपदवींयस्यनिःसंगेनोरुजन्मभिः॥ नविदुर्मृगयंतोपितीव्रयोग
समाधिना॥ अतोनिवर्ततामेषनिर्बंधस्तवनिःफलः॥ यतिष्यतिभवान्कालेश्रेयसांमुपस्थिते॥ ३२॥

ह॥ अथेतिद्वाभ्यां॥ यस्यप्रसादमवरोद्धुंप्राप्तुमिच्छसि॥ निःसंगेनतीव्रयोगेनयुक्तेनसमाधिनामृगयंतेऽपियस्यपदंवीमार्गंनविदुःसदे
वोदुराराध्यः ३१॥ श्रेयसांकालेवंले॥ ३२॥

भा०च० सुखदुःखयोर्मध्ये सुखे दिष्टपुण्यं क्षयत इति ॥ दुःखे सति पापं क्षीयत इत्यात्मानं तोषयन् तमसः पारं मोक्षं प्राप्नोति ॥३३॥ किंच गुणैरधिकान्मु
२६ दयति लघुं पञ्चमी ॥ तं दृष्ट्वा प्रीतिं कुर्यात् न त्वसूयामित्यर्थः ॥ अनुक्रोशं कृपां लिप्सेत न तु तिरस्कारं समानात् मैत्रीं तु सदा ॥३४॥३५॥ पुंस्त्वं
त्वं स्वल्पावयं प्राप्तवतः अत एवाविनीतस्य दुर्वाक्यबाणैर्भिन्ने हृदि न श्रयते नातिष्ठति ॥३६॥ अन्यैरधिष्ठितं त्रिभुवनउत्तमं स्थानं पदं ईहितुमिच्छो

यस्य यद्दैवविहितं स तेन सुखदुःखयोः ॥ आत्मानं तोषयन्देही तमसः पारमृच्छति ॥३३॥ गुणाधिकान्मुदं लिप्सेदनुक्रो
शं गुणाधमात् ॥ मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥३४॥ ध्रुव उवाच ॥ सोयं शमो भगवता सुखदुःखहतात्मनां
दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥३५॥ अथापि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः ॥ सुरुच्या दुर्वचोबा
णैर्न भिन्ने श्रयते हृदि ॥ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ॥ नू
नं भवान्भगवतो योऽङ्गजः परमेष्ठिनः ॥ वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ॥ इत्युदाहृतमाकर्ण्य भगवान्नारदस्
तदा ॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकम्पया ॥ श्रीनारद उवाच ॥ जनन्याभिहितः पन्थाः स वै निःश्रेयसस्य ते ॥ भगवान्
वासुदेवस्तं भज तत्प्रवणात्मना ॥४०॥ धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ॥ एकं ह्येव हरेस्तत्र कारणं पादसे
वनं ॥४१॥

र्मे साधु वर्त्म मार्गं ब्रूहि ॥३७॥ अङ्गज इति पाठे पुत्रः अङ्गाज्जातो यो नारदः स भवान् तत्र लिङ्गं वितुदन् वादयन् हिताय अटति ॥३८॥३९॥ निःश्रे
यसस्य अभिप्रेतार्थस्य पन्था प्रोक्ता वित्यत्राह ॥ भगवान्वासुदेव अत एव तं भज ॥४०॥ ४१॥ श्रीराधावर ॥ २६

मधुवनारण्यं ततं गच्छ यत्र मे मधुवने ॥ ४२ ॥ अध्ययनाद्यसावेतत्पि । आत्मतः उचितानि योगपानि देवतानमस्कारादीनि कृत्वेति यमनियम
कृत्वा आसनकल्पनं चकुशाद्यैः स्वस्तिकादिभिश्च प्राणेंद्रियमनसां मलं चांचल्यं प्रद्रस्येति प्राणायामप्रत्याहारौ धारणामाह । श्रुति
सु ध्यायेदित्यादि षड्भिः । गुरुणा धीरेण मनसा गुरुं श्रीहरिं ॥ ४४ ॥ सुरेशं सुंदरं ॥ ४५ ॥ रमणीयानं गानियस्य । तु षष्ठ्या ईक्षणा अरुणे उ से

ततस्तत गच्छ स्नं इंते यमुनायास्तटं शुचिः ॥ पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ स्नात्वानुसंनंतस्मिन् कालिंद्याः सलिले दे
शिवे ॥ कृत्वोचितानि निवसन् आसने कल्पितासनः ॥ प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलं ॥ ध्यायेन्नृद्धस्वाऽत्रि ध्या
ये स्त्मनसा गुरुणा गुरुं ॥ ४४ ॥ प्रसादाभिमुखं शश्वत्प्रसन्नवदनेक्षणं ॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरं
तरुणं रमणीयांगमरुणोष्ठेक्षणाधरं ॥ प्रणताश्रयणं मन्नं शारण्यं करुणार्णवं ॥ श्रीवत्सांकं घनश्यामं पुरु
षं वनमालिनं ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं ॥ किरीटिनं कुंडलिनं केयूरवलयान्वितं ॥ कौस्तुभाभर
णग्रीवं पीतकौशेयवाससं ॥ कांचीकलापपर्यस्तं लसत्कांचननूपुरं ॥ दर्शनीयतमं शांतं मनोनयनव
र्द्धनं ॥ पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चतां ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ॥ ५० ॥

रुणोधारयतीति तं पातं अरुणं उष्ठमीक्षणं चाधारयतीति चानम्रं सुखकरं यद्वा नम्रं धनं सर्वपुरुषार्थनिधिमित्यर्थः ॥ ४६ ॥
पुरुषं पुरुषलक्षणयुक्तं कौस्तुभाभरणं ग्रीवा यस्य ॥ ४८ ॥ कांचीकलापेन पर्यस्तं परिवेष्टितं मनोनयनयोर्वर्द्धनं हर्षहरं ॥ ४९ ॥
हृत्पद्मकर्णिकायां धिष्ण्यं मध्यस्थानं तदाक्रम्य समः ऋतामात्मनि मनसि स्थितं ॥ ५० ॥

ना०च० अथ ध्यानमाह ॥ स्मयमानमिति ॥ नियमेन प्रागुक्तया धारणया सुस्थिरेणान्तःकरणेन एकाग्रेण धारणोक्तानि विग्रहस्थानि ध्या
२१ नेषु प्रत्येकं ध्यात्वा नियतं यथोक्तमात्रमेव तदुक्तमेकाग्रेणाखंडेनात्मनि चिंतयेत् यः सस्मितं तावद्ये मुखमिति ॥५१॥ समाधिमाह ॥ एव-
मिति तूर्णं शीघ्रमनन्यं तन्मतः ॥५२॥ उपयो मंत्रः ॥५३॥ उक्तोपायेनाह ॥ सलिलैरिति ॥ पत्रैर्दूर्वांकुरैः वन्यैर्वांशुकैः ॥ स्त्र्यलंकारादिभिः ॥५४॥ अथ

स्मयमानमभिध्यायेत्सानुरागावलोकनं । नियतेनैकभूतेन मनसा वरदर्षभं ॥ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ५
निर्वृत्या परया तूर्णं संपन्नं तन्न निवर्त्तते ॥ जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज । यं सप्तरात्रं प्रपठन् पुमान् पश्यति
खेचरान् ॥ ॐ नमो भगवते वासुदेवाय ॥ मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः ॥ सपर्यां विविधैर्द्रव्यैर्देशकाल
विभागवित् ॥ सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं ॥ लब्ध्वा
द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु वार्चयेत् ॥ आभृतात्मा मुनिः शांतो यतवाङ्मितवन्यभुक् ॥ स्वेच्छावतारच
रितैरचिंत्यनिजमायया ॥ करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगतं ॥ परिचर्या भगवतो यावत्यः पूर्वसेविताः
ताः मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्त्तये ॥ एवं कायेन मनसा वचसा च मनोगतं ॥ परिचर्यमाणो भग
वान् भक्तिमत्परिचर्यया ॥५६॥

५ स्थानमाह ॥ लब्ध्वा सेव्यां द्रव्यमयीं शिलादिभिर्निर्मितां प्रजासाद्गुण्ये तत्राहृतसार्द्रप्स्वां ॥ आभृतात्मा धृतचित्तमितं वन्यं भुक्तं यस्य तं
पा ॥५६॥ यत्करिष्यतीति तदानीमवतारप्राचुर्याभावात् ॥५७॥ पूर्वसेविताः सेवनं कारितास्तत्कर्तृत्वेन विहिता यस्मर्थः ॥ मंत्रहृदयेन
तद्वाद्दशाक्षरेण ॥५८॥ एवमुक्तरीत्या मनोगतं यथा भवति तथा कायादिभिः ॥ भक्तिमत्या परिचर्यमाणो धर्मार्थकामेषु यत् निम २१
तं तत् प्रयोदिशतीति द्वयोरन्वयः ॥५९॥

६० विरक्तः सन् भजेत किं मर्त्य विमुक्तेः ६१ ॥ हरेश्चरणाभ्यां चर्चितं मंडितं ६२ अर्हितं सतत्कृत्य समर्पितं अर्हणमपूर्वादिकं यस्मै ६३ किं
वा नरिष्यते नरिष्यतीति सवितर्कः प्रश्नः ६४ ॥ मात्रा सह निर्वासित इति ॥ तस्मात् अपनाद्दत्वात् । मास्मादं ति किंचिन्न खादंतीत्यर्थः ६६ ॥ ६७

पुंसाममायिनां सम्यक् भजतां भाववर्द्धनः ॥ श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनां ६१ ॥ विरक्तश्चेंद्रियरतौ भक्तियो
गेन भूयसा ॥ तं निरंतरभावेन भजेताद्धा विमुक्तये ६२ ॥ इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपात्मजः ॥ ययौ मधुवनं पुण्यं हरे
श्चरणचर्चितं ६३ तपोवनं गते तस्मिन् प्रविष्टोंतःपुरं मुनिः ॥ अर्हितार्हणको राज्ञा सुखासीन उवाच तं ६४ नारद
उवाच ॥ राजन् किं ध्यायसे दीर्घं मुखेन परिशुष्यता ॥ किं वा न रिष्यते कामो धर्मश्चार्थेन संयुतः ६५ ॥ राजोवाच ॥ सुतो
मे बालको ब्रह्मन् स्त्रैणेनाकरुणात्मना ॥ निर्वासितः पंचवर्षः सह मात्रा महान् कविः ६६ ॥ अप्यनाथं वने ब्रह्म
न्मास्मादंत्यर्भकं वृकाः ॥ श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजं ६७ अहो मे बत दौरात्म्यं स्त्रीजितस्योप
धारय ॥ योंकं प्रेम्णारुरुक्षंतं नाभ्यनंदमसत्तमः ६८ ॥ नारद उवाच ॥ मा मा शुचः स्वतनयं देवगुप्तं विशांपते ॥ त
त्प्रभावमविज्ञाय प्रावृंक्ते यद्यशो जगत् ६९ ॥ सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ॥ एष्यत्यचिरतो राजन्
यशो विपुलयंस्तव ७० ॥

यस्य यशो जगत् प्रावृंक्ते व्याप्नोति ६८ विपुलयन् विस्तारयन् ६९ ध्रुवो मधुवने किमकरोदित्यपेक्षायामाह । तत्रेत्यादिना ॥ ७० ॥ श्री

भा० च० अभिषिक्तः स्नातः प्रयतः प्रसंतां ७१ ॥ कपित्थानि बदराणि च ॥ अशनं यस्य ॥ आत्मवृत्तिः देहस्थितिः तदनुसारेण ॥ ७२ ॥ ७३ ॥ तृतीयं चानयन्
२८ यन् इत्यब्भक्ष इत्यादि वनयन् उपाधावदित्यन्वयः ॥ ७४ ॥ पंचमे मासि तु अनुप्राप्य मासमाहारसंकोचं तयोरितिरेकं चकृतवान् ॥ ७६ ॥ भूतानि पृथ्व्यादीनि इं

मैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ॥ ७ ॥ तत्राभिषि
क्तः प्रयतः ॥ तामुपोष्य विभावरीं ॥ समाहितः पर्यचरदृष्यादेशेन पूरुषं ॥ ७१ ॥ त्रिरात्रांते त्रिरात्रांते कपि
त्थबदराशनः ॥ आत्मवृत्त्यानुसारेण मासं निन्येर्चयन् हरिं ॥ ७२ ॥ द्वितीयं च तथा मासं षष्ठे षष्ठेर्भको दिने ॥ तृण ध्रु
न पर्णादिभिः शीर्णैः कृतान्नोभ्यर्चयन् हरिं ॥ ७३ ॥ तृतीयं चानयन्मासं नवमे नवमेहनि ॥ अब्भक्ष उत्तमश्लोक
मुपाधावत्समाधिना ॥ ७४ ॥ चतुर्थमपि वै मासं द्वादशे द्वादशेहनि ॥ वायुभक्षो जितश्वासो ध्यायन्देव
मधारयत् ॥ ७५ ॥ पंचमे मासि तु अनुप्राप्ते जितश्वासो नृपात्मजः ॥ ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥ स
र्वतो मन आकृष्य हृदि भूतेंद्रियाशयं ॥ ध्यायन् भगवतो रूपं नाद्राक्षीत्किंचनापरं ॥ ७७ ॥ आधारं महदादीनां प्रधा
नपुरुषेश्वरं ॥ ब्रह्म धारयमाणस्य त्रयो लोकाश्चकंपिरे ॥ ७८ ॥

न्द्रियाणि च आशयो रतेर्यस्मिन् तन्मनः ॥ आकृष्य ब्रह्म ध्यायन् ॥ ७७ ॥ धारयमाणस्य सतः ॥ तस्य तेजः सोढुमशक्नुवंतः कंपिताः ॥ ७८ ॥ २८

तस्यां गुरुत्वेन निपीडितायां अत्रांता सती मही अर्द्धं ननाम ॥ स्त्रीत्वेपि अर्द्धपादस्य नपुंसकत्वात ॥ अंशांशिनोरभेदात चैवं सामानाधिकरण्यं ॥ इभेंद्रे-
णाधिष्ठिता तरीर्नौ यथा पदे पदे स्थ्यत तद्वत्तः ॥ तस्य तमतितद्वत ॥ अत्यद्भुताश्चर्यमाह ॥ तस्मिन् ध्रुवे विश्वं विश्वात्मकं विष्णुं आत्मनः स
काशे पादस्य तया धियात्वात्मनेव दृष्टव्यनात्मनि धायति सति ॥ किं कृत्वा असुं प्राणं तद्वारं च निरुध्य विश्वात्मन्येकीकृत्य स्वप्राणनिरोधेन

यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही ॥ ननाम तत्रार्द्धमिभेंद्रधिष्ठिता नौ तरीव सव्येतरतः पदे पदे ॥ ७९ ॥
तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया ॥ लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शर
णं ययुर्हरिं ॥ ८० ॥ देवा ऊचुः ॥ नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्वधाम्नः ॥ विधेहि तन्नो वृजिनाद्विमोक्षं
प्राप्ता वयं त्वां शरणं शरण्यं ॥ ८१ ॥ श्रीभगवानुवाच ॥ मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम यतो
हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवच
रित्रे अष्टमोध्यायः ८ ॥ श्रीमैत्रेय उवाच ॥ त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपं ॥ सहस्र
शीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥

ते विश्वस्य प्राणनिरोधे तद्धातः इति भावः ॥ ८० ॥ एवं प्राणनिरोधं कदाचिदपि न विद्मः अखिलसत्वधाम्नः ॥ सर्वप्राणिशरीरस्य ॥ तत्तस्मा
त् वृजिनात् त्वं पाहि ॥ ८१ ॥ यतो बालादपि असौ च बालः कथं तस्मात्प्राणनिरोध आसीदित्यत आह ॥ उत्तानपादस्य पुत्रो मयि विश्वरू
पे संगतात्मा एवं प्रासो वर्त्तत इति ॥ ८२ ॥ इति चतुर्थे अष्टमः ॥ नवमे तु हरिं स्तुत्वा लब्ध्वा तस्माद्वरान् ध्रुवः ॥ प्रत्यागत्याकरोद्राज्यं पित्रा
दत्तमितीर्यते ॥ १ ॥ एवं भगवद्वाक्येन गतभयाः ॥ १ ॥

भा० च० सवैध्रुवः योगस्य विपाकेन तद्दीर्घेनतीव्रयानिश्चलयागरुडाधिरूढं पुरःस्थितमपश्यंतत्र विलासंप्रेक्षणायप्रपतद्भाग्नगतेवांतःस्वरूपमा
२९ काशंभ्रतस्तिरोहितमालक्ष्यव्युत्थितः सन्यावद्गतःस्फुरितः तावद्दर्श ॥२॥ आगतसाध्वसः जातसंभ्रमः ॥ विनमय्य आनतंकृत्वा ॥ संश्र
मेवाह ॥ दृग्भ्यां प्रपिबन्निव प्रपश्यन्नवदन् ॥ आस्येनचुंबन्निवावदन् ॥ भुजाभ्यामाश्लिषन्निवावदत्तेत्यर्थः ॥ विवक्षंतं तद्गुणान्वक्तु

सवैधियायोगविपाकतीव्रया हृत्पद्मकोशे स्फुरितंतडित्प्रभं ॥ तिरोहितंसहसैवोपलक्ष्य बहिःस्थितंतदवस्थंददर्श ॥२॥
तद्दर्शनेनागतसाध्वसः क्षितावऽवंदतांगंविनमय्यदंडवत् ॥ दृग्भ्यांप्रपश्यन् प्रपिबन्निवार्भकश्चुंबन्निवास्येनभु
जेनवाश्लिषन् ॥३॥ सतंविवक्षंतमतद्विदंहरिः ज्ञात्वास्यसर्वस्यचहृद्यवस्थितः ॥ कृतांजलिंब्रह्ममयेनकंबुना
पस्पर्शबालंकृपयाकपोले ॥४॥ सवैतदैवप्रतिपद्यतांगिरंदैवींपरिज्ञातपरात्मनिर्णयः ॥ तंभक्तिभावोभ्यगृ
णादसत्वरंपरिश्रुतोरुश्रवसंध्रुवक्षितिः ॥५॥ ध्रुव उवाच ॥ योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्य
खिलशक्तिधरःस्वधाम्ना ॥ श्री ॥ श्री ॥ ॥ श्री ॥ श्री ॥ ॥ श्री ॥ श्री ॥ श्री

मिच्छंतं ॥ अस्यध्रुवस्यसर्वस्यचहृद्यवस्थितत्वात् ॥ ज्ञात्वाब्रह्ममयेनवेदात्मकेनशंखेन ॥४॥ भगवताप्रतिपादितांगिरंप्रतिपद्ये
तिशेषः प्रतिपद्यतामितिपाठे ॥ तांवेदात्मिकांपरिज्ञातः ॥ परमात्मनोर्जीवेश्वरयोः निर्णयोयेनसः ॥ अतएवभक्त्याभावः प्रेम
यस्य असत्वरंस्थैर्येणपरितःश्रुतं विख्यातंउरुश्रवः कीर्तिर्यस्यतं ॥ ध्रुवाक्षितिःस्थानंयस्येति ॥ भाविनिर्देशः ईश्वरानुग्रहसंप्राप्त
वागाद्भुतवितितिः ॥ द्वादशादिसंख्याकैः श्लोकैःस्तौतिहरिंध्रुवः ॥५॥ २९

योमे प्रसुप्तां लीनां वाचं ॥ अन्यांश्च प्राणानिंद्रियाणि स्वधाम्ना चिच्छक्त्या संजीवयंति ॥ यतः अखिलाश्च हस्तादिज्ञानक्रियाशक्तिः धा
रयतीति तथा ॥ पुरुषाय अंतर्यामिणे ननु वागादींद्रियशक्तिं ॥ धारयतीति तथा ॥ धरा वह्न्यादयः नाहमित्यत आह ॥ एक इति ॥ ६ ॥ अनु
विश्य पुरुषोंतर्यामी त्वं एक एव ॥ तस्या मायायाः असत्सु गुणेषु इंद्रियादिषु स्थितः सन् ॥ ततद्देवतारूपो नानेव भासि ॥ ननु तद्व्य
तिरेकेण ज्ञानशक्तिधरः कश्चिदस्तीत्यर्थः अपि च किं वक्तव्यं ॥ ब्रह्मादयो ज्ञानादिशक्तिधरा न भवंतीति यस्माद्ब्रह्मणोपि ज्ञानं त्वद
धीनमेवेत्याह ॥ त्वद्दत्तया वयुनया ज्ञानेन नवं तत्पारणं प्रपन्नो ब्रह्मा इदं विश्वं अचष्ट अपश्यत ॥ कथं सुप्तपुरुषः प्रबुद्धः सन् यथा पश्यति

अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यं ॥ ६ ॥ एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्यया
रुगुणया महदाद्यशेषं ॥ सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥ ७ ॥ त्वद्दत्तया वयु
नयेदमचष्ट विश्वं सुप्तः प्रबुद्ध इव नाथ भवत्प्रपन्नः ॥ तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्त्तबं
धो ॥ ८ ॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंति कल्पकतरुं कुणपोपभोग्य
मिच्छंति यत्स्पर्शजं निरयेपि नृणां ॥ ९ ॥ पि ॥ पि

तद्वत् ॥ ततः आपवर्ग्यं मुक्ताः ॥ तेषामपि शरणं ॥ कृतविदा सर्वेंद्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते ॥ एवं कृतं त्वां म
न्वतः कृतघ्ना इत्यर्थः येषु मायया मूढाः ॥ कामाद्यर्थं न तु भजंतीति तान् निंदति ॥ नूनमिति ॥ भवाप्ययो जन्ममरणे तद्विमोक्षहेतुं त्वं अन्यहेतोः ॥
कामाद्यर्थं भजंतीति तेन नूनं विमुष्टमतयः ॥ वंचितचित्ताः यतः कल्पतरुं त्वां अर्चंति ॥ ततः कुणपतुल्ये न देहेनोपभोग्यं सुखं इच्छंति ॥ न
वेच्छायोग्यं तदित्याह ॥ यत्स्पर्शजं विषयसंबंधजन्यं सुखं तत् नरकेपि भवति ॥ ननु स्वर्गादिसुखं सकामैः प्रार्थ्यते किं कामनं जनेन तन्नरस्यादि
सत आह ॥ ९ ॥

भाग० च० याति॥स्वमहिम्नि निजानंदरूपेपि मा भूत। तत्रवर्तीत्यर्थः अंतकस्यासिना कालेन लुलितात् खंडितात॥ विमानात्। पततां सा नास्तीति किंतु
३० वक्तव्यं॥ अतस्ते कथाश्रवणाय सत्संगतिं देहीत्याह॥१०॥ भक्तिं त्वयि प्रवहतां सातत्येन कुर्वतां। ननु मोक्षं किं न याचसे। अत आह येन म
हत्प्रसंगेन अंजसा अयत्नत एव। उल्बणानि व्यसनानि यस्मिन् तं नेष्ये पारं गमिष्यामि॥ भगवद्गुणकथैवामृतं तस्य पानेन मत्तः सन् कथाम
तपानमस्य पादकमलमाह॥११॥ ते अतितरां प्रियमपि मर्त्यं देहं न स्मरंति॥ नानुसंदधते ये च सुतादयः। अदः मर्त्यं अनुसंबद्धाः। तानपि ते

यानिर्वृतिस्तनुभृतांतवपादपद्मध्यानाद्भवज्जनकथाश्रवणेनवास्यात्॥साब्रह्मणिस्वमहिमन्यपिनाथमाभूत्किंत्वंतका
सिलुलितात्पततांविमानात्॥१०॥भक्तिंमुहुःप्रवहतांत्वयिमेप्रसंगोभूयादनंतमहतामलाशयानां॥येनांजसो
ल्बणमुरुव्यसनंभवाब्धिंनेष्येभवद्गुणकथामृतपानमत्तः॥११॥तेनस्मरंत्यतितरांप्रियमीशमर्त्यंयेचान्वदःसुतसु
हृद्गृहवित्तदाराः॥येत्वब्जनाभभवदीयपदारविंदसौगंध्यलुब्धहृदयेषुकृतप्रसंगाः॥१२॥तिर्यङ्नगद्विजसरी
सृपदेवदैत्यमर्त्यादिभिःपरिचितंसदसद्विशेषं॥रूपंस्थविष्ठमजतेमहदाद्यनेकंनातःपरंपरमवेद्मिनयत्रवादः॥१३॥

न स्मरंतीति येन कृतप्रसंगाः। के तव भवदीयपदारविंदसौगंध्ये लुब्धं हृदयं येषां तेषु॥ नु प्राधेनामेषां॥ केवलयोगादिनिष्ठानां देहादि
मानं निर्वर्तते दूर्ध्वं यदि। ननु एवं द्विधानपि किमित्यभिमानं वहसि अत आह॥१२॥ तिर्यङ्नगादिभिः परिचितं व्याप्तं॥ ततो सतं स्थविष्ठो भाय
भा स्य महदादीन्यनेकानि कारणानि यस्य। हे परम अज॥ तेष्वपि विषयं इदं विराट्रूपं केवलं न वेद्मि। अतो अभिमानं निवर्तत इति भावः। तदेव भा ३०
गवदनुकंपया तद्रूपद्वयं ज्ञात्वा ईश्वरस्वरूपमनुवर्णयन् नमस्करोति कल्पांत इति॥१३॥

त्रैलोक्यं यः पुमान् प्रोतेस्तस्मिन् दृक् वहिः य[illegible]योगनिद्रारूढत्वात् । अनंत[illegible]प सहायः तदंके यो घोतस्तं गे यस्य नाभिरेव सिंधुः स
मुद्रतस्मिन्[illegible]रोहती तित् यातस्मिन् ॥ कांचनलोकपद्मस्यागर्भेकर्णिकायां यः[illegible]स्त्री ब्रह्मा नत् । तद्गुणतो समीत्यर्थः । ननु मम्पि
त्वायाद्यवस्थावत्वेन कोडीकाद्वि यो ष इत्यत आह ॥ त्वमिति ॥ १४ ॥ त्वं तु व्यतिरि[illegible] जीवविलक्षणस्ति यसि वै लक्षणमेवाह । त्वं नित्य
मुक्तः जीवस्तु त्वत्प्रसादान्मुच्यते ॥ त्वं तु परिशुद्धः स तु मलिनः त्वं विबुद्धः । स तु अज्ञः त्वमात्मा[illegible]ः स तु जडः त्वं कूटस्थः स तु विकारी ॥ त्वम

स
कल्पांत एतदखिलं जठरेण गृह्णन् प्रोतेन वा न स्वदृगनंतखस्तदंके ॥ यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान् भ
गवते प्रणतोस्मि तस्मै ॥ १४ ॥ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः । यद्बुद्ध्यवस्थिति
मखंडितया स्व[illegible]दृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥ १५ ॥ यस्मिन् विरुद्धगतयो ह्यनिशं पतंति विद्यादि
यो विविधशक्तय आनुपूर्व्यात् ॥ तद्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥ १६ ॥

ग
नादिः । स त्वादिमान् । त्वं भगवान् ॥ स तु तद्धीनः त्वं त्र्याणां गुणानां त्र्यधीशः स तु गुणाधीनः कुतः । एतद्वैलक्षण्यं यत यतः बुद्ध्यवस्थितबु
द्धिवस्थां । अखंडितया स्वदृष्ट्या चिद्रूपतया पश्यसि ॥ द्रष्टेति ल्यन् प्रत्ययांत ॥ अतो बुद्ध्यवस्थितमित्यत्र षष्ठ्यभावः तथापि ततएव त्वं स्थितोप
लक्षितेऽधिमखः । यज्ञाधिष्ठाता साक्षी विष्णुः । तमेव ब्रह्मरूपेण नमस्करोति ॥ १५ ॥ पतंति अकस्मादुद्भवंति ॥ विश्वस्य भवो यस्मात् । एकं अ
खंडं आद्यं अनादिं सकामं न तु नादिः पिनोऽहमापार्नं आह ॥ १६ ॥
मा

भा०ता०च० हे भगवन् पुरुषार्थः परमानंदः स एव मूर्तिर्यस्य तव पादपद्मं आशिषो राज्यादेः सकाशात् तस्यात्याशीः॥ परमार्थफलं हि निश्चितं कस्य तथा
३१ तेन प्रकारेण त्वमेव पुरुषार्थ इत्येवंनिः। कामतया अनुभजतः पदपद्ममेवं तथापि हे आर्य स्वामिन् दीनान् सकामानप्यस्मान् भगवान् अपि परि
पाति संसारभयादित्यपत्येव॥ यतः अनुग्रहणे हिताचरणे कातरः। परवश यथा धेनुः वत्सं क्षीरं पाययति। वृकादिभ्यो रक्षति च॥१७॥१८
स व्यवसितं कल्पितं ततः॥ अयच्छामीत्युक्तं किं तदित्यपेक्षायामाह।१९। हे भद्र ध्रुवाक्षितिः निवासो यस्मिन्नाहितं मर्यितं।२०। धरत्या

सत्याशिषो हि भगवन्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः॥ अप्येवमर्य भगवान्परियाति दीनान्वास्रेव
वत्सकमनुग्रहकातरोस्मान्॥१७॥ मैत्रेय उवाच॥ अथभिष्टुत एवं वै सत्संकल्पेन धीमता॥ भृत्यानुरक्तो भगवान्प्रति
नंद्येदमब्रवीत्॥१८॥ श्रीभगवानुवाच॥ वेदाहं ते व्यवसितं हृदि राजन्यबालकः॥ तत्प्रयच्छामि भद्रं ते दुरापमपि यो
गिनां॥१९॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति॥ यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं।२०॥ मेढ्यां
गोचक्रवत्स्थास्नु पुरस्तात्कल्पवासिनां॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः।२१॥ चरंति दक्षिणी
कृत्य भ्रमंतो यत्सतारकाः॥ प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः॥ षट्त्रिंशद्वर्षसाहस्रं रक्षिता मंडलं भुवः।२२।

भ्रमणाय आक्रम्यमाणानां पशूनां बंधनस्तंभो मेढी तस्यां बलीवर्द इव सम्भवत्। अवांतरकल्पवासिनां परस्तादपि स्थास्नु॥ लोकत्रयना
शेऽप्यनश्वरं॥ धर्मोऽग्न्यादयो नक्षत्ररूपाः। वनौकसः सप्तर्षयः यत् प्रदक्षिणीकृत्य भ्रमंतश्चरंति॥ एतत्सर्वराज्यभोगादनंतरं भविष्यती
त्याह।२१। तुभ्यं पृथ्वीं दत्त्वा पित्रा वनं प्रस्थिते वनं प्रति गमने कृते सति॥ रक्षिता रक्षिष्यसि। त्वया संकल्पितमज्ञत्वस्य तव देहात एवं भवि ३१
ष्यतीत्याह।२२॥

सामुरुचिः॥२३॥ यद्गोहद्दयं प्रिया मूर्त्तिर्यस्यतं॥२४॥ यतः स्थानात॥२५॥ अतिदिप्यद्दला॥२६॥ संकल्पडं मनोरथं॥ पादसेवया प्रापितं॥ प्राप्य
संकल्पस्य निर्वाणं समाप्तिर्यस्मात॥४१॥ मायाविनः सकामस्य यत्सुदुर्लभं हरेः॥ पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानं असिद्धार्थं।

लब्ध्वा तुर्य्यूत्तमेनषेमगाधायां तु तन्मनाः॥ अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति॥२३॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पु
ष्कलदक्षिणैः॥ भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि॥२४॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतं॥ उपरि
ष्टादृषिभ्यस्त्वं यतो नावर्त्तते गतः॥२५॥ मैत्रेय उवाच॥ इत्यर्चितः स भगवान् अतिदिश्यात्मनः पदं॥ बालस्य पश्य
तो धाम स्वमयाद्गरुडध्वजः॥२६॥ सोपि संकल्पजं विष्णोः पादसेवोपसादितं॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोभ्यगात्पुरं
॥२७॥ विदुर उवाच॥ सुदुर्लभं यत्परमं पदं हरेः मायाविनस्तच्चरणार्च्चनार्ज्जितं॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्व
मात्मानममन्यतार्थवित्॥२८॥ मैत्रेय उवाच॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन्॥ नैच्छन्मुक्तिपतेर्मुक्तिं त
स्मात्तापमुपेयिवान्॥२९॥ ध्रुव उवाच॥ समाधिना नैकभवेन यं विदुः सनंदनाद्या ऊर्द्ध्वरेतसः॥ मासैरहं षड्भिरमुष्य पाद
योः छायामुपेत्यापगतः पृथग्मतिः॥३०॥

मिव आत्मनो रथमिव कथममन्यत॥ पुरुषार्थवित् दपि॥२८॥ तापमाह॥ सोऽर्द्धं षड्भिः॥२९॥ नैकेष्वनेकेषु भवायस्मिन्नेकजन्मा स्मत्तेन स्यर्थः प्रण
मस्तुत्यादिसमये गरुडाधिरूढस्य हरेः॥ पादछायां स्थितमात्मानं स्मरन्नाह॥३०॥

ना०च०
३२

यामुपेत्येति ॥ पृथुउवाच इति ॥ नेदृक्‌दृष्टिः सन हाकस्य मितिभावः । अनात्म्यं आत्मस्य नत्वं अज्ञत्वं नवच्छेतुः । पदं तव याचे याचितवानस्मि । अज्ञत्वे
कारणसंभावयति ॥ मतिरिति ॥ ३१ ॥ मदपेक्षया अधः प्राप्तबुद्धिः अत एवासहनशीलैः ॥ नाधुनाप्यवमानं त इत्यादि सत्यमपि नारदस्य वचो
योहं न गृहीतवान ॥ तस्य मे मतिरपहता ॥ ३२ ॥ असुपस्य भाते वपथपन द्वितीयेस्य सत्यपि चोतेवत्रातव्यः शत्रुरिति दृष्ट्याहं दुग्धहृदय

अहो वत ममानात्म्यं मंदभाग्यस्य पश्यतः ॥ भवच्छिदः पादमूलं गत्वायाचे यदंतवत् । ३१ ॥ मतिर्विदूषिता देवैः पतद्भिर
सहिष्णुभिः यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥ ३२ ॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् ॥ तप्ये द्वितीयेप्यसति ।
भ्रातभ्रातृव्यहृद्रुजा ॥ ३३ ॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ॥ प्रसाद्य जगदात्मानं तपसा दुः[illegible] प्रसादनं ॥ ३४ ॥
भवच्छिदमयाचेहं भवं भाग्यविवर्जितः ॥ स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो वत ॥ ३५ ॥ ईश्वरात्क्षीणपुण्येन
फलीकारानिवाधनः ॥ ३६ ॥ मैत्रेय उवाच ॥ न वै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः ॥ वांछंति तद्दा
स्यमृते यदर्थमात्मनो यदृच्छया लब्धः मनः समृद्धयः ॥ ३७ ॥

शोकेन तप्ये ताप मनुभवामि ॥ ३३ ॥ मया प्रसाद्य प्रार्थितं तद्व्यर्थं जातं ॥ कास्व गतायुषि चिकित्सेव ॥ ३४ ॥ एतदेव दृष्टांतस्य माह । स्वारा
ज्यं निजानंदं प्रयच्छतः सकाशात अभिमानः क्षीणपुण्येन मया याचितं । ३५ ॥ क्षीणपुण्येनेति दृष्टांतः ॥ यथा अधनः ईश्वरात् चक्रवर्तिनः
सकाशात्फलीकारान् सतुषतंडुलान् याचेत ॥ तद्वदहमिति भावः ॥ एवं निस्पृहत्वं तस्य युक्तमित्याह । ३६ ॥ तस्य दास्यं विना अन्य मर्थं
आत्मनो नैव वांछंति ॥ यदृच्छयैव लब्धा मनसः समृद्धिर्येषां ते ॥ प्रस्तुतमाह ॥ ३७ ॥ ३२

संप्रेतं मत्वा ॥ आकर्ण्य तन्मिवाक्यं राजानः श्रद्दधे ॥ तथा विश्वासं न चकार ॥ अन्नदस्य मे नन्दनं कुतः इति मत्वा पौराणां वचः न श्रद्दधे ॥ ३८ ॥ देवर्षि
वाक्यं एषत्यचिरत इति सत्वा महाधनं वकुल्यं हारं दत्त्वा पश्चात्कृतकं तत्कान्यपलात ॥ ३९ ॥ अप्यभ्रणा हि नि: पर्यस्तः परिवृतः ॥ ४० ॥ अस्य
राज्ञः महिषी सो मे घोर उत्तमं निधाय एकामेव शिविकां तरं विमानमाहूय ॥ ४१ ॥ उपवनस्थानामासे समीपे ॥ ४२ ॥ पादयो: पतंतं ध्रुवं दोषस्य भु
स्थाप्य चिरं यत्निरे रेसे ॥ तातनत्वं पतन योग्योसी लुत्वा ॥ कुतः विकृकसे

आकर्ण्योत्तमउमायां तं संप्रेत्यं प्रागतं ॥ राजानश्रद्दधे नदमनदस्य कुतो मम ॥ ३८ ॥ अर्द्धेयवाक्ये देवर्षे हर्षवेगेन धर्षि
तः ॥ वार्त्ताहर्त्रे ददिषीतो हारं प्रदान्महाधनं ॥ ३९ ॥ मत्स्यवरथमारुह्य कान्तेश्वर परिष्कृतं ॥ ब्राह्मणैः कुलवृद्धैश्च पर्यस्तो
मात्यबंधुभिः ॥ ४० ॥ शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः ॥ निश्चक्राम पुरात्तूर्णं आत्मजोन्नीदृणोत्सुकः ॥ ४१ ॥ सुनीतिः
सुरुचिश्चास्य महिष्यौ रुक्मभूषिते ॥ आरुह्य शिबिकां सार्द्धं उत्तमेनाभिजग्मतुः ॥ ४२ ॥ तं दृष्ट्वोपवनाभ्यासमा
यांतं तरसा रथात ॥ अवरुह्य नपस्तूर्णमासाद्य प्रेमविह्वलः ॥ ४३ ॥ परिरेभेगजं दोर्भ्यां पतंतं पादयोः पितुः ॥ वि
श्वक्सेनांग संस्पर्शहतपापाघबंधनं ॥ ४४ ॥ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः ॥ स्नापयामास तनयं जातो
द्दाममनोरथः ॥ ४५ ॥ अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः ॥ ननाम मातरौ शीर्ष्णा प्रथमं सुरुचिं ध्रुवः ॥ ४६ ॥
सुवाच भगवान्तं प्रसा... हत्तमसुज्जते ॥ सार्थनामनयदं त्वदधान्मूर्ध्नि मेकरं ॥ ४७ ॥ सुरुचिस्तं समुत्थाप्य पादावनतम
र्भकं ॥ परिष्वज्याह जीवेति चिरं गद्गदया गिरा ॥ ४८ ॥
त्याग...विंनांगसंस्पर्शे निहतमपोघमघं बंधनं यस्य ॥ ४५ ॥ जातउद्दामो महामनोरथो यस्य ॥ ४५ ॥ पित्रा आशीर्भिरभिमंत्रितः तेन संकृ
तसंनामगतो ध्रुवः प्रथमं सुरुचिं नमस्कृत्यो वच ॥ ४६ ॥ ४७ ॥ सुरु...च्याः प्रीतिर्नासंजाविलेत्याह ॥ यस्येति ॥ ४८ ॥

भा०ग०च नमंति अनुसरंति ॥ आपो यथा निम्नं देशं स्वयमेवावतरंति ॥ ५१ ॥ हे वीर वीरसुवः ध्रुवमातुः अभिषिच्यमानाभ्यां पयस्तदा सुस्राव ॥ ५२
३३ चिरं नष्टो दर्शनं प्राप्तः इति दृष्ट्वा रक्षिता रक्षिष्यति ॥ ५३ ॥ ५४ ॥ नृपः उत्तानपादः पुरं वर्णयति चतुर्भिः । तत्रेति ॥ तत्र तत्र सवृंदैः फलमंजरी

यस्य प्रसन्नो भगवान्गुणैर्मैत्रादिभिर्हरिः ॥ तस्मै नमंति भूतानि निम्नमाप इव स्वयं ॥ ४९ ॥ उत्तमश्च ध्रुवश्चोभाव
न्योन्यं प्रेमविह्वलौ ॥ अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः ॥ ५० ॥ सुनीतिरस्य जननी प्राणेभ्योपि प्रियं सुतं
उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता ॥ ५१ ॥ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः ॥ तदाभिषिच्यमानाभ्यां वीर
वीरसुवो मुहुः ॥ ५२ ॥ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा ॥ प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः ॥ ५३ ॥
अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा ॥ यदनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयं ॥ ५४ ॥ लाल्यमानं जनै
रेवं ध्रुवं सभ्रातरं नृप ॥ आरोप्य करिणीं हृष्टः स्तूयमानोविशत्पुरं ॥ ५५ ॥ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः
सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः ॥ ५६ ॥ चूतपल्लववासःस्रक्मुक्तादामविलंबिभिः ॥ उपस्कृतं प्रतिद्वारंअ
पां कुंभैः सदीपकैः ॥ ५७ ॥ प्राकारैर्गोपुरागारैः शातकुंभपरिच्छदैः ॥

युक्तैः पूगपोतैः बालवृक्षैः तद्विधैः फलमंजरीयुक्तैः उपस्कृतं प्रतिद्वारमित्युत्तरेणान्वयः ॥ ५६ ॥ चूतपल्लवाश्च वासांसि ॥ च मुक्तादामा
नि च । तेषां विशेषेण लंबनमस्ति येषु कुंभेषु । ५७ । गोपुरैः पुरद्वारैः आगारैश्च शातकुंभमयपरिछदाः परिकरा येषु विमानानामिव शिखरैः द्यु ३३
तिर्येषां तैः ॥ ५८ ॥

चत्वरं संगराणां रथ्या महामार्गः ॥ अट्टः उच्चस्थोपरि निर्मितात्मिकाः मार्गो वांतरः मृष्टाः समार्जिताश्चत्वरादयो यस्मिन् ॥५८॥ सिद्धार्थैः श्वे
तसर्षपाः अक्षतायवाः उडडुः अकिरन् सतीसत्यः ॥६१॥ ६२ यत्र भवनोत्तमे ॥६३॥ पद्मादिमत्यो वाप्य ॥६६॥ ६७ ऊर्ध्ववयसं प्राप्तयौवनं

सर्वतोलंकृतं श्रीमत्विमानशिखरद्युतिः ॥ मृष्टचत्वररथ्याट्टमार्गं चंदनचर्चितं ॥५८॥ लाजाक्षतैः पुष्पफलैः तंडु
लैर्बलिभिर्युतं ॥ ध्रुवायपथिदृष्टाय यत्र तत्र पुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च ॥ उपजह्रुः प्रयुंजा
नावात्सिल्यादाशिषः सती अश्रवं स्तद्वल्गुवंगीतिप्राविशद्भवनं पितुः ॥६१॥ महामणिव्रातमये स तस्मिन् भवनोत्तमे
लालितोनितरां पित्रान्यवसद्दिविदेववत् ॥६२॥ पयः फेननिभाः शय्यादांता रुक्मपरिच्छदा ॥ आसनानि महार्हाणि यत्र
रौक्मा परिस्कराः ॥६३॥ यत्र स्फटिककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभांति ललनारत्नसंयुता ॥६४॥ उद्या
नानि विचित्राणि रम्याणि विविधैर्द्रुमैः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥६५॥ वाप्यो वैडूर्यसोपानाः पद्मो
त्पलकुमुद्वतीः हंसकारंडवकुलैः ॥ जुष्टाश्चक्राह्वसारसैः ॥६६॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तत् श्रुत्वा
दृष्ट्वाद्भुतं तं मन्ये देवि विस्मयं परं ॥६७॥ वीक्ष्योढवयसं पुत्रं प्रकृतीनां च संमतं ॥ अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः प
तिं ॥६८॥ आत्मानं च प्रवयसं माकलय्य विशांपतिः ॥ वनं विरक्तः प्रातिष्ठत् विमृशन्नात्मनो गतिं ॥६९॥ इति श्री
भागवते महापुराणे चतुर्थस्कंधे ध्रुवचरित्रे नवमोध्यायः ॥ ९ ॥

अनुरक्ताः प्रजा यस्मिन् ॥६८॥ प्रवयसं वृद्धं आत्मनो गतिं आत्मतत्वं ॥६९॥ इति भागवते चतुर्थस्कंधे टीकायां नमोध्यायः ॥ ९ ॥

भा०च०
३४

दशमे भ्रातृहननं यक्षा ग्रामकरोद्बलं॥ १ कुबेरालकां गत्वा तस्य विक्रम उच्यते १॥ इलायां द्वितीयस्यां भार्यायां ध्रुवः योषितां रत्नं अजीज
नत् इत्यनकृत्यं रत्नं मनोहरं २ अकृतोद्वाहो हिमवति हतः॥ असजातिं गता मते तस्यर्थः ३ कोपामर्षशुचा दुःखैः॥ तेनार्पितः व्याप्तः जैत्रं
जयहेतु॥ पुण्यजनालयं अलकां ४ रुद्रानुचराः कूष्माण्डोन्मादकाः नृत्यादयः दध्मौ वादितवान्॥ येन शंखनादेन हे क्षत्तः। उपदे

मैत्रेय उवाच॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः॥ उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ॥ १॥ इलायामपि भार्यायां वा
योः पुत्र्यां महाबलः॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत्॥ २॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा॥ हतः पु
ण्यजनेनाद्रौ तन्मातास्य गतिं गता॥ ३॥ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः॥ जैत्रं स्यंदनमास्थाय गतः पु
ण्यजनालयं॥ ४॥ गत्वोदीचीं दिशं राजा रुद्रानुचरसेवितां॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलां॥ ५॥ दध्मौ शं
खं महाबाहुः खं दिशश्चानुनादयन्॥ येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन्भृशं॥ ६॥ ततो निःक्रम्य बलिन उपदेवम
हाभटाः॥ असहंतो तन्निनादं तमभिपेतुरुदायुधाः॥ ७॥ स तानापततो वीरः उग्रधन्वा महारथः॥ एकैकं युगपत्सर्वान्
अहन्बाणैस्त्रिभिस्त्रिभिः॥ ८॥ ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि॥ मत्वा निरस्तमात्मानमाशंसन्कर्म तस्य तत्॥
९॥ तेपि चामुममृष्यंतः पादस्पर्शमिवोरगाः॥ शरैरविध्यन्युगपद्द्विगुणं प्रचिकीर्षवः॥ १०॥
ति

व्यो यक्षस्त्रियः ६। ७॥ एकं त्रिभिस्त्रिभिः॥ सर्वात्रयोदशानि युतानि अयुतं दशसाहस्रं एकलक्षं त्रिंशत सहस्राणि निरस्तं पराजितं
तस्य ध्रुवस्य तत्कर्म आशंसन् तुष्टुवुः ९॥ ते यक्षाः तत्कर्म ध्रुवस्य कर्म असहमानाः॥ अमुम विध्यन् द्विगुणं षड्भिः प्रतिकर्तुं प्रतीकारं कर्तु ३४
मिच्छवः १०॥

चित्रवाडैः चित्रपिछैः ॥ २१ ॥ २२ ॥ आसारेणधारासंपातेनकृत्स्नोगिरिरिवतेनवादृप्रपत ॥ २३ ॥ सूर्यः सूर्यतुल्यः ॥ २४ ॥ यातुधानेषुराक्षसेषु ड
यकाप्रिंबुडितडितमितिडपप्रकारेषुसत्सु ॥ २५ ॥ व्यधमत्संचूर्णयामास ॥ चर्माणिकवचानिहारप्रमुखेराततताः प्रकीर्णारेजुरिति

ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः ॥ आजघ्नुस्ते शिनिर्नुप्तांडैनिः चित्रवाडैः पुरैरपि ॥ २१ ॥ अथवर्षेन प्रकुपिताः सरथं सह
त सारथिं ॥ छत्तं कृतप्रतीकर्तुमयुतानांत्रयोदप्राः ॥ २२ ॥ सोत्तानपादिः सततत्प्राश्रवर्षेणाभूरिणा ॥ नदुपादिपपुतछन्न
आसारेणयथागिरिः ॥ २३ ॥ हाहाकारोमहानासीत्सिद्धानांदिविपश्यतां ॥ हतोयंमानवः सूर्योमग्नः पुण्यजनार्णवे ॥ २४ ॥
नदत्सुयातुधानेषुजयकाशिषुसंयुगे ॥ उदतिष्ठद्रथस्तस्यनीहारादिवभास्करः ॥ २५ ॥ धनुर्विस्फूर्जयन्दिव्यंद्विष
तांखेदमुद्वहन् ॥ अस्त्रौघंव्यधमद्बाणैर्घनानीकमिवानिलः ॥ २६ ॥ तस्यतेचापनिर्मुक्ताभित्वावर्माणिरक्षसां ॥ कायानां
विविशुस्तिग्मागिरीनशनयोयथा ॥ २७ ॥ भल्लैः संछिद्यमानानांशिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भि
र्वलयवल्गुभिः ॥ २८ ॥ हारकेयूरमुकुटैरुष्णीषैश्चमहाधनैः ॥ आस्तृतास्तारणभुवोरेजुर्वीरमनोहराः ॥ २९ ॥ हताव
शिष्टाइतरेरणाजिराद्रक्षोगणाः ॥ क्षत्रियवर्यसायकैः ॥ प्रायोविवृक्णावयवाविदुद्रुवुः मृगेंद्रविक्रीडितयूथपाइव ॥ २० ॥ श्री
अपश्यमानः सतदाततायिनंमहामृधेकंचनमानवोत्तमः ॥ पुरींदिदृक्षन्नपिनाविशद्द्विषांनमायिनांवेदचिकीर्षितंज
न ॥ २१ ॥ इतिब्रुवंश्चित्ररथः ससारथिंयत्तः परेषांप्रतियोगशंकितः ॥ २२ ॥

द्वयोरन्वय ॥ २९ ॥ प्रायोबाहुल्येनवि ॥ वृक्णाः संछिन्नाअवयवायेषांतेदुद्रुवुः ॥ आततायिनंशस्त्रधराणांयक्षाणांमध्येकंचनापश्यमानोपि
पुरींदिदृक्षन्नपिनाविशत ॥ २१ ॥

ना० २० त्रिचरयो ध्रुवः पत्नः । यत्नः यत्नवान् प्रतियोगः पुनरुद्योगः तस्मा क्ंकितः ननन्द ततो वा यो हेलोः ॥२३॥ विस्फुरंतस्त...डितो यस्मिन् स्तनयित्नवो मेघा
३५ नद्यो यस्मिन् ॥२३॥ ववृषुः निपेतुः सदतिपारीरमिति ॥ असृक्श्लेष्मादि मेदसः पुंस्त्वमार्ष मेदांस्य स्याग्रतो निपेतुः ॥२६॥ साश्मवर्षिणः असमस

सुश्रावकाशं डलधेरिवेरितं नभस्वतो दिक्षु रजोन्वदृश्यत ॥२२॥ क्षणेनाच्छादितं व्योम घनानीकेन सर्वशः ॥ विस्फुरं तडि
ताद्दिक्षु त्रासयं स्तनयित्नुना ॥२३॥ ववृषु रुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनादस्य कबंधान्यग्रतोनघ
तो ॥२४॥ ततः खेदृश्यत गिरिः निपेतुः सर्वतो दिशं ॥ गदापरिघनिस्त्रिंशा मुशलाः साश्मवर्षिणः ॥२५॥ अहयोशनिनिश्वासाः
वमंतोग्निं रुषाक्षिभिः ॥ अभ्यधावन् गजा मत्ताः सिंहव्याघ्राश्च यूथपाः ॥२६॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो दिशं
आससाद महाह्रादः कल्पांत इव भीषणः ॥२७॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनां ॥ ससृजुस्तिग्मगतय आ
सुर्यो मयया सुराः ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तरां निशाम्य तस्य मुनयः समाशंसत्समागताः ॥२८॥ मुनय ऊचुः ॥ उत्ता
नपाद्भगवान्स्तव शार्ङ्गधन्वा देवः क्षणोत्त्ववनतार्तिहरो विपक्षान् यन्नामधेयमभिधाय निशाम्य चाद्धालोकोंजसा
तरति दुस्तरमंग मृत्युं ॥३०॥ इति श्री भागवते महापुराणे चतुर्थस्कंधे ध्रुवचरित्रे दशमोध्यायः ॥१०॥

त ह्रिर्दिसस्त ॥ तं वर्षतः ॥२५॥ अपानि वह्निः श्वासो येषां ते ॥२६॥ तिग्माक्रूरा गतिः प्रवृत्तिर्येषां ते ॥ असुरा राक्षसादिपादैः ॥ अहरांत स्तेन यक्षाणां वो
त ध्वंते ॥२८॥ तस्य ध्रुवस्य संकल्याणं आशंसन् प्रार्थितवंतः ॥२९॥ तव विपक्षान् घातयन् हिणोतु नाशयतु ॥ अंजसा साक्षात् अंजसा सुखेनैव दु ३५
स्तरं मृत्युं [illegible] ॥३०॥ इति [illegible] दशमोध्यायः ॥१०॥ ॥

एकादशे तु यक्षाणां हृदयं दृष्ट्वा मनुः स्वयं॥ आगत्य वारयामास ध्रुवं तत्रोपदेशतः॥१॥ एवं गदतो वचनं उपस्पृश्य आचम्य यन्नारायणनि-
र्मितं नारायणास्त्रं तत्संदधे॥१॥ क्लेशा रागादयः॥२॥ तस्यार्षास्त्रं ऋषेः॥ श्रीनारायणर्षिप्रोक्तं अस्त्रं प्रयुंजतः संदधतः सुवर्णमयाः पुंखाः मूलभागा ये-
षां॥ कलहंसानां वासांसि पक्षा येषां ते घोरा विनिःसृता इति द्वयं॥३॥ शिलीमुखग्रहणात् उपरि शातप्रधने युद्धे उन्नद्धा उत्थिताः फणा येषां ते॥४॥

मैत्रेय उवाच॥ निशाम्य गदतामेवमृषीणां धनुषी ध्रुवः॥ संदधेस्त्रमुपस्पृश्य यन्नारायणनिर्मितं॥१॥ संधीयमान एता-
स्मिन्मायागुह्यकनिर्मिताः॥ क्षिप्रं विनेशुर्विदुर क्लेशाज्ञानोदये यथा॥२॥ तस्यार्षास्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः क-
लहंसवाससः॥ विनिःसृता आविविशुर्द्विषद्बलं वनं यथा भीमरवाः शिखंडिनः॥३॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरिति-
स्ततः पुण्यजना उपद्रुताः॥ तमभ्यधावन्कुपिता उदायुधाः॥ सुपर्णमुन्नद्धफणा इवाहयः॥४॥ स तान्पृषत्कैरभिधा-
वतो मृधे निकृत्तबाहूरुशिरोधरोदरान्॥ निनाय लोकं परमार्कमंडलं व्रजंति निर्भिद्य यमूर्ध्वरेतसः॥५॥ तान्हन्यमानानभि-
वीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः॥ औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः॥६॥ अलं
वत्सातिरोषेण तमोद्वारेण पाप्मना॥ येन पुण्यजनानेतानवधीस्त्वमनागसः॥७॥ नास्मत्कुलोचितं तात कर्मैतत्सद्वि-
गर्हितं॥ वधो यदुपदेवानामारब्धस्तेकृतैनसां॥८॥ नन्वेकस्यापराधेन तत्संगाद्बहवो हताः॥ भ्रातुर्वधाभितप्तेन त्व-
यांग भ्रातृवत्सल॥९॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनां॥ यदात्मानं पराग्गृह्य पशुवद्भूतहिंसनं॥१०॥

पृषत्कैर्बाणैर्निकृत्ता बाह्वादयो येषां तान् परलोकं निनाय॥ कथंभूतं ऊर्ध्वरेतसः संन्यासिनः अर्कमंडलं निर्भिद्य यं व्रजंति तं॥५॥६॥ अ-
नागसो निरपराधान्॥ तमसो नरकस्य द्वारेण॥ ननु मद्भ्रातृहंतारः कथमकृतैनसः अत आह॥७॥८॥ सत्यपराधे चैतदुचितं न भवतीत्याह
नायमिति॥ पराग्गृह्य परान्तमात्मानं गृहीत्वा॥ पशवो यथा देहाभिमानाद्घ्नंति॥ तथा भूतानां वैशसं हिंसेति यत्॥ त्वं बाल्ये साधुः सन्
इदानीं कथं कृतवानित्याह सद्भिरिति॥१०॥११॥

भा०गा०च० २२ अनुध्याताहृदिस्थितः। तत्पुंसांहरिदासानामपिसाधुत्वेनसतांमतः सतांव्रतमाह। तितिक्षेतितितिक्षांइति।२३॥ महत्सुतितिक्षयानीचेषुकरुण
३६ या। समेषुमैत्र्या अखिलेषुजंतुषुसमत्वेनततः॥ कृतार्थोभवतीत्याह॥२३॥ सुप्रसन्नेसतिगुणैर्विर्युक्तः। अतएवतत्कार्येणजीवेनलिंगश
रीरेणतिर्मुक्तः। सनिर्वाणसुखात्मकंब्रह्मप्राप्नोति॥ नात्महंत्वमंगीकृत्योक्तं। दृष्टानीतुनात्मनोभ्रातपुत्रादिसंबंधः नचान्योन्यहंतत्वादिकर्मस्ति
तृ

सर्वभूतात्मभावेनभूतावासंहरिंभवान्॥ आराध्यापदुराराध्यंविष्णोस्तत्परमंपदं॥२१॥ सत्वंहरेरनुध्यातात्त्पुंसामपि
संमतो॥ कथंत्ववद्यंकृतवाननुशिक्ष्यन्सतांव्रतं॥२२॥ तितिक्षयाकरुणयामैत्र्याचाखिलजंतुषु॥ समत्वेनचसर्वा
त्मानभगवान्संप्रसीदति॥२३॥ सुप्रसन्नेभगवतिपुरुषःप्राकृतैर्गुणैः॥ विमुक्तोजीवनिर्मुक्तोब्रह्मनिर्वाणमृच्छति
॥२४॥ भूतैःपंचभिरारब्धैर्योषित्पुरुषएवहि॥ तयोर्व्यवायात्संभूतिःयोषित्पुरुषयोरिह।२५। एवंप्रवर्त्ततेसर्गः
स्थितिःप्रलयएवच॥ गुणव्यतिकराद्राजन्मायथापरमात्मनः॥२६॥

त्याह। भूतैरितिद्वाभ्यां।२४। भूतैःपंचभिरारब्धैर्देहाद्याकारेणपरिणतैः योषित्पुरुषश्चेतिप्रसिद्धं। तयोर्व्यवायान्मैथुनात्संभूतिः। अन्यपोर्योषितपु मो
रुषयोरिहसंसारोभवति।२५। एवंतावत्सर्गःप्रवर्त्तते॥ एवंपालकाकारेणपरिणतैर्भूतैः॥ एवंस्थितिः। हंतृदेहाकारपरिणतैः प्रलयःसाचसं ३६
सृतिः परात्मनोमायायागुणानांव्यतिकरात्भवतुस्वतः॥ ननुदेहानांजडानांकथंसर्गादिहेतुत्वंतत्राह। निमित्तेति।२६॥

निमित्तमात्रं पुरुषर्षभः ईश्वरः यत्र यस्मिन्निमित्ते सति लोहवत्प्रवर्तते तद्वत् ॥ न तु स चेन्निमित्तं तर्हि तस्याविशेषाद्युगपदेव सर्गादित्रयं न घटेत तन्न ख
ल्विति १७ ॥ कालशक्तिः दुर्विभाव्या अचिंत्या । ननु मित्रादिः स उपसि । निहंति च चौरादिः नेश्वरस्तत्राह ॥ जनेन पित्रादिना जनं पुत्रादिं जनयन् । अं
तकं चौरादिकं तं मृत्युहेतुना मारयन् । अंतकरः स्वयमनंतः ॥ अनादिः आद्यकृत् अव्ययः अक्षीणशक्तिः अस्तु पक्षपातः पित्रादयो नांतरं तु
त्वादिति चेत् । न स्यात्तथा ईश्वरत्तनियंता सर्वकारणमिति । न चैवं कुर्वतोऽपि वैषम्यप्रसक्तिः पक्षपाताभावादित्याह । नवैस्व इति

निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः ॥ व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ १७ ॥ स खल्विदं भगवान्कालशक्त्या
गुणप्रवाहेण विभक्तवीर्यः ॥ करोत्यकर्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥ १८ ॥ सोऽनंतोऽन्तकरः कालोऽनादि
रादिकृदव्ययः ॥ जनं जनेन जनयन् मारयन्मृत्युनांतकं ॥ १९ ॥ न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः ॥
तं धावमानमनुधावंत्यनीशा यथा रजांस्यनिलं भूतसंघाः ॥ २० ॥ आयुषोऽपचयं जंतोस्तथैवोपचयं विभुः ॥ उभाभ्यां रहितः
स्वस्थो दुःस्थस्य विदधात्यसौ ॥ २१ ॥

ज्ञां । १९ । मृत्युरूपस्य समं यथा भवति तथा प्रजाः प्रजाः विशतः तस्य साम्येऽपि न तेषु फलवैषम्यं तत्कर्मतः स्यादिति ॥ स दृष्टांतमाह । तं धा
वंतं अनु अनीशाः कर्माधीनाः भूतसंघा धावंति ॥ अनिलं धावंतं ॥ अनुरजांसीव । तत्र तथा रजसां तमःप्रकाशात्तुल्यगमनादिप्रवेशोऽपि नानात्वस्या
वैषम्यं एवमीश्वरस्यापीति भाव २० । अपचयं अकालमृत्युं उपचयं कालमृत्योः परिरक्षां । यद्वा । अपचयं मशकादौ उपचयं देवादौ स्वस्थत्वात् ॥
उपचयापचयाभ्यां रहितोऽसौ विभुः दुःस्थस्य कर्माधीनस्य विदधाति । एवं मतस्येश्वरः सर्वकादिसंमतः ॥ विवादस्तु नाममात्र इत्याह । केचिदिति २१ ॥

ना०गं०च० कामं वात्स्यायनादयः। मीमांसकाः कर्मन नुकर्मोदीनां तुल्यत्वादिना स्वरूपतोपि भिन्नत्वात्कथमेकमेत्यं तत्राह॥ अव्यक्तेति। २२। अव्यक्तस्याप्रत
३७ वाङ्मेयस्य तथापि स्वत्वे हेतुः नानाशक्तीनामुदयो यस्मात्॥ चिकीर्षितमेव तावत्॥ कोपि न वेद अथ स्वस्य संभवो यस्मात्तमीश्वरं को वेद न कोपि
अपि इति पाठे साहाय्यात्। अतस्तत्वज्ञानामा विप्रो वाप्रो विवादः इत्यर्थः॥ तथा च श्रुतिः को ह्वा वेद क इह प्रवोचत्॥ कुत आयाता कुत इयं सेविसृ
ष्टिः॥ अर्वाग्देवा अस्य विसर्जनाय न को वेद यत आबभूवेत्यादि। ईश्वरवादस्य प्रकृतोपयोगमाह॥ २३॥ न चैते भ्रातृहंतारः॥ उक्तमेव हेतु

केचित्कर्म वदंत्येनं स्वभावमपरे नृप॥ एके कालं परे दैवं पुंसः काममुतापरे॥२२॥ अव्यक्तस्याप्रमेयस्य नानाशक्त्यु कं
दयस्य च॥ न वै चिकीर्षितं तावत्को वेदाथ स्वसंभवं॥२३॥ न चैते पुत्रक भ्रातुर्हंतारो धनदानुगाः॥ विसर्गादानयोस्ता
त पुंसो दैवं हि कारणं॥२४॥ स एव विश्वं सृजति स एवावति हंत्यथ॥ तथापि निरहंकारान्नाज्यते गुणकर्मभिः॥२५॥
एष भूतानि भूतात्मा भूतेशो भूतभावनः॥ स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च॥२६॥ तमेव मृत्युममृतं तात
दैवं सर्वात्मनोपेहि जगत्परायणं॥ यस्मै बलिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः॥२७॥

मनु वदति। विसर्गादानयोर्मृत्युर्जन्मनोः। यद्वा विसर्गः सृष्टिः आदानं संहारः दैवं ईश्वर एव हि कारणं॥ तथापि निर्लेपत्वमाह॥ २४॥ अनहं म
कारत्वे हेतुमाह॥ एष इति। २५। सत्यं ईश्वर एव कर्त्तेति तथाप्यहंकारादिमयत्वेन तत्पक्षं प्राक्च इति चेत् तत्राह॥ तमेवेति चतुर्भिः मृत्युर्मुक्तानां म
ज्ञानां त्वमतं उपेहि शरणं गच्छ तमेवेत्यवधारणे हेतुः॥ यस्मै नसि नासिकायां दाम निर्बद्धा गाव इव॥ विश्वसृजोपि नाम नियंत्रिताः संतो बलिं
हरंतीति तत्कारितं कर्म कुर्वंतीत्यर्थः॥ तदाराधनं च तमुत्स क्रममेवेत्याह॥ २७॥ ३७

यः पंचवर्षः सन् हरिमाराध्य त्रिलोक्याः मूर्द्ध्नि पदं स्थानं लेभे लब्धवान् ॥ अक्षि प्रत्यगक्षं इंद्रियातीतं ।२८॥ इदानीं तमेव अन्विच्छ । अवलोकयेत्यं
गध्रुव ॥ मुक्तविरोधे आत्मनि मनसि व्यपाश्रितं अवस्थितं आत्मदृक् । प्रत्यग्दृष्टिः । अयं स्वेदो यस्मिन् तदिदं भेदं असद्देव विश्वं यस्मिन् प्रतीयते तं

तो
यः पंचवर्षो जननीं त्वां विहाय मातुः सपत्न्या वचसा भिन्नमर्मा ॥ वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्द्ध्नि पदं त्रिलोक्याः
॥२८॥ तमेवमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरं ॥ आत्मानमन्विच्छ विमुक्तमात्मदृग्यस्मिन्निदं भेदमसत्प्र
तीयते ॥२९॥ त्वं प्रत्यगात्मनि तदा भगवत्यनंते आनंदमात्र उपपन्नसमस्तशक्तौ ॥ भक्तिं विधाय परमां शनकैरवि
द्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढं ॥३०॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं ॥ श्रुतेन भूयसा राजन्नगदेन य
थामयं ॥३१॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशं ॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥३२॥ हेलनं गिरिशभ्रा
तुर्धनदस्य त्वया कृतं ॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ॥३३॥ तं प्रसादय वत्साशु संनत्या प्रश्रयोक्ति
भिः ॥ न यावन्महतां तेजः कुलं नोभिभविष्यति ॥३४॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवं ॥ तेनाभिवंदितः सा
कमृषिभिः स्वपुरं ययौ ॥३५॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवमनुसंवादे एकादशोऽध्यायः ॥११॥
मैत्रेय उवाच ॥ ध्रुवं निवृत्तं प्रतिबुद्ध्य वैशसादपेतमन्युं भगवान् धनेश्वरः ॥ तत्रागतश्चारणयक्षकिन्नरैः ॥ संस्तूयमा
नो न्यवदत्कृतांजलिः ॥१॥

तदन्वेषणफलमाह । त्वमिति । त्वं तदान्वेषणकाल एव उपदेशसारमाह ।३०। श्रेयसां प्रतीपं प्रतिकूलं क्रोधं अगदेनौषधेन यथा रोगं तथा यच्छति ॥
तद्धतये नरो येनोपसृष्टाद् व्याप्तात् । अन्यच्च त्वया कार्यमित्याह । द्वाभ्यां ।३२। यत् यतं जघ्निवान् घातितवान् ॥३३॥३४। तेन ध्रुवेणाभिवंदितः सन्
३५ इति चतुर्थस्कंधे टीकायां एकादशोऽध्यायः ॥११॥

नमस्कारे पा:

द्वादशोधर्मदेहेनाभिनंदितःपुरमागतःयक्षैरितिव्याहरेः।स्थानमारोहेतिकथ्यते१।वैयासाद्धधात्संग्रामाद्धातिवर्त्तंज्ञात्वा॥११॥हेक्षत्रियदायाद
क्षत्रियपुत्रःअत्यद्भुतःत्यक्तवान्॥त्वंवैरस्यकारणमस्तीत्याह।ननवानिति।अर्थयन्नावयोःमृत्युर्जन्मनोःकर्त्ताहिहंतातेत्यादिबुद्धिस्ता-
त्राह।अहमिति३।आनातिप्रकाशतेजायतेइत्यर्थः।अतध्यानादेहानुसंधानात्।यथाधियाबंधविपर्ययोदुःखादि।५।तस्मादुक्तं।गत्वा-

ध्रु॰उ॰वा॰॥नमोनमोस्तुत्रिपदापादयरितुष्टोस्मितेनघ॥यत्त्वंपितामहादेशातवैरंदुस्त्यजमत्यजः॥२॥ननवान्नवधीद्य-
क्षान्नयक्षाभ्रातरंतव॥कालएवहिभूतानांप्रभुरप्ययभावयोः॥३॥अहंत्वमित्यपार्थाधीःअज्ञानात्पुरुषस्यहि।
भगवंतं स्वाप्नीवाभात्यतद्ध्यानाद्ययाबंधविपर्ययौ॥४॥तद्गच्छध्रुवभद्रंतेभगवंतमधोक्षजं॥सर्वभूतात्मभावेनसर्वभूता-
त्मविग्रहं॥५॥भजस्वभजनीयांघ्रिमभवच्छिदं॥युक्तंविरहितंशक्त्यागुणमय्यात्ममायया॥६॥वृणीहिकामंनृप
यन्मनोगतंमत्तस्त्वमौत्तानपदेविशंकितः॥यस्माद्वराहोंबुजनाभपादयोरनंतरंत्वांवयमंगशुश्रुम॥७॥मैत्रे-
य॰उ॰वा॰॥सराजराजेनवरायनोदितोध्रुवोमहाभागवतोमहामतिः॥हरौसवव्रेचलितांस्मृतिंययातरत्ययत्ने-
नदुरत्ययंतमः।८॥

चभगवंतंभजस्वेत्युत्तरेणान्वयः सर्वभूतात्मकोविग्रहोयस्य॥माययायुक्तंविरहितं॥सगुणनिर्गुणभेदेन।६।कामंअशंकोचेन।अविशं-
कितःनिर्भयःसन् यस्माद्वराहोसि अनंतरमतिनिकटं।७।सवरायनोदितइत्यनुवादरूपंप्रश्नवाक्यंअतःसवव्रेइतितस्यापौनरुक्त्यं।८॥ ३८

२ द्रव्यक्रियादेवतानां कर्मसाध्यं । फलरूपं फलप्रदं चेत्यर्थः ॥२०॥ सर्वस्यात्मन्यच्युते अर्पितं सर्वे सर्वोपाधिवर्जिते ॥२१॥२२॥ अत्रोगैः यद्वाद्युत्तुषोनेः
२३ वहवः सर्वा यागाः संवत्सरावायस्मिन् तं कालं त्रिवर्गसाधकं नीत्वा । अविकलानि संयतानींद्रियाणि यस्य ॥२४॥ इदं देहादि मायवत्मायया आ
त्मनि स्वस्मिन् रचितं मन्यमानः ॥२५॥ आत्मा देहः स्त्री नार्यात्र अपत्यादीनि च । मायिकमपि पुनः कालेनोपसृष्टं । मतिस्यमाकल्प विशालां वदति । — कं

तस्य प्रीतेन मनसा तां दत्त्वैडविडस्सुतः । पश्यतो तर्इधेसोपि स्वपुरं प्रत्यपद्यत ॥१९॥ अयायजत यज्ञेशं क्रतुभिर्भूरिदक्षि
णैः ॥ द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदं ॥२०॥ सर्वात्मन्यच्युते सर्वे युंजन्नाक्तिमुद्वहन् ॥ ददर्शात्मनि मन्ते वृत्तमेवाव
स्थितं विभुं ॥२१॥ तमेव शीलसंपन्नं ब्रह्मण्यं दीनवत्सलं । गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥२२॥ षट्त्रिंशद्वर्षसाहस्रं
शशासक्षितिमंडलं ॥ नोगैः पुण्यक्षयं कुर्वन् अनोगैरशुभक्षयं ॥२३॥ एवं वकुसवं कालं महात्मा विकलेंद्रियः ॥ त्रिवर्गो
पयकं नीत्वा पुत्रायादात्र्यासतं ॥२४॥ मन्यमान इदं विश्वं मायया रचितमात्मनि । अविद्यारचितं स्वप्नगंधर्वनगरोपमं
॥२५ आत्मस्त्र्यपत्यसुहृदो वलमद्धकोषानंतःपुरं परिविहारभुवश्चरम्याः ॥ नसंडलं डलधिमेखलमाकलय्य कालोपसृष्ट
मिति स प्रययौ विशालां ॥२६॥ तस्यां विशुद्धकरणः शिववार्विगाह्य वद्धासनं जितमरुन्मनसाहृताक्षः । स्थूलेदधारस
गवतप्रतिरूपएतत ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥२७॥

कास्त्रमं तत्र तत्क्रतमष्टांगयोगमाह । तस्यामिति ॥२६॥ तस्याः शिववाः विगाह्य उदकं प्रविश्य स्नानादिनियमाद्युक्ताः । विशुद्धकरण इति यमाद
योयमाः आसनादीनि स्फुटमेवोक्तानि । जितोमरुत् प्राणो येन आहृतानि अक्षाणि येन । भगवतः प्रतिनिधिः स्ते स्थूले विराड्रूपे तन्मनोध
धारः । ध्यायन् अव्यवहतोधात्रिधोयनेदशून्यः सन् समाधौ स्थितः ॥२७॥

भाग० च० ततः स्थूलं विमानं एवमतस्त्वं नि... त्वं हरौ भक्तिप्रकर्षेण असौ ध्रुवो महिमा आत्मानं न सस्मार॥ यतो मुक्तलिंगः त्यक्तशारीराभिमानः तत्र हेतवः
३९ आनंदबाष्पकलया बिंदुप्रवाहेण अभिनन्द्यमानं विक्लिद्यमानं द्रवत् हृदयं यस्य॥ पुलकैर्व्याप्तांगः॥१८॥१९॥ अनु अनंतरं देवप्रवरौ ददर्शे
त्यनुषंगः॥ गदामवष्टभ्य स्थितौ किरीटादिभिः सहिते चारुणी कुंडले ययोः उत्तमैः सनकादिभिर्गीयत इत्युत्तमगायः तस्य मधुद्विषः किंक त

भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः॥ विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानम
स्मरदसाविति मुक्तलिंगः॥१८॥ स ददर्श विमानाग्र्यं नभसोवतरद्ध्रुवः॥ विभ्राजयद्दशदिशो राकापतिमिवोदितं॥१९॥
तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजेक्षणौ॥ स्थितावबष्टभ्य गदां सुवाससौ किरीटहारांगदचा
रुकुंडलौ॥२०॥ विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतक्रमः॥ ननाम नामानि गृणन्मधुद्विषः
पार्षत्प्रधानाविति संहतांजलिः॥२१॥ तं विष्णुपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरं॥ सुनंदनंदावुप
सृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ॥२२॥ सुनंदनंदाऊचतुः भो भो राजन्सुभद्रं ते वाचं नोवहितः शृणु॥ यः पंच
वर्षस्तपसा भवान्देवमतीतृपत॥२३॥ तस्याखिलजगद्धातुरावां देवस्य किंकरौ॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगव
त्पदं॥२४॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परं॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षतारा
परियंति दक्षिणं॥२५॥ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं॥२६॥

ति रौ स विज्ञाय श्रीवासुदेवस्य पार्षतप्रधानाविति हितो साध्वसेन संभ्रमेण विस्मृतः पूजाक्रमः केवलं अस्य नामानि गृणन् ननाम॥२१॥२२॥२३॥२४॥ सु
नडते इति स्वशरीरस्यैव पारगो हाभिप्रायं इति तपतर्पितवान्॥ आवां तस्य पार्षदौ भगवत्पदं॥२५॥ दुर्जयत्वे हेतुः सूरयः सप्तर्षयोपि परमं ३९
प्य केवलमधः स्थिताः पश्यंति॥ पश्यंति चंद्रादयः प्रदक्षिणं यथा भवति तथा परियंति तदधितिष्ठ॥२६॥२६॥

म

आयुष्मन्नेति शरीरेणैवारोहणमित्यभिप्रायः॥२७॥मधुच्युतः स्रवतीति मधुच्युत्॥यस्य नाम्नो मंगलत्वाविर्भावमित्यर्थः।कृतं नित्यकर्म मंगलं
चालंकरणं येन॥मुनीन् प्रणम्य तेभ्य आशिषं वाचयामास॥२८॥तदेव रूपं प्रकाशयवकूलं हिरण्मयं विभ्रत सन् तद्विमानं आरोढुमि-
षेष॥एकत्य गृहं विमानं अयं भाव॥यदा ध्रुवः विमानमारोढुमैच्छत तदा मृत्युरागत्य प्रणम्योवाच॥हे महाराज मामंगीकुरु।उवाच ध्रु-

एतद्विमानंप्रवरमुतमश्लोकमौलिना॥उपस्थापितमायुष्मन् अधिरोढुं त्वमर्हसि।२७।मैत्रेय उवाच।निशम्य वैकुंठनि- म
योज्यमुख्ययोः॥मधुच्युतां वाचमुरुक्रमप्रियः कृताभिषेकः कृतनित्यमंगलो मुनीन् प्रणम्याशिषमभ्यवादयन्।२८॥
परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च॥इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयं।२९॥तदोत्तानपदः पुत्रो ददर्शांतक- सं
मागतं॥मृत्योर्मूर्ध्नि पदं दत्वा आरुरोहाद्भुतं गृहं॥तदा दुंदुभयो नेदुः मृदंगपणवादयः॥गंधर्वमुख्याः प्रजगुः पे-
तुः कुसुमवृष्टयः॥३१॥स च स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः॥अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्ट-
त पं।३२।इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ॥दर्शयामासतुर्देवीं पुरो यानेन गच्छतीं।३३।तत्र तत्र प्रशंसद्भिः पथि वै-
मानिकैः सुरैः॥अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान्।३४।त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि॥पर-
स्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाभ्यगात्।३५॥

वः।स्वागतं ते कृष्णं तावदुपविशाति।एवमुक्त्वा ध्रुवः विष्णोः स्मरणं कृत्वा मृत्योर्मूर्ध्नि पदं दत्वा विमानाग्रमारुरोह।३०।दीनां वैकुंठमारोढुम
समर्थां हित्वा अगं दुर्गमं त्रिविष्टपमेकाकी कथं यास्यामीत्यन्वस्मरत।३२।व्यवसितमभिप्रायं व्यवसाय ज्ञात्वा देवयानेन देवमार्गेण विमानेन पुरो ग-
च्छती दर्शयामासतुः॥३३॥३४॥मुनीन् सप्तर्षीनपि ततः परस्तात् यद्विष्णोः पदं तदभ्यगात् ध्रुवा गतिर्यस्य सः॥३५॥

भा० च०
८० यतुभ्राजमनुयस्यरुचालोकाविभ्राजते ॥ ये अननुग्रहाः निःकृपास्ते यत्राव्रजन्न गतवंतः ॥३६॥ अच्युतएवप्रियःबांधवो येषां ॥३७॥ अतिमि
षं अनिलसं ज्योतिषां चक्रं यस्मिन् ॥ आहितं अर्पितं सद्भ्रमति ॥ मेढ्यां माहितो गंभीरवेगो गवांगणइव ॥३८॥ आतोद्यं वीणां वितुदन् वादयन्
प्रचेतसां सत्रे भगवन्माहात्म्यगाथाः प्रस्तावे ॥ ध्रुवमहिमस्तुतिपादनपरां ॥ श्लोकानलोकानगायत तानाह ॥ नूनमिति ॥३९॥ पतिरेवदैवतायस्याः देव

यद्भ्राजमानंस्वरुचैवसर्वतोलोकास्त्रयोह्यनुविभ्राजंतएते ॥ यन्नाव्रजंजंतुषुयेननुग्रहाः ॥ व्रजंतिभद्राणिचरंतियेनि
षं ॥३६॥ शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः ॥ यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ॥३७॥ इत्युत्तानपदः
पुत्रोध्रुवः कृष्णपरायणः ॥ अभूत्त्रयाणांलोकानांचूडामणिरिवामलः ॥३८॥ गंभीरवेगोनिमिषंज्योतिषांचक्रमर्पि
तं यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ॥३९॥ महिमानंविलोक्यास्यनारदोभगवानृषिः ॥ आतोद्यंवितुदन्
श्लोकान्सत्रेगायत्प्रचेतसां ॥४०॥ नारदउवाच ॥ नूनंसुनीतेःपतिदेवतायाःतपःप्रभावस्यसुतस्यतांगतिं ॥ दृष्ट्वाभ्युपा
यानपिवेदवादिनोनैवाधिगंतुंप्रभवंतिकिंनृपाः ॥४१॥ यःपंचवर्षोगुरुदारवाक्शरैःभिन्नेनयातोहृदयेनदूयतावनं
मदादेशकरोजितंप्रभुंजिगायतद्भक्तगुणैःपराजितं ॥४२॥ यःक्षत्रबंधुर्भुवितस्याधिरूढमन्वारुरुक्षेदपिवर्षपू
गैः षट्पंचवर्षो [illegible] यदहोरल्पैः ॥ प्रसाद्यवैकुंठमवापतत्पदं ॥४३॥

तस्याः सुतस्य यस्तपःप्रभावः ॥ तस्य तां गतिं फलमधिगंतुं वेदवदनशीलाः ॥ ब्रह्मर्षयोपि अभ्युपायान् भगवद्धर्मान् दृष्ट्वापि मनसाप्यधिगं
तुं प्राप्तुं नैव प्रभवंति ॥ किंपुनर्नृपाः तपःप्रभावां गतिं विशिनष्टि ॥ द्वाभ्यां य इति ॥४०॥ गुरुदाराः पितृपत्नी सुरुचिः ॥ तस्या वाक्शरैर्निर्भिन्ने ८०
न हृदयेन वनं यातः सन् ॥ अजितं अपि यो जिगाय वशीकृतवान् ॥४२॥

तस्याधिरूढं तेन प्राप्तं पदं यो नु विद्वत्तबंधुः क्षत्रियापसदः ॥ तमनु वर्षसमूहैरपि आरोढुमिच्छेदपि ततः कल्पोपप्राकयः । ह्ररतः आरोहणमित्य
र्थः ॥ ४१ ॥ कथं भूतं पदं पंचषवर्षाणि यस्य सः ॥ अल्पैरेवाहोभिः वैकुंठं प्रसाद्य यत्तस्य पदमवाप ॥ ४२ ॥ उद्दामं उत कृष्णं यशो यस्य कथं भूतं चरित्रं
सतां संमतं ॥ ४३ ॥ धन्यं प्राप्यादेर्निमित्तं ध्रौव्यं ॥ ध्रुवस्यानंदप्रापकं ॥ प्रपाप्य प्रपूर्णांसाहि ॥ अघमर्षणं पापतापात् ॥ ४४ ॥ अच्युतप्रियप्रियस्य चे

श्रीमैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं यत्पृष्टोऽहमिह त्वया ॥ ध्रुवस्योद्दामयशसश्चरित्रं संमतं सतां ॥ ४३ ॥ धन्यं यशस्यमायुष्यं
पुण्यं स्वस्त्ययनं महत् । स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणं ॥ ४४ ॥ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितं । भवेद्
भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥ ४५ ॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनां सायं च पुण्यश्लोकस्य ध्रुवस्य चरि
तं महत् ॥ ४६ ॥ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा । दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥ ४७ ॥ श्रावयेच्छ्र
द्दधानानां तीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानं तुष्ट इति सिध्यति ॥ ४८ ॥ महत्त्वमिच्छतां तीर्थं श्रोतुः शी
लादयो गुणाः ॥ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां ॥ ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतं । कृपालोर्दीननाथ
स्य देवास्तस्यानुगृह्णते ॥ ५० ॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ॥ हित्वार्भकः क्रीडनकानि मातु
र्गृहं च विष्णुं शरणं यो जगाम ॥ ५१ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे द्वादशोऽध्यायः ॥ १२ ॥ श्रीसूत उवा
च ॥ निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं ॥ प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्र
चक्रमे ॥ १ ॥

ष्टितं । श्रुत्वा योऽवर्तेत तत्स्य भक्तिर्भवेत् ॥ ४५ ॥ समवाये सभायां ॥ ४६ ॥ ४७ ॥ नेच्छन् निःकामः श्रवणे आत्मैवात्मानं प्रति संतुष्टो भव
तीति हेतोः सिध्यति । सिद्धिलक्षणं प्राप्नोति ॥ ४८ ॥ तीर्थं महत्प्राप्तिस्थानं यस्मिन् श्रुते श्रोतुः शीलादयो गुणाः भवंति । किंच सत्पथे भगव
न्मार्गे अमृतरूपं ज्ञानं यो दद्यात् । अनुगृह्णते । अनुग्रहं कुर्वंति ॥ ५० ॥ हे कुरूद्वह परीक्षित् । विदुरेति वा ॥ ५१ ॥ इति चतुर्थे द्वादशः ॥ एवं पं
चभिरध्यायैर्ध्रुवचरित्रं वर्णितम् । सप्तोत्तमपाति चित्रं पृथुचरित्रमुच्यते ॥ १ ॥

स

भा०ग०४ तत्रत्रयोदशे वक्तुं पृथोर्दुर्नमध्रुवान्वये ॥ अङ्गं गोवेनपितासुत्रोर्याविदुतश्चलीयते ।१। प्रश्नो नारदो नामोनक्तिर्यस्य ।२। अन्ववाये वंशे ।२। येना
६२ रदेन प्रचेतसां परिचर्याविधिः प्रोक्तः ।३। स्वधर्मशीलैः प्रचेतोभिः ।४। ध्रुवस्य वंशो जाता इति । वक्तुं ध्रुवस्य वंशमनुक्रामति ।५। पितुः
अधिराजासनं श्रियं च नैच्छत । अनिच्छायां हेतुमाह स इति चतुर्भिः ।६। आत्मानं स्वस्वरूपं नतं ।७। स्वयं तु सर्वस्मादन्यः सन्निर्वा

वि०१ के ते प्रचेतसो ना

विदुर उवाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत । कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासते ।१। मन्ये म
हाभागवतं नारदं देवदर्शनं ॥ येनैवोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥२। स्वधर्मशीलैः पुरुषैर्भगवान् य
ज्ञपुरुषः । इज्यमानो भगवता नारदेनेरितः किलः ।३॥ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः ॥ मह्यं शुश्रू
षवे ब्रह्मन् कार्त्स्न्येनाचष्टुमर्हसि ।४॥ मैत्रेय उवाच ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनं । सार्वभौमश्रियं नै
च्छदधिराजासनं पितुः ।५॥ स जन्मनोपशान्तात्मा निःसंगः समदर्शनः ददर्श लोके विततमात्मानं लोकमात्मनि ।६॥
आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहं ॥ अवबोधरसैकात्म्यमानंदमनुसंततं ।७॥ अव्यवच्छिन्नयोगाग्नि
दग्धकर्ममलाशयं ॥ स्वरूपमवरुंधानो नात्मनोऽन्यं तदैक्षत ।८॥

णं सान्तं अवबोधरसेनैकात्म्यं यस्मात् अनुसंततं निरन्तरं आनंदं ऐक्षत । इत्युत्तरेणान्वयः ।८। आत्मानं ब्रह्म अवरुंधान जानन् आत्मनो
नान्यं तदैक्षत । कथं तमात्मानं अव्यवच्छिन्नो योयोगः स एवाग्निस्तेन दग्धः कर्ममल आशयो यस्य ।९॥ ६२

डडादीनामिवाकृतिर्यस्य। तथाप्यतोलक्षितः अतन्मतिः न तेषां जडादीनामिव मतिर्यस्य सर्वज्ञत्वात्॥ प्रशांतान्यर्चींषि ज्वाला यस्य तद्व
तस्थितः॥१०॥ यवीयांसं मुख्यं कनिष्ठं॥११॥ स्ववीथिर्नाम इष्टा प्रिया॥१२॥ प्रदोषो रजनीमुखं। निशीथोर्धरात्रिः व्युष्टः प्रातःकालः तद

जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः॥ लक्षितः पथि बालानां प्रशांतार्चिरिवानलः॥१०॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः
समंत्रिणः॥ वत्सरं नृपतिं चक्रुर्यवीयांसं भ्रमेः सुतं॥११॥ स्ववीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान्॥ पुष्पार्णं तिग्म
केतुं च इषमूर्जं वसुं जयं॥१२॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः॥ प्रातर्मध्यंदिनं सायं इति ह्यासन् प्रभासुताः॥१३॥ प्र
दोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः॥ व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे॥१४॥ स चक्षुः प्रियमाकूत्यां प
त्न्यां मनुमवाप ह॥ मनोरसूत महिषी विरजान्नड्वला सुतान्॥१५॥ पुरं कुत्सं त्रितं द्युम्नं सत्यवंतमृतं व्रतं॥ अग्निष्टोमम
तीरात्रं प्रद्युम्नं शिबिमुल्मुकं॥१६॥ उल्मुकोऽजनयत्पुत्रान्पुष्करिण्यां षडुत्तमान्॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं
॥१७॥ सुनीथांगस्य या पत्नी सुषुवे वेनमुल्बणं॥ यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात्॥१८॥ यमंग शेपुः कुपिताः
वाग्वज्रा मुनयः किल॥ गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करं॥१९॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः॥
जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः॥२०॥

भिमानिनो देवताः॥१४॥ स सर्वतेजाः चक्षुः संज्ञं मनुं सुतमवाप। मनोर्महिषी नड्वला विरजान् अकल्मषान्॥ पुत्रानसूत तानाह॥१५॥ पुरुप्रभृतीने
कादश॥१६॥१८॥ अंग हे विदुर वागेव वज्रं येषां॥ ममंथ तेनोहेतुमाह॥ अराजकेति॥१९॥ आद्यः पुरग्रामादीनां तेन रचितत्वात्॥२०॥

वि वे न

यो
नागविं
६२

ययायस्याः प्रजायाः हेतोः विमनाः सन् ययौ ।२१। अंहः अपराधं वेनं उद्दिश्य अलक्षयं तो यमधर्मं इत्याह ।२२। नावध्येयः अवज्ञां न अर्हति । पराव
रविदां कार्यकारणज्ञानां मध्ये श्रेष्ठः ।२४। अङ्गः अनाबी पुत्रः । काम्यकर्मणा बलादुत्पादितो न सुखाय न वेदितिद्योतयन्नंगस्य पुत्रोत्पत्तिं

विदुर उवाच ॥ तस्य शीलनिधेः साधोः ब्रह्मण्यस्य महात्मनः । राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥२१॥ किं वांहो वे
न उद्दिश्य ब्रह्मदण्डमयूयुजत् । दण्डव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥२२॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि । य
दसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥२३॥ एतदाख्याहि मे ब्रह्मन् सुनीथात्मजचेष्टितम् । श्रद्दधानाय भक्ताय त्वं परा
परवित्तमः ॥२४॥ मैत्रेय उवाच ॥ अङ्गोऽश्वमेधं राजर्षिराजहार महाक्रतुम् । नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादि
भिः ॥२५॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः । हवींषि हूयमानानि न ते गृह्णन्ति देवताः ॥२६॥ राजन् हवींष्यदु
ष्टानि श्रद्धयासादितानि ते । छन्दांस्ययातयामानि योजितानि धृतव्रतैः ॥२७॥ न विदामेह देवानां हेलनं वयमण्वपि
ति यन्न गृह्णन्ति भागान् स्वान् ये देवाः कर्मसाक्षिणः ॥२८॥ मैत्रेय उवाच ॥ अङ्गो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः
तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥२९॥ नागच्छन्त्याहुता देवा न गृह्णन्ति ग्रहानिह । सदसस्पतयो ब्रूत किमव
द्यं मया कृतम् ॥३०॥ सदस्या ऊचुः ॥ नरदेवेह भवतो नाघं तावन्मनाक् स्थितम् । अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः ॥३१॥

समाह ।२४। अंग इति ।२५। २६। अयातयामान्यगतवीर्याणि ।२७। २८। यन्न गृह्णन्ति तन्नो न विद्मः । वाचं व्यसृजत् । आहुताः आहूताः ग्रहान् सोमपा
त्राणि इह यज्ञे न गृह्णन्ति ।३०। इह तावन्मनागपि अघं न स्थितं कथंचिज्जातस्य सद्य एव प्रायश्चित्तैः क्षालनात् । किंतु प्राक्तनमेक ६२

मघमस्ति यद्यस्मादीदृग्गुणाधिकोऽपि त्वं प्रजारहितः ।३१॥

यथा देवा हविर्गृह्णंति तथात्मानं सप्रश्रयं साधय॥ कथं साधनीयं॥ तदाह इष्ट इति।३२। तथा सति स्वभागान् गृहीष्यंति॥ यद्यतो हरिः साक्षात्तव
तनयः स्यात्॥ अतस्तेन सह सर्वे देवा अंशगामिष्यंतीत्यर्थः। ननु तुच्छान् कामान् हरिः कथं दद्यात्तत्राह॥ तांस्तानिति।३३।३४। प्रजातये स्वपुत्रोत्प
त्तये शिपिविष्टु पशुषु यज्ञरूपेण प्रविष्टाय॥ तथा च श्रुतिः॥ यज्ञो वै विष्णुः शिपिविष्टः पशव एव पशुषु प्रतिष्ठतीति।३५। तस्मादग्नेः॥३६॥ पत्न्यै

तथा साधय भद्रं ते आत्मानं सप्रश्रयं नृप॥ इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक्।३२॥ तथा स्वभागधेयानि ग्रहीष्यं
ति दिवौकसः॥ यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः।३३॥ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयते जनः॥ आराधितो य न्या
थैवैष तथा पुंसां फलोदयः।३४॥ इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये॥ पुरोडाशं निरवपन् शिपिविष्टाय विष्ण
वे।३५। तस्मात्पुरुष उत्तस्थौ हेममाल्यमलांबरः। हिरण्मयेन पात्रेण सिद्धमादाय पायसं।३६॥ स विप्रानुमतो राजा गृ
हीत्वांजलिनौदनं॥ अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः॥३७॥ सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युरादधे॥ गर्भं का
ल उपावृत्ते कुमारं सुषुवे प्रजा।३८॥ स बाल एव पुरुषो मातामहमनुव्रतः॥ अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः।३९
स शरासनमुद्यम्य मृगयुर्वनगोचरः॥ हंत्यसाधुर्मृगान्दीनान् वेनोसावित्यरौज्जनः।४०॥ आक्रीडे क्रीडतो बालान्वय
स्याननतिदारुणः॥ प्रसह्य निरनुक्रोशः पशुमारममारयत।४१। तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृप॥ यदा न शासितुं क
ल्पो न भृशमासीत सुदुर्मनाः।४२॥

तद्धुतशेषं पायसं प्रादात्। तस्या अपत्युः सकाशाद्गर्भमादधे॥ कथंभूतं तत्पुंसवनं॥ पुमांसं सूतेऽनेनेति॥ तथा तं अप्रजा सती।३८। माताम
हमृत्युं मत्वोहि पुत्री सुनीथा।३९। मृगयुर्लुब्धकः सन् तं दृष्ट्वा वेनोसावागच्छतीति जनः सर्वेप्यरौत् चुक्रोश।४०॥४१॥

भा०च० विकल्पदृष्ट्वा दुर्मनस्तस्य कुपुत्रनिंदावाक्यान्याह । प्रायेणेति त्रिभिः ४२ ॥ ये गृहमेधिनः अप्रजाः तैः प्रायेण देवोर्चितः । तत्र हेतुः कुत्सितेर
४३ स्मतैः संभृतं धारयितुमशक्यं दुःखं येन विंदंति ४३ सर्वेषां सर्वैः सह । आधिर्मानसी व्यथा ४४ ॥ प्रजापदेशं पुत्रनाममात्रमपि आत्मनो मोह
बंधनं यदर्थाः यन्निमिताः क्लेशदा गृहा भवंति । इदानीं निर्वेदहेतुत्वेन कुत्सितमेवापत्यमभिनंदति । कदपत्यमिति ४५ ॥ शुचां पदात् शोकाना

प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः । कदपत्यभृतं दुःखं ये न विंदंति दुर्भरं ४३ ॥ यतः पापीयसी कीर्त्तिः । अधर्मश्च
महान्नृणां ॥ यतो विरोधः सर्वेषां यत आधिरनंतकः ४४ । कस्तं प्रजापदेशं वै मोहबंधनमात्मनः । पंडितो बहु मन्येत यद
र्थाः क्लेशदा गृहाः ४५ ॥ कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् ॥ निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ४६ ॥
एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय महोदयोदयात् ॥ अलब्धनिद्रोऽनुपलक्षितो नृभिः ॥ हित्वा गतो वे
नसुवं प्रसुप्तां ४७ ॥ विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः । विचिक्युरुर्व्यामतिशोककातराः
यथा निगूढं पुरुषं कुयोगिनः ४८ ॥ अलक्षयंतः पदवीं प्रजापतेः हतोद्यमाः प्रत्युपसृत्य ते पुरीं । ऋषीन्समेतानभि
वंद्य साश्रवो न्यवेदयन्पौरव भर्तृविप्लवं ४९ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे विदुरमैत्रेयसंवादे
त्रयोदशोऽध्यायः ॥ १३ ॥

स्थानात् । वरत्वे हेतुः निर्विद्येतेति । तत्कुतः यद्यतः कदपत्यात् गृहाः क्लेशनिवहा भवंतीति ४६ ॥ महोदयानां विभूतीनां उदयो य
४ स्मिन् ॥ तस्माद्गृहात् उतः वेनं सूतोसौ तां ४७ ॥ प्रजाः पुरोहितादयः । विचिक्युरन्वेषयत वंतः तत्रैव संतमपि नापश्यन्निति दृष्टांतेनाह ४३
४८ ॥ साश्रवः रुदंतः भर्तुर्विप्लवमदर्शनमित्यर्थः ४९ ॥ इति चतुर्थे त्रयोदशः १३ ॥

वतुद्दिशोतुद्‌दुः पुत्रनयात्संगे गतेति द्विडैः ॥ अनिषिक्तस्य वेनस्य रोषात्तैर्वध उच्यते ॥१॥ क्षेमदर्शिनः क्षेमचिंतकाः पशुसाम्यतां पशुसमानरूपतां प
तांप्रयंतः ॥१॥ अमात्यादीनां प्रकृतीनां असंमतमपि पाठांतरे प्रकृत्या स्वभावेन संमतां ॥२॥ चौरा लीना बभूवुः ॥३॥ आरूढं नृपस्थानं राज्या
सनं येन स उन्नद्धविभूतिभिः लोकपालैश्वर्यैः ॥४॥ ५॥ ६॥ सत्रिणः मिलिताः संतः ॥७॥ मलतश्चागृतस्यदीप्तेकाष्ठे तन्मध्यवर्तिनां पिपीलिकादी

भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ॥ गोप्तर्यसति वै नृणां पश्यंतः पशुसाम्यतां ॥१॥ वीरमातरमाहूय सुनीथां
ब्रह्मवादिनः ॥ प्रकृत्यसंमतं वेनमभ्यषिंचन्पतिं भुवः ॥२॥ श्रुत्वा नृपासनगतं वेनमत्युग्रशासनं ॥ निलिल्युर्दस्यवः सद्यः
सर्पत्रस्ता इवाखवः ॥३॥ स आरूढनृपस्थान उन्नद्धोष्टविभूतिभिः ॥ अवमेने महाभागान् स्तब्धः संभावितः स्वतः
एवं मदांध उत्सिक्तो निरंकुश इव द्विपः ॥ पर्यटन्रथमास्थाय कंपयन्निव मेदिनीं ॥५॥ न होतव्यं न दातव्यं न यष्टव्यं
द्विजाः क्वचित् ॥ इति न्यवारयामास भेरीघोषेण सर्वशः ॥६॥ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं ॥ विमृश्य लोकव्यस
नं कृपया वोचुः स्म सत्रिणः ॥७॥ मुनय ऊचुः ॥ अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् ॥ दारुण्युभयतो दीप्ते इव तस्कर
पालयोः ॥८॥ अराजकभयादेष कृतो राजातदर्हणः ॥ ततोप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनां ॥९॥ अहेरिव
ष पयःपोषः पोषकस्याप्यनर्थकृत् ॥ वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ॥१०॥ निरूपितः प्रजापालः स जिघांसति
वै प्रजाः ॥ तथापि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥११॥

नां यतो नयतो व्यसनं ॥ एवं तस्करेभ्यः पालकाच्च दुःखं प्राप्तमित्यर्थः ॥ तदेवाह ॥ अराजकभयादिति ॥८॥ अतदर्हणः राज्यानर्हः अस्माकमप्यनि
ष्टं जातमित्याह ॥९॥ अहेर्यथा पयःपोषः क्षीरेण पोषणं पोषकस्याप्यनर्थो विनर्तिपुष्णाति तदेवाह वेन इति ॥१०॥ निरूपितः नियु
क्तोऽस्माभिः ॥११॥

सांत्वयेम । उपायांतरैः प्रार्थयिष्यामः ॥ तस्य पातकं स्वस्य तत्पातकस्पर्शो हेतुः तत्पातकलवं विवदध्मि ॥ १३ ॥ गूढो मन्युर्येषां सामभिः प्रियोक्ति
भिः ॥ १४ ॥ १५ ॥ कामानां आनंत्यं मोक्षमपि ॥ १६ ॥ मा विनश्येत ॥ मा विनश्यतु ॥ १७ ॥ असाधवो ये अमात्याः तेभ्यः यथाय यथाशास्त्रं ॥ १८ ॥ सर्वे

तद्विदध्मिरसद्वृत्तो वेनोस्माभिः श्लक्ष्णेन यः ॥ सांत्वितो यदि नो वाचं नो नगृह्णीष्यत्यधर्मकृत ॥ लोकधिक्कारसंदग्धं दहि
ष्यामः स्वतेजसा ॥ १३ ॥ एवमध्यवसायैनं मुनयो गूढमन्यवः ॥ उपव्रज्याब्रुवं वेनं सांत्वयित्वा च सामभिः ॥ १४ ॥ मुनय
ऊचुः ॥ नृपवर्य निबोधैतत यत्ते विज्ञापयाम भो ॥ आयुःश्रीबलकीर्तीनां तव तात विवर्द्धनं ॥ १५ ॥ धर्म आचरितः पुं
सां वाङ्मनः कायकर्मभिः ॥ लोकान्विशोकान्वितरत्यथानंत्यमसंगिनां ॥ १६ ॥ स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः
यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥ १७ ॥ राजन्नसाधुमात्येभ्यः चौरादिभ्यः प्रजा नृपः ॥ रक्षन्यथा बलिं गृह्णन्निह प्रे
त्य च मोदते ॥ १८ ॥ तस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः ॥ इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः ॥ १९ ॥ तस्य रा
ज्ञो महाभाग भगवान्भूतभावन ॥ परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥ २० ॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्व
रेश्वरे ॥ लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः ॥ २१ ॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं ॥ यज्ञै
र्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि ॥ २२ ॥ यज्ञेन युष्मद्विषये द्विजातिभिः वितायमानेन सुराः क
ला हरेः ॥ स्विष्टाः सुतुष्टाः प्रदिशंतु वांछितं तद्धेलनं नार्हसि वीर चेष्टितुं ॥ २३ ॥

लोकाः सपालाः यतीनमराश्च ॥ तत्प्रापकान् यज्ञान् यज्ञान्संगृह्णाति नियच्छतीति तथा तं विचित्रैर्यज्ञैः ज्योतिष्टोमादिभिः । भवाय समृद्धये स्वदेशानतद्वा
सिनो जनान् अनुरोद्धुं अनुवर्तितुं ॥ २२ ॥ युष्मद्विषये त्वद्देशे हरेः कलाः । अंशाः सुराः तेषां सुराणां हेलनं अवज्ञा ॥ २३ ॥

बालिशा अज्ञाः वृत्तिदं अन्नादिप्रदं मां हित्वा ॥२४॥ भर्तृस्नेहो विदूरे यासामि ॥२६॥२७॥ देहे भवंति नृपतेरतो नृपतिरेव सर्वेश्वरः । इतरेत
रथा इति भावः ॥२८॥ बलिं च करादिकं अग्रभुक् आराध्यः ॥२९॥३०॥ तेनासत्कृताः भग्नायां याच्ञायां ॥३१॥३२॥ परिचक्षीत निंदेत

वेन उवाच ॥ बालिशा बत यूयं वा अधर्मे धर्ममानिनः ॥ ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥२४॥ अवजानंत्यमी
मूढा नृपरूपिणमीश्वरं ॥ नानुविंदंति ते भद्रमिह लोके परत्र च ॥२५॥ को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी ॥ भ
र्तृस्नेहविदूराणां यथा जारे कुयोषितां ॥२६॥ विष्णुर्विरिंचो गिरिश इंद्रो वायुर्यमो रविः ॥ पर्जन्यो धनदः सोमः क्षितिर
ग्निरपांपतिः ॥२७॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः ॥ भवंति नृपतेर्देहे सर्वदेवमयो नृपः ॥२८॥ तस्मान्मां क
र्मभिर्विप्रा यजध्वं गतमत्सराः ॥ बलिं च मह्यं हरत मत्तोन्यः कोग्रभुक् पुमान ॥२९॥ मैत्रेय उवाच ॥ इत्थं विपर्ययम
तिः पापीयानुत्पथं गतः ॥ अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमंगलः ॥३०॥ इति तेसत्कृतास्तेन द्विजाः पंडितमानिना ॥
भग्नायां भव्ययाच्ञायां तस्मै विदुर चुक्रुधुः ॥३१॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः ॥ जीवन् जगदसावाशु कुरु
ते भस्मसाद्ध्रुवं ॥३२॥ नायमर्हत्यसद्वृत्तो नरदेववरासनं ॥ यो वै यज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ॥ को वैनं परिचक्षीत
वेनमेकमृतेशुभं ॥ प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ॥३४॥ इत्थं व्यवसिता हंतुमृषयो रूढमन्यवः ॥ निजघ्नुर्हुं
कृतैर्वेनं हतमच्युतनिंदया ॥३५॥ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं ॥ सुनीथा पालयामास विद्यायोगेन शोचती ॥३६॥

अशुभं वेनं विना ॥ कृतघ्नतामाह । यदनुग्रहविषयः सन् ईदृशमैश्वर्यं प्राप्तः ॥३३॥ रूढमन्यवः हुंकृतैः हुंकारैः ॥३४॥ स्वाश्रमं प्रति ऋषिभि
र्गतेषु गमने कृते सति ॥ विद्यायोगेन मंत्रसहितया युक्त्या ॥३५॥ [illegible] कृताः इत्यर्थः ॥३६॥

ना०गा०च तदा उत्पातान्वीक्ष्य मनुवः । अतस्तं न नवेत् । किं इत्याह कुरु ३८ । तत्तदा ते बालो कस्य धनं लुपंतं जिघांसतं चोपद्रवमाहाय ३९ । तथा चौर
४५ प्रायं अराजकं हीनसत्वं जनपदं आज्ञाय अशक्ता अवरणे दोषदर्शिनो पि लुपतो लोकान्नावारयदित्यर्थः ४० ४१ रक्षकानां क्षत्रिया
णां आवरणे दोष इति किं वक्तव्यं । समदृगपि शांतोपि ब्राह्मणोपि यदि दीनानां समुपेक्षिको न भवेत् । तस्यापि तर्हि ब्रह्म तपः स्रवति । अतउपे

एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः ॥ हुत्वाग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३७ ॥ वीक्ष्योत्थितान्महोत्पाता
नाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥ ३८ ॥ एवं मृशंतो मुनयो धावतां सर्वतोदिशं ॥ च
तुर्युपरते तस्मिन् अन्योन्यं च जिघांसतां ॥ ३९ ॥ पांसुः समुत्थितो भूरि चौराणां वसुलुंपतां ॥ चोरप्रायं जनपदं हीन
सत्वमराजकं लोका नावारयन् शक्ता अपि तद्दोषदर्शिनः ४० ॥ ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः ॥
स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥ ४१ ॥ नांगस्य वंशो राजर्षेरेष संस्थातुमर्हति ॥ अमोघवीर्या हि नृपा
वंशेस्मिन्केशवाश्रयाः ॥ ४२ ॥ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ॥ ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः
॥ ४३ ॥ काककृष्णोतिह्रस्वांगो ह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः ॥ ४५ ॥ हर

ह्रस्वदोषपरिहाराय नांगस्येत्यादि विनिश्चित्य महीपते रूरुं तरसा ममंथुरित्यन्वयः । संस्थातुं नाशं गंतुं यद्वा । ऊषय एव लुंपतो लोकान्नावारयन्
कथंभूताः हुंकारैरेव वेनवन्निवारयितुं शक्ता अपि । ततः किं तस्मिन्निवारणे तन्मरणादिदोषदर्शिनः । न चोदासनं चौरोपद्रवे पि दीनो
पेक्षायां तपोहानिप्रसंगात् । न चान्यं तं निवारकं राजानमकुर्वन् । अंगवंशोच्छेदस्यानुचितत्वात् । अतो वेनस्यैव देहं ममंथुरिति योऽयं ॥ बा ४५
हुको वामनः तमेवाह ४३ काककृष्ण इति । महत्यौ हनू कपोलप्रांतौ यस्य ४४ ॥

गिरिःकाननंचगोचरआश्रयो येषां॥नतुपुरादिप्रवेशः॥तत्रहेतुः॥येनकारणेनाहरत॥ततस्तस्यवंश्यास्तथाभूता॥४६॥इतिचतुर्थेचतुर्दशः॥ततः
पंचदशे विप्रैःमथनोद्भवबाहुतः॥जातस्यपृथोरुक्तमभिषेकाहरणादिकं॥१॥किमूचुरित्यतआह॥एषइतिचतुर्भिः॥२॥लक्ष्म्याःसंभू

संतं तंतुतेवन्नतंदीनंकिंकरोमीतिवादिनं॥निषीदेत्यब्रुवंस्तातसनिषादस्ततोभवत॥४५॥तस्यवंश्यास्तुनैषादागि
रिकाननःगोचराः॥येनाहरज्जायमानोवेनकल्मषमुल्बणं४६॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कं
धेवेनोपाख्यानेचतुर्दशोध्यायः॥१४॥श्रीमैत्रेयउवाच॥अथतस्यपुनर्विप्रैरपुत्रस्यमहीपते॥बाहुभ्यां
मथ्यमानाभ्यांमिथुनंसमपद्यत॥१५॥तद्दृष्ट्वामिथुनंजातमृषयोब्रह्मवादिनः॥ऊचुःपरमसंतुष्टाविदि
त्वाभगवत्कलां॥१६॥ऋषयऊचुः॥एषविष्णोर्भगवतःकलाभुवनपालिनी॥इयंचलक्ष्म्याःसंभूतिपुरुषस्यान
पायिनी॥१७॥अयंतुप्रथमोराज्ञांपुमान्प्रथयितायशः॥पृथुर्नाममहाराजोभविष्यतिपृथुश्रवाः॥१८॥इयं
चसुदतीदेवीगुणभूषणभूषणा॥अर्चिर्नामवरारोहापृथुमेवानुरुंधती॥५॥एषसाक्षाद्धरेरंशोजातोलोक
रिरक्षया॥इयंचतत्पराहिश्रीरनुजज्ञेनपायिनी॥६॥प्रशंसंतिस्मतंविप्रागंधर्वप्रवराजगुः॥मुमुचुःसुमनोधा
राः॥सिद्धान्नृत्यंतिस्वःस्त्रियः॥७॥शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि॥तत्रसर्वउपाजग्मुर्देवर्षिपितृणांगा
णाः॥८॥ब्रह्माजगद्गुरुर्देवैःसहासृत्यसुरेश्वरैः॥वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः॥९॥

तिः कला॥३॥अन्वयः पुमानसतुमहाराजोभविष्यति॥४॥सुदतीशोभनदंतवती॥गुणानांचभूषणभूषा॥अनुरुंधतीभर्तृत्वेनभजं
तीभविष्यति॥अत्रहेतुःएषइति॥५॥लोकस्यरिरक्षयारक्षितुमिच्छया॥६॥स्वस्त्रियःअप्सरोनृत्यंतिस्म॥७॥८॥देवैःसहआश्रित्यआगत्य
वैन्यस्यपृथोः॥चिह्नंरेखात्मकंचक्रं॥९॥

कानि मं

नाग० च० अप्रतिहतं रेखांतैरेरमिन्नं ॥ चक्रं यस्य चिह्नं सपद्मेश्वरस्यांघ्रः १० आसिषेचनिश्च निवेकसाधनानि ॥ ११ ॥ १३ ॥ हेवीरवरमासनं ॥ सलिलस्य आ
४६ वीयस्मात १४ ॥ देवालव्यजने १५ ब्रह्मम यं वेदमयं वर्म कवचं तत्पत्नीश्रीः श्रियं संपदं ॥ १६ शतचंद्राकाराणि बिंबानि कोशे यस्य तं असिखं

पादयोररविंदं च तं वेमेने हरेः कलां ॥ यस्याप्रतिहतं चक्रं मंत्राः सपरमेष्ठिनः ॥ १० ॥ तस्याभिषेकमारब्धं ब्राह्मणैर्द्विजवा
दिनिः ॥ आभिषेचनिकान्यस्मा आजह्रुः सर्वतोजनाः ॥ ११ ॥ सरित्समुद्रा गिरयो नगा गावः खगा मृगाः ॥ द्यौः क्षितिः सर्वजन्तु
तानि समाजह्रुरुपायनं ॥ १२ ॥ सोभिषिक्तो महाराजः ॥ सुवासाः साध्वलंकृतः ॥ पत्न्यार्चिष्यालंकृतया विरेजेग्निरिवाप
रः ॥ १३ ॥ तस्मै जहार धनदो हैमं वीरवरासनं ॥ १३ ॥ वरुणः सलिलस्रावमातपत्रं शशिप्रभं ॥ १४ ॥ वायुश्च वालव्यजने
धर्मः कीर्तिमयी स्रजं इन्द्रः किरीटमुत्कृष्टं दण्डं संयमनं यमः ॥ १५ ॥ ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमं हरिः ॥ सुदर्शनं
चक्रं तत्पत्न्याव्याहतां श्रियं ॥ १६ ॥ दशचन्द्रमसिं रुद्रः शतचन्द्रं मयाविका ॥ सोमो मृतमयानश्वान् त्वष्टा रूपाश्र
यं रथं ॥ १७ ॥ अग्निराजगवं चापं सूर्यो रश्मिमयानि षून् ॥ भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहं ॥ १८ ॥ नाट्यं
सुगीतं वादित्रं अन्तर्धानं च खेचराः ॥ ऋषयश्चाशिषः सत्याः समुद्रः शंखमात्मजं ॥ १९ ॥ सिंधवः पर्वता नद्यो रथवी
थीर्महात्मनः ॥ सूतोथ मागधो वंदी तं स्तोतुमुपतस्थिरे ॥ २० ॥ स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् ॥ मेघ
निर्ह्रादया वाचा प्रहसन्निदमब्रवीत ॥ २१ ॥

द्रं शतचंद्रं चर्म रूपाश्रयं अतिसुंदरं ॥ १७ अजस्य गोश्च शृंगाभ्यां निर्मितं चापं ॥ आजगवं योगमय्यौ ॥ पादस्पर्शमात्रेणाभीष्टदेशप्रापिके ४६
॥ १८ ॥ नाट्यादिकं कौशलं खेचराः आत्मजं स्वजन्यं ॥ १९ ॥ तं स्तोतुमुपस्थिताः ॥ २० ॥ स्तावकान् स्तोतुमुद्युक्तानभिप्रेत्य ज्ञात्वा ॥ २१ ॥

लोकेस्पष्टगुणस्य सतो मे स्तुतिः स्यात् । अधुना तु किमाश्रयो मे स्तवो योज्यतां ॥ अतो वो गिरः अधुना वितथा मा भूवन् । यद्वा लोके धुना अ-
स्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् ॥ अत एव क्रियमाणः स्तवः मेऽन्यस्य योज्यतां । न तु मे वितथा निमानायतेरित्यर्थः । तस्मात्परो हे
कालांतरे स्पष्टेषु गुणेषु सत्सु ॥ अस्माकमुपश्रुतानि यशांसि प्रति स्तोत्रं अलमत्यर्थं करिष्यथ हे अपीच्यवाच ॥ मधुरगिरः [illegible] ये
ऽसि तर्हि वयं त्वामेव स्तुम इति चेत्तत्राह । उत्तमश्लोकस्य गुणानुवादे न कार्ये सति । जुगुप्सितमर्वाचीनं न वा स्तवयंति ॥ ननु संभावितैरेव गु-
णैः आत्मानं जनः स्तावयतीति चेत्तत्राह । महतां गुणानात्मनि संपाद्यितुं शक्तोपि तस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमति

पृथुरुवाच ॥ नो सूत नो मागध सौम्य वंदिन् लोके धुनास्पष्टगुणस्य मे स्यात् ॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्
वितथा गिरो वः ॥२२॥ तस्मात्परोक्षेस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः ॥ सत्युत्तमश्लोकगुणानुवादे जुगु-
प्सितं न स्तवयंति सभ्याः ॥२३॥ महद्गुणानात्मनि कर्त्तुमीशः कः स्तावकैः स्तावयतेसतोपि ॥ तस्याभविष्यन्निति विप्रल-
ब्धो जनावहासं कुमतिर्न वेद ॥२४॥ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः ॥ ह्रीमंतः परमोदाराः पौरुषं वा विग-
र्हितं ॥२५॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः ॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥२६॥ इति श्रीभाग-
वते महापुराणे चतुर्थस्कंधे पृथुचरित्रे पंचदशोध्यायः ॥१५॥

र्न वेद असतो गुणान् संभावनामात्रेणार्कैः स्तावयते ॥ यद्वा
आदावेव सतोपि कः स्तावकैः स्तावयते स्वत एव ॥ स्वसिद्धेः अन्यस्तु मिथ्यागुणः स्तुतिश्लाघी मंद इत्याह । तद्दृति । यद्यप्यंगाद्यभ्यासादिकर्म करिष्य
न ॥ तर्ह्यस्य तेः विद्यादयो गुणाः अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धो जनानामवहासं न वेद किंच ।२४॥ प्रभवोपि विश्रुता अपि जुगु-
मा प्सितं चेतिहृष्यंत ॥ यद्येति स्तुतो क्रियेणयां विगर्हितं जुगुप्सन्त एव धारिपौरुषं निंदंति । तथोचितामपि स्तुतिं न सहंत इति भावः ।२५। वरीमभिरिति-
दीर्घमार्षं न वित प्रधानस्याद्यं निर्दिष्टाः वरिष्ठैः कर्मभिरविदिता इत्यर्थः ।२६। इति चतुर्थे पंचदशः ।१५॥

भा०गा०च: योदेववर्योसर्वलोकेषोः सत्त्वकृतंनार्थयायुतं॥ मुनिप्रयुक्ताः सूताद्याः स्तुवंतिस्मेति वर्ण्यते॥१॥ गायकाः सूतादयः॥२॥ नालं न समर्थाः। योनवा-
६७ नवतारेषु अपि अस्याधिक्यमाह। वेनांगाज्जातस्य ते पौरुषाणि प्रत्यवितर्कया। ब्रह्मादीनामपि धियो बभ्रमुः कुतः पुनर्वयं तद्वर्णने सम- पयो.
र्था नवेम॥२॥ तथापि यथा वर्णयितुमशक्ता अपि कथामृते सादराः॥ मुनिभिरुपदेशं यो यो गायनं बलेन हृदि प्रकाशनं॥ तदनतिक्रम्य वितन्महि।
विस्तरयामः॥३॥ तनौ स्वदेहे लोकपालानां तनूः मूर्तीः॥ काले काले विभर्त्ति यथाभागं पालनपोषणानुरंजनादिकार्यानुसारेण यज्ञादिभि-

श्रीमैत्रेय उवाच॥ इति ब्रुवाणं नृपतिं गायका मुनिनोदिताः॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया॥१॥ गायका ऊचुः॥ ना-
लं वयं ते महिमानुवर्णने यो देववर्योवततार मायया॥ वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः॥
॥२॥ तथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः॥ यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्मा-
णि वयं वितन्महि॥३॥ एष धर्मभृतां श्रेष्ठो लोकं धर्मेनुवर्त्तयन्॥ गोप्ता च सर्वसेतूनां शास्ता तत्परिपंथिनां॥४॥ एष
वै लोकपालानां विभर्त्त्येकस्तनौ तनूः॥ काले काले य[illegible]भागं लोकयोरुभयोर्हितं॥५॥ वसु काल उपादत्ते काले चायं
विमुंचति॥ समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः॥६॥ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि॥ भूतानां करुणः
शश्वदार्त्तानां क्षितिवृत्तिमान्॥७॥ देवेवर्षत्यसौ देवो नरदेववपुर्हरिः॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत्॥८॥ ७

र्वर्त्तते स्वर्गस्य हितं यथा भवति तथा। सूर्यादितनुधारणामेवाह त्रिभिः॥५॥ वसु धनं करादानकाले दत्ते॥ दुर्भिक्षादिकाले विमुंचति। अष्टौ मासान्
ति सूर्यो यथा वसु जलमादत्ते विमुंचे वर्षासु तद्वत्॥६॥ मस्तके पादेनाक्रमतां अपि आर्त्तानां भूतानामक्रमं सहिष्यते क्षितिवद्वृत्तिः सर्वसहत्व॥ साव-
तिस्या क्षितिसतया॥७॥ देवे अवर्षति एष कृच्छ्रंगताः प्राणायासांताः प्रजाः स्वयं वर्षित्वा रक्ष्यति। अत्र हेतुः असौ नरदेववपुर्हरिरिति॥८॥ ६७

वदनमेवामृतिं यस्य । तेन सानुरागो वलोकोयस्मेन । विशदं स्मितं तेन चारुणा अत्र क्वचिद् वर्त्तमाननिर्देशो वर्त्तमानसामीप्ये वर्त्तमानवद्वे
ति ॥ नतु निर्देशस्य अत्र मायामूतव चेतिङ् युक्ता ॥ ७ ॥ अव्यक्तं वर्त्मैव वर्त्म वेत्रं निर्गमो मार्गो यस्य । निगूढं निःपतेः सर्वमज्ञातं कार्यं यस्य
अनंतमाहात्म्यस्यासौ गुणानामेकधाम विष्णुर्येस्मिन ॥ अनंतमाहात्म्यो येता गुणाएव धाम स्थानं यस्येति वा ॥ संवृतात्मा । संयतः मूर्त्तिः समु
द्वचारत्वेन वरुणस्यापि ते गुणा दृश्याः ॥ १० ॥ दुरासदः सत्रोः मनसापि प्राप्तुमशक्यः दुर्विषहः ॥ शत्रुभिः सोढुमशक्य विदुरवतयो रूक्षेणा

आप्यायतेसौ लोकं वदनामृतमूर्त्तिना ॥ सानुरागावलोकेन [stain] विशदस्मितचारुणा । ९ । अव्यक्तवर्त्मैष निगूढकार्यो
गंभीरवेधा उपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा । १० । दुरासदो दुर्विषह आसन्नोपि विदूरव
त् ॥ नैवाभिभवितुं शक्यो वैन्यारण्यस्थितोनलः ॥ ११ ॥ अंतर्वहिश्च भूतानां पश्यन्कर्माणि चारणैः । उदासीन इवाध्यक्षो वायुरा
त्मैव देहिनां ॥ १२ ॥ नादंड्यं दंडयत्येष सुतमात्मद्विषामपि ॥ दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः । अस्याप्रतिहतं चक्रं पृ
थ्वा आमानसाचलात् ॥ १३ ॥ वर्त्तते भगवानर्को यावत्तपति गोगणैः । १४ ॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः । अथामु
माहू राजानं मनोरंजनकैः प्रजाः ॥ १५ ॥ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः ॥ शरण्यः सर्वभूतानां मानदो दीनवत्सलः ॥ १६

भिभवितुमशक्यः वैनएवारणिः । तस्मादुत्थितः ॥ ११ ॥ चारणैः गुप्तचरैः पश्यन्नपि स्वस्तुतिं । निंदां वा उदासीन इव वर्त्तिष्यते ॥ यथा देहि
नामध्यक्षोधिकृत आत्मभूतो वायुः सूत्रात्मा तद्वत् ॥ १२ ॥ आत्मद्विषां सुतमिति । सुतग्रहणं स्वात्मजसाम्यार्थं धर्मपथे यमस्यवत्तो स्थि
तः ॥ १३ ॥ चक्रं आज्ञा आसेनावार यस्य वा चक्रं ॥ मानसाचलमभिव्याप्य वर्त्तते केपर्यंतमित्यत आह ॥ अर्को रश्मिगणैः यावत्तपति
तावत् ॥ १४ ॥ यस्माद्रंजयिष्यति ॥ अयतस्मात्मनोरंजनैः हेतुभिरिमं राजानमाहुः । मनोरंजनकैरिति चेष्टितविशेषणं वा ॥ १६ ॥

रा॰ गं॰ च॰ ७८ मातरीचनक्ति र्मंडलं यस्य ॥ आत्मनो देहस्यार्द्धं एव पत्न्यां श्रीति मात ॥ १९ ॥ न दिसु खं वर्द्धयतीति तथा ॥ मुक्त संगे पुप्रसक्तैः संगो यस्य दंड ।
पाणिरित्य परा धानु पेक्षणमुच्यते ॥ नादंडग्रमित्यत्र तु यत्क्रपाताता मावडुक्तः ॥ १८ ॥ १९ ॥ अयं खिलिति ॥ तुत्रादेन निकृपमलं दर्शपति ॥ को सा ।
वात्मात्वमाह ॥ यस्मिन प्रतितिल ॥ पिनानात्वं अर्थमूलं न पश्यति ॥ २० ॥ आउदयाइः तत्पर्यंतं गोप्ता गोपायिष्यति ॥ तदर्थे पर्यस्यते ॥ पर्यसिष्यति

मातनन्निपरम्रीषुपत्नामर्द्धइवात्मनः ॥ प्रजा सुपित व स्निग्ध किं करो ब्रह्मवादिनां ॥ १७ ॥ देहिनामात्मवत्स्वेष्टः सुहृदं
नंदिवर्द्धनः ॥ मुक्तसंगप्रसंगोयं दंडपाणिरसाधुषु ॥ १८ ॥ एषरोऽध्या महीं वीरो गां सती मोडसोषधीः ॥ समां करिष्यते चेमां ।
दि धनुः को द्याममंततः ॥ १९ ॥ अयं सान्नाद्भगवान्सद्भाथा राकूटस्थ आत्मा कलयावतीर्णः ॥ यस्मिन्न विद्यारचितं निरर्थं
कं पश्यंति नानात्वमिव प्रतीतं ॥ २० ॥ अयं भुवो मंडलमोदयाद्गोप्तैक वीरो नरदेवनाथः ॥ आस्थाय चैत्रं रथमात्तचापः
पर्यस्यते दक्षिणतो यथार्कः ॥ २१ ॥ अस्मै नृपालः अयं महीं गां दुदुहेधिराज ॥ किल तत्र तत्र बलिं हरिष्यंति स लोकपालाः ॥ म
दे संतएपांस्त्रिय आदिराजं चैकायुधं तद्यश उद्धरंतः ॥ २२ ॥ अयं महीं गां दुदुहे धिराज प्रजापतिर्वृत्तिकरः प्रजानां ॥ यो ली
लयाद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः ॥ २३ ॥ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ चर ३=
तदा निलिल्युर्दिशि दिशि हि रूप सन्तोलांगूलमुद्यम्य यथा मृगेंद्रः ॥ २४ ॥ एषोश्वमेधान्शतमाजहार सरस्वती प्राद् सर
(रनाप्नि यत्र ॥ आहार्षीद्यस्य हयं पुरंदरः ॥ शतक्रतुश्चरमे वर्तमाने ॥ २ ५
प्रदक्षिणीकरिष्यतीत्यर्थः ॥ २१ ॥ अस्मै तथा प्रदक्षिणं कुर्वते मंस्य
ते ॥ ज्ञास्यंति तस्य यश उद्धरंतः कीर्तयंतः ॥ २३ ॥ लांगूलमुद्यम्य यथा मृगेंद्र इति तथा धनुर्विस्फूर्जयन् ॥ यदा क्ष्मामचरत ॥ २४ ॥ यत्र प्राडुरन्नाविद्या । ७८
दुरन्त ॥ कर्मकर्तरि विण ॥ तत्राहार्षी ॥ २५ ॥

विस्फूर्जितो विक्रमो यस्य गाथाः प्रवंधान ॥२६॥ २७ ॥ उपगीयमानो महानुभावो यस्य ॥ २८ ॥ इति चतुर्थे षोडशः ॥१६॥ ततः सपद्दश्रो लोका स्तुधांशु स्था
न मय पृथुः ग्रस्तवीर्यां महीं हंतुं पतीनीत्वा नयास्तुतः ॥१॥ नत्वान् मात्यान् पुरोधसः पुरोहिताश्च श्रेणीः तैलिकतां वूलिकादीन् पौरवि
एव स्वसत्सो पवने समेत्य सनत्कुमारं भगवंतमेकं ॥ आराध्यभक्त्यालभतां मलंतत्ज्ञानं यतोब्रह्मपरं विदंति ॥२६॥ तत्र
तत्र गिरस्तास्ता इति विश्रुतविक्रमः श्रोष्यात्यात्माश्रया गाथाः ॥ पृथुः पृथुपराक्रमः ॥२७॥ दिशोविजित्या प्रतिरुद्धच
क्रस्वतेजसोत्पाटितलोकशल्यः ॥ सुरासुरेंद्रै रभिगीयमान महानुभावोऽजयतां पृथुर्नृ वं ॥२८॥ इति श्रीभागवते महापुरा
णे चतुर्थस्कंधे पृथ्योपाख्याने षोडशोध्यायः ॥ १६ ॥ श्रीमैत्रेय उवाच ॥ एवं स भगवान्वैण्यः ख्यापितो गुणक
र्मभिः छंदयामास तत्तिकामैः प्रतिपूज्याभिनंद्य च ॥१॥ ब्राह्मणप्रमुखान्वर्णान् भृत्यामात्यपुरोधसः ॥ पौरान्जनपदान्
श्रेणीः प्रकृतीः समपूजयत ॥२॥ विदुर उवाच ॥ कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ॥ यां दुदोह पृथुस्तत्र
को वत्सो दोहनं च किं ॥३॥ प्रकृत्या विषमा देवी कृता स्तेन समा कथं तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत ॥४॥ स
नत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात ॥ लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥५॥ यच्चान्यदपि कृष्णस्य
ग्रव:स भवान्भगवतः प्रभो ॥ श्रवसः पुण्यं पूर्वदेहकथाश्रयं ॥६॥ भक्ताय मे नुरक्ताय तव चाधोक्षजस्य च ॥ वक्तुमर्हसि यो
दुह्यद्वैन्यरूपेण गामिमां ॥७॥ श्रीशुक उवाच ॥ चोदितो विदुरेणैवं वासुदेवकथां प्रति ॥ प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभा
षत ॥८॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग विप्रैरामंत्रितो जनतायाश्च पालः ॥ प्रजा निरन्ने क्षितिपृष्ठ एत्य तत क्षुत्क्षा
शेषान प्रकृतीः नियोगिनः ॥२॥ दोहनपात्रं ॥३॥ मेध्यं यज्ञाह ॥४॥ सविज्ञानं ॥ अपरोक्षज्ञानसहित ॥ मदेहाः पतिमभ्यवोचत ॥९॥ ॥ पूर्वदेहः पृथ्ववतारः
ततकथाश्रवीयन ॥६॥ अधुह्यत दुग्धवान ॥७॥ जनमायास्य पाल इति मंत्रितो ॥ जुष्टो तदा निरन्ने क्षितितले सति क्षुधा क्षामाः ॥ क्षामाः देहाया

जाठरेणाग्निनातप्ताः यः साधित विशेषैः मथनेन संपादितः । तं त्वां शरणं याता १० ॥ तस्मान्नोऽस्माकं अन्नं तरातवे रातुं दातुं ईहतु ॥ यत्नं करोतु
उज्झितोर्जाः त्यक्तान्नाः सत्यवार्त्तायाः जीविकायाः पतिः । ११ ॥ परिदेवितं विलापं निमित्तं हेतुं । अन्वपद्यत ज्ञातवान् । १२ । पृथिव्याकृषधीवीडानि

हि

प्रऊचुः ॥ वयँराजञ्जाठरेणाभितप्ताः यथाग्निना कोटरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः ॥ साधितो वृँकरः
पतिर्नः ॥ १० ॥ तन्नो भवानीहतु रातवेन्नं क्षुधार्दितानां नरदेवदेव ॥ यावन्न नंक्ष्यामह उज्झितोर्जाः वार्तापतिस्त्वं किल
लोकपालः ॥ ११ ॥ मैत्रेय उवाच ॥ पृथुः प्रजानां करुणं निशाम्य परिदेवितं ॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं चान्वपद्य
त ॥ १२ ॥ इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः ॥ संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥ १३ ॥ प्रवेपमाना धरि
णी निशाम्योद्यतायुधं च तं ॥ गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुताः ॥ १४ ॥ तामेवान्वड्वैन्यो कुपितोत्यरुणेक्ष
णः शरं धनुषि संधाय यत्र यत्र पलायते ॥ १५ ॥ सा दिशो विदिशो देवी रोदसी चांतरं तयोः ॥ धावंती तत्र तत्रैनं ददर्शा
नूद्यतायुधं ॥ १६ ॥ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः ॥ तदा त्रस्ता निववृते हृदयेन विदूयता ॥ १७ ॥ उवाच
च महाभागं धर्मज्ञापन्नवत्सलः ॥ त्राहि मामपि भूतानां पालनेवस्थितो भवान् ॥ १८ ॥ स त्वं जिघांससे कस्माद्दीना
मकृतकिल्बिषां ॥ अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ १९ ॥ प्रहरंति न वै स्त्रीषु कृतागःस्वपि जंतवः ॥ किं पुन
स्त्वद्विधा राजन करुणा दीनवत्सला ॥ २० ॥

ति
ता

ग्रस्तानीति व्यवसितो निश्चितवान् । १२ । मृगयुना द्रुता गता अनुगताः । १३ । १४ । रोदसी द्यावापृथिव्यौ ॥ तयोरंतरमंतरिक्षं । अनुपश्यतः । उद्या
तमायुधं येन तं १५ ॥ १६ ॥ यो धर्मज्ञ इति मतः स कथं भवान् । योषां यां अहनिष्यत । हनिष्यति । १८ ॥ १९ ॥

अजरां दृढां धास्यसि धारयिष्यसि ।२०। बर्हिषि यज्ञे यान्नवती देवतारूपेणान्तागं वृंक्ते नड्डते । वसु धान्यादिकं ॥२१। यवसं जग्ध्यनुदिनं ॥ गोरू-
पेण तु यवसं तृणं जग्धि । अतीत्पूर्ये नैव दोग्धि दुग्धं न स्रवति । अत्रास्मिन्नपराधे ।२२। आत्मनि देहे रुद्धानि मद्धे सर्वेषाम् अन्नं तस्मा-
दिति चेत्तत्राह ॥ अमूषां प्रजानां मेदसा मांसेन ॥ यदुक्तं ये पांक यंहनिष्यतीति ॥ तत्राह ॥ पुमानिति ॥२४॥ तस्य अवधः वध एव । यच्चोक्तं कथ- र्तिं
मंभसि धास्यतीति । तत्राह ॥ त्वामिति ।२५। तिलशः तिलप्रमाणानि खंडानीत्येवं कृत्वा मवस्थां नीत्वा ।२६॥ मन्युमयीं विभ्रतः कृतांततुल्यत्व-

मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितं ॥ आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि ।२०॥ पृथुरुवाच । वसुधे त्वां
वधिष्यामि मच्छासनपराङ्मुखीं ॥ भागं बर्हिषि या वृंक्ते न तनोति च नो वसु ।२१। यवसं जग्ध्यनुदिनं नैव दोग्ध्यौ-
धसं पयः तस्यामेवं हि दुष्टायां दंड एव प्रशस्यते ॥२२॥ त्वं खल्वोषधिबीजानि प्राक् सृष्टानि स्वयंभुवा ॥ न मुंचस्या-
त्मरुद्धानि मामवज्ञाय मंदधीः ।२३॥ अमूषां क्षुत्परीतानां आर्तानां परिदेवितं ॥ शमयिष्यामि मद्बाणैर्भिन्ना-
यास्तव मेदसा ॥२४॥ पुमान्योषिदुत क्लीब ॥ आत्मसंभावनोऽधमः भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः
।२५॥ तां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ॥ आत्मयोगबलेनेमां धारयिष्याम्यहं प्रजाः ।२६। एवं मन्युमयीं
विभ्रतं मूर्तिं कृतांतमिव बिभ्रतं ॥ प्रणता प्रांजलिः प्राह मही संजातवेपथुः ॥२८॥ धरोवाच ॥ नमः परस्मै पुरुषाय
मायया विन्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥२९॥

मुच्यते । ननु कृतांतस्य मन्युमयी मूर्तिरिति ।२७। मायया विन्यस्ता रचिता नानाघोरादि तनवो येन गुणात्मने गुणमयत्वेन प्रतीयमानाय । वस्तुत-
स्तु निर्धुता निरस्ताः द्रव्यक्रियाकारकेषु अधिभूताध्यात्मादिदैवेषु विभ्रमोऽहंकारः ॥ तन्निमित्ता ऊर्मयो रागद्वेषादयः यस्य यस्मिन्न । तस्मै । अहो सर्वज्ञ-
वान्त्रयत्वेन सर्वेषां कथयहेतुं प्रवर्त्तसे इत्याह ।२८। येन विधात्रा आत्मा नांडीवाना मायतनं ॥ अहं विनिर्मिता ॥ यतः यस्यां मयि गणः सर्गस्य चतु-

भा०स्कं०४ विधस्तलग्रामस्य संग्रहः॥ धारणः स्वराट्॥ स्वतंत्रः॥ सृष्टिस्थितिसंहारकोहमिति॥ चेतयाप्रजापालने प्रवृत्तस्य मद्विधोनुचित एवेत्याह॥ यए
५० तदिति॥ २९॥ आत्ममायया जीवविषयिण्या अतो दुर्ज्ञेयं चेष्टितमित्याह। न तेमिति ३० अकृतात्मभिः॥ विक्षिप्तचित्तैः यईश्वरः स्वतंत्रः। अकरोद्
ल्लाणां प्रवृत्त इति तेन उद्धरणाच्चराचरमकारयत॥ य स एव एकः। परतो मायया अनेकः तस्मादचिंत्यशक्तये नमइत्याह॥ ३१ सर्गादि जन्मस्थिति
लंगां अस्य जगतः। अनुरुणद्धि॥ अनुवर्तते करोति द्रव्याणि महान्तः तानि क्रियाइंद्रियाणि। कारकादयो देवाः चेतना बुद्धि आत्माहंकारः॥ श

येना

येनाहमात्मायतनं विनिर्मिता धात्रा यतोयं गुणसर्गसंग्रहः॥ स एव मां हंतुमुदायुधः स्वराड् उपस्थितोन्यं शरणं कमा
श्रये २९॥ य एतदादावसृजच्चराचरं स्वमायया आत्माश्रयया वितर्क्यया॥ तयैव सोयं किल गोप्तुमुद्यतः कथं नु मां ध
र्मपरो जिघांसति ३०॥ नूनं वतेशास्य समीहितं जनैः स्वमायया दुर्जयया कृतात्मभिः॥ न लक्ष्यते यस्त्वकरोदकारयत्
यो नैक एकः परतो यईश्वरः॥ ३१॥ सर्गादि योस्यानुरुणद्धि शक्तिभिः द्रव्यक्रियाकारकचेतनात्मभिः॥ तस्मै समु
न्नद्धविरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ३२॥ स वै भवानात्मविनिर्मितं जगत् भूतेंद्रियांतः करणात्मकं वि
भो॥ संस्थापयिष्यन्नज मां रसातलाद् अभ्युज्जहारांभसि आदिसूकरः॥ ३३॥

क्रियारूपैः समुन्नद्धाः समुत्कटाः विरुद्धाः शक्तयो यः प्राणिनां धारणार्थं मां रसातलादुद्धृत्य इदानीं प्रजारक्षणे प्रवृत्तस्य मद्वधेन युक्त
इति सकरुणमाह॥ स्थाप्यां ३२ हे अजयः स एव भवान् स एव भवान् स्वनिर्मितं चराचरमिदं जगत्। सम्यक् स्थापयितुमादिसूकरः। सन्मां ५०
अभ्युज्जहार ३३॥

सएव धरो धरो वराहो ह्यपामुपस्थे उपरि मयि नाविन्याधारन्तायं अवस्थिताः । रक्षितुमिच्छः वीरमूर्त्तिः । पृथुरूपः समन्ततः ॥ य एवं।
न्ततः सत्वं पयसि निमि । तं मां जिघांसतीति चित्रमित्यर्थः । तस्मादीश्वरचेष्टितं दुर्ज्ञेयमितिकैमुत्यन्यायेनोपसंहरति नूनमिति । ३४ । तस्येश्व
रस्य [illegible] गुणसर्गरूपया मायया मोहितं चेतमेव वर्त्म येषां मोहिता चित्तवर्त्मानि येषामिति वा ॥ ते ईश्वराणां हरिभक्तानामे
वतावद्दीहितं न ज्ञायते किं पुनस्तस्य परमेश्वरस्य । अतः परमेश्वरकर्तृत्वेन नमएव ॥ [illegible] केवलं वीराणां यतेंद्रियाणां यशः कुर्वंतियेते भ्यः

अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किलः ॥ स वीरमूर्त्तिः समभूद्धराधरो यो मां पयस्युग्रशरो
जिघांससि ॥ ३४ ॥ ननं ङतेरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ न ज्ञायते मोहितचित्तवृत्तिभिः ते
भ्यो नमो वीरयशस्करेभ्यः ॥ ३५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुचरित्रे सप्तदशोध्यायः ॥ १७ ॥ श्री
मैत्रेय उवाच ॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरं ॥ पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥ पृथिवी उवा
च ॥ संनियच्छाभिभो मन्युं निबोध श्रावितं च मे ॥ सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥ २ ॥ अस्मिंल्लोकेथवामु
ष्मिन् मुनिभिस्तत्वदर्शिभिः ॥ दृष्टाः योगाः प्रयोक्ताश्च पुंसां श्रेयः प्रसिद्धये ॥ ३ ॥

यथावारणां यशो वर्द्धितं तथा त्वेषं तेमन्युपर्यप्रमितिनावः । चतुर्थे सप्तदशः ॥ अष्टादशे महीवाक्याद्वत्सपात्रादिभेदतः । पृथ्वादिभिस्त्व
सा दुग्धा स्वं स्वं दुग्धमितीर्यते । १ हे अभितो: प्रत्येयं भानोदेव अभिअस्त पंयथा भवति तथात्मानं संस्तभ्य । श्रावितं विज्ञापितं । न मया
पेनादरः कर्तव्य ॥ इत्याशयेनाह ॥ बुधो हि । सर्वतः सारमादत्ते ॥ पदि हीणं कुषधीस्तूपापेन गृह्णाणेतिवक्तुमुपायेन सर्वसिद्धतिना
पयेत्याह ॥ अस्मिन्निति त्रिभिः । २ ॥ पुंसां श्रेयसः पुरुषार्थस्य सिद्धये ॥ अस्मिंल्लोके कृष्यादयः ॥ अमुष्मिंल्लोके अग्निहोत्रादयो यो
गाद्युपायादृष्टाः ॥ प्रयुक्ता अनुष्ठिताश्च । ३ ॥

ना०भा०च
५१

सर्वैर्दर्शितान् । अवरोऽर्वाचीनः ३ । विद्वानविद्वानपीति वाग्मिनिचरं तेन सिद्धं भवति ॥ सहेतुकमुपायमाह ॥ [redacted] ॥ पुरेति षड्भिः ॥४॥ नवद्भि
रिति राजसामान्याभिप्रायेण ॥५॥ अपालितानाहृताच नवद्भिर्लोकपालकैः ॥ चौरीभूते ऽथ लोके हं यज्ञार्थे ग्रस्तमोषधी अपालिताचो-
राघनिवारणात् । अनाहृता यज्ञादिप्रवर्तनाभावात् ॥ यज्ञार्थे अग्ग्रसं गिलितवती ॥ अन्यथा अधृतव्रतैः । भुक्तान् असौ प्रयेते ततस्त्वया-

र्तनाति इति यः सम्यक् उपायान् पूर्वदर्शितान् ॥ अवरः श्रद्धयोपेतः उपेयं प्राप्नोति स नरः ॥३॥ ताननादृत्य यो विद्वान्
र्थानारभते स्वयं ॥ तस्य व्यभिचरंत्यर्थाः आरब्धाश्च पुनः पुनः ॥४॥ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते
भुज्यमाना मया दृष्टा नवद्भिरधृतव्रतैः ॥५॥ अपालितानादृता च नवद्भिर्लोकपालकैः ॥ चौरीभूतेऽथ लोकेऽहं
यज्ञार्थे ग्रस्तमौषधीः ॥६॥ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा ॥ तत्र दृष्टेन योगेन भवानादातुमर्हसि ॥७॥
वत्सं कल्पय मे वीर येनाहं वत्सला तव ॥ धोक्ष्ये क्षीरमयान्कामान् अनुरूपं च दोहनं ॥८॥ दोग्धारं च महाबाहो भू
तानां भूतभावन ॥ अन्नमूर्जितमद्भिस्व भगवान्वांछते यदि ॥ समां च कुरु मां राजन् देववृष्टं यथा पयः ॥ अप
र्तावपि भद्रं ते उपावर्तेत मे विभो ॥१०॥ मैत्रेय उवाच ॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ॥ वत्सं कृत्वा मनुं पा
णावदुहत्सकलौषधीः ॥११॥ तथापरे च सर्वत्र सारमाददते बुधाः ॥ ततोन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ ऋषयो दुदुहु
र्देवीमिन्द्रियेष्वथ सत्तम ॥ वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि ॥१२॥

नाद्ययो न सिध्येरन्निति भावः ॥६॥ क्षीणा लीनाः ॥७॥ वत्स्यता दोहनं दोहनपात्रं । दोग्धारं चोपकल्पय धोक्ष्ये प्रकरयिष्यामि ॥८॥ भूतानामा
पितमन्नं ऊर्जस्वत् बलप्रदं ॥९॥ अपगतेपि वर्षर्तौ यथा मे सर्वतो वर्त्तेरन् ॥१०॥ प्रसंगाद्यथोत्तरमाह । तथेति ॥११॥ यथा पृथुः एवं सर्वत्र वा
क्येपरेपि सारमाददते । प्रस्तुतमनुवर्तयति । ततोन्ये ऋष्यादयः पंचदश दुदुहुः । पृथुना भाविता वशीकृता ॥१२॥ देवीं पृथ्वीं वाङ्मनः । ५१

[illegible] ॥१२॥

सोमममृतं॥ वीर्यं मनः॥ ओजः इंद्रियशक्तिं वलं देहशक्तिं च तदेव पयः॥१४॥ सुरां च आसवं तालादिमद्यं॥१५॥ मधु माधुर्यं॥ सौभगं
सौंदर्यं तत्सहितं॥ आमपात्रे अपक्वमृन्मये। अधुक्षत दुदुहुः॥१६॥१७॥ अन्ये च किंपुरुषादयः अंतर्धानेनाद्भुतात्मनां संबंधिनीं माया-
यां धारणामयीं संकल्पमात्रप्रभवां॥१८॥ भूतेशः श्रीरुद्रः स एव वत्सो येषां क्षतजं रुधिरं तदेवासवं॥१९॥ अहयो निफणाः दंदशू-

कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन्॥ हिरण्मयेन पात्रेण वीर्यमोजो वलं पयः॥१४॥ दैतेया दानवा वत्सं प्रह्लादम-
सुरर्षभं॥ विधायादूदुहन्क्षीरमयःपात्रे सुरासवं॥१५॥ गंधर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः॥ वत्सं विश्वाव-
सुं कृत्वा गांधर्वं मधु सौभगं॥१६॥ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत॥ आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः॥१७॥
अन्ये च मायिनो मायामंतर्धानाद्भुतात्मनां॥ मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीं॥१८॥ यक्षरक्षांसि भूतानि पिशाचाः
पिशिताशनाः॥ भूतेशवत्सा दुदुहुः कपाले क्षतजासवं॥ तथाहयो दंदशूकाः सर्पा नागाश्च तक्षकं॥ विधाय वत्सं दुदुहुः
बिलपात्रे विषं पयः॥२०॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषं॥ अरण्यपात्रे चाधुक्षन्मृगेंद्रेण च दंष्ट्रिणः॥२१॥ क्रव्यादाः
प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे॥ सुपर्णवत्सा विहगाश्चरं चाचरमेव च॥२२॥ सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक्पयः
गिरयो हिमवद्वत्सा नानाधातून्स्वधातुषु॥२४॥ वटवत्सा वनस्पतयः पृथग्रसमयं पयः॥ सर्वकामदुघां पृथ्वीं दुदुहुः
पृथुभावितां॥२३॥ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह॥२५॥

[illegible]काद्रवः तएव कद्रूसंततिर्नागाः॥२०॥ यवसं तृणं गोवृषं॥ श्रीरुद्रवाहनं वृषभं मृगेंद्रेणान्वयः॥२१॥ क्रव्यं मांसं चरं कीटादि॥ अचरं फला-
दि॥२२॥ अनुक्तसर्वसंग्रहार्थमाह। सर्वे स्वजातौ यो मुख्यः। तेन वत्सेन उपसंहरति एवमिति॥२४॥ स्वन्नं अन्नाद्यमन्नं। तमेव क्षीरभेदं दुदुहुः दो-
हः पात्रं॥२५॥

प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीं सिद्धिं नभसि विद्यां च ये च विद्याधरादयः॥

भागा० च०
५२

दुग्धां पृथ्वीं ॥ २६ ॥ धनुष्कोट्या गिरिशृंगाणि चूर्णयन् ॥ २७ ॥ २८ ॥ ग्रामाहट्टादि सूत्यः पुरो हट्टादिमत्यः ॥ ता एव महत्यः पत्तनानि दुर्गाणि विवि-
धानि यथाह बृहस्पतिः ॥ उदकं पर्वतं चाकं हस्तमैरिणं धान्वनं तथेति ॥ घोषान् आभीराणां निवासान् व्रजान् गवां निवासान् ॥ शिबिरं सेनानिवासस्था
नं तत्सहितान् आकरान् ॥ स्वर्णादिस्थानानि खेटाः ॥ कर्षुक ग्रामाः खर्वटाः ॥ पर्वतग्रामाः ॥ २९ ॥ इति चतुर्थे टीकायां अष्टादशः ॥ ऊनविंशे ऽश्वमेधांगहया तु
पहरणात् पृथ्वोः इंद्रं हंतुं प्रवृत्तस्य धात्रा वारणमुच्यते ॥ १ ॥ हयमेधेन शतेन निमित्तेन अदीक्षित दीक्षितोऽभवत् ॥ यातोऽश्वमेधसंकल्पमकरोदित्यर्थः

ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः ॥ दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥ २९ ॥ चूर्णयन् स्वधनुःकोट्या गिरिकू-
टानि राजराट् ॥ भूमंडलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥ अथास्मिन् भगवान्वैन्यः प्रजानां वृत्तिदः पिता ॥ निवासान्
कल्पयांचक्रे तत्र तत्र यथार्हतः ॥ ८ ॥ ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च ॥ घोषान् व्रजान् सशिबिरान् आकरान्
खेटखर्वटान् ॥ प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना ॥ यथा सुखं वसंति स्म तत्र तत्राकुतोभयाः ॥ ३० ॥ इति श्री
भागवते महापुराणे चतुर्थस्कंधे पृथुचरिते अष्टादशोऽध्यायः ॥ १८ ॥ श्रीमैत्रेय उवाच ॥ अथादीक्षत राजर्षिर्हयमेधशतेन
सः ॥ ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ १ ॥ तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः ॥ शतक्रतुर्न ममृषे पृथो
र्यज्ञमहोत्सवं ॥ २ ॥ यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः ॥ अन्वभूयत सर्वात्मा सर्वलोकपतिः प्रभुः ॥ ३ ॥

ब्रह्मावर्ते सरस्वती दृषद्वत्योर्नद्योर्यदंतरं ॥ तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ १ ॥ आत्मनः स्वस्य कर्मातिशयं इत्यतिशायं ॥ अभिप्रेत्य ज्ञात्वा
तदित्यतं ॥ पृथोर्यज्ञमहोत्सवं न ममर्ष न सेहे ॥ अतिशयमेव दर्शयति ॥ यत्रेति सप्तभिः ॥ २ ॥ साक्षाद्भगवत्प्रत्यक्षेण ॥ सिद्धादयश्च तं हरिं त्र ५२
यीपुरिस्तु तरेणान्वयः ॥ ५ ॥ ६ ॥

धर्मदुघा हविर्दोग्ध्री कामधेनुः सती ॥७॥ ऊहुर्वहंति स्म सर्वरसान् इक्षुद्राक्षादिरसान् क्षीरं दधि च अन्नं च पाकादि गोरसो घृतं तक्रं च तांश्च भू-
रीणि विस्तृतानि वर्ष्माणि शरीराणि येषां ते फलानि प्रसूयंते ॥ मधुच्युतः मधुस्राविणः संतः । चतुर्विधं भक्ष्यं भोज्यं चोष्यं लेह्यं च ॥९॥ अधो-
क्षजः ईशो नाशोऽपि यस्य परमुदयो निरवधिर्यस्मिन् तत्कर्म असूयन् । असहमानः प्रतिघातं विघ्नं चकारेत्यर्थः ॥ वैन्ये यजुःपतिं विष्णुं यज-

अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः ॥ अनुगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥ सिद्धविद्याधरा दैत्या दाना-
वा गुह्यकादयः सुनंदनंदप्रमुखाः ॥ पार्षदप्रवरा हरेः ॥५॥ कपिलो नारदो दत्तो योगेशाः सनकादयः ॥ तमन्वीयुर्भाग-
वता ये च तत्सेवनोत्सुकाः ॥६॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ॥ दोग्धि स्माभीप्सितानर्थान्यजमानस्य भा-
रत ॥७॥ ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् ॥ तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः ॥८॥ सिंधवो रत्ननिक-
रान्गिरयोऽन्नं चतुर्विधं ॥ उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयं ॥ अस-
यन्भगवानिंद्रः प्रतीघातमचीकरत् ॥ चरमेणाश्वमेधेन यजमाने यजुःपतिं ॥ वैन्ये यज्ञपशुं स्पर्धन्नपोवाह ति-
रोहितः ॥११॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ॥ आमुक्तमिव पाखंडं योऽधर्मे धर्मविभ्रमः ॥१२॥ अत्रिणा चोदि-
तो हंतुं पृथुपुत्रो महारथः ॥ अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणं ॥
जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुंचति ॥१३॥

माने स्पर्धन् इंद्रः । तिरोहितः सन् अपहृतवान् ॥११॥ त्वरमाणं धावंतं आमुक्तः प्रतिमुक्तः अपिनद्धः धारितः सन्नद्धो वर्मितः सज्जः इत्यमरः । पाखं-
डं वेषं कवचमिव गृहीतवंतमित्यर्थः । अधर्मे धर्मविभ्रमः अधर्मोऽयमिति भ्रांतिकरो यः ॥१२॥ न मुंचति स्म ॥१३॥ श्रीरामाय नमः

म

य
भाग० च०
५३

यज्ञाहननं यज्ञहननं तं तः॥ १४ एवं वैन्यसुतः प्रोक्तः त्वरमाणं विहायसा॥ १५॥ तस्मै हित्वा तदर्थमुत्सृज्य॥ १६ विचक्ष्य दृष्ट्वा॥ १७ उप
सृज्य सृष्ट्वा॥ तेन छन्नः सन् चषालो यूपाग्रे निहितः काष्ठकटकः तद्युक्ताद्यूपात् हिरण्यनिर्मिता रसना यस्य तं रसना यादृक्दले
नैवोद्दशालक्यारसनासहितमेवाश्वं तत्र यूपाग्रान्नीतवानित्यर्थः॥ १८॥ अवद्यं निंदितं रूपं मदं प्रज्ञानतः॥ तदेव पाखंडनाम निरुक्त्या

वधान्निवर्तं तं मत्योहं तवेत्रिरचोदयेत्॥ ऊहि यज्ञहनं तात महेंद्रं विबुधाधमं॥ १४॥ एवं वैन्यसुतः प्रोक्तः
त्वरमाणं विहायसा॥ अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव॥ १५॥ सोऽश्वं रूपं च तद्धित्वा तस्मा अंतर्हितः स्व
राट्॥ वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान्॥ १६॥ तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः॥ नामधेयं ददुस्तस्मै
विजिताश्व इति प्रभो॥ १७॥ उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः॥ चषालयूपतश्छन्नो हिरण्यरसनं प्रभो॥ १८
अत्रिः संदर्शयामास त्वरमाणं विहायसा॥ कपालखट्वाङ्गधरं वीरो नैनमबाधत॥ १९॥ अत्रिणा नोदितस्त
स्मै संदधे विशिखं रुषा॥ सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट्॥ २०॥ वीरश्चाश्वमुपादाय पितृयज्ञम
थाव्रजत्॥ तदवद्यं स्मृते। २२॥ एवमिंद्रे हरत्यश्वं वैन्ययज्ञजिघांसया तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणां
२४ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु॥ प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु॥ २५॥
+ हरे रूपं जगृहुर्ज्ञानदुर्बलाः॥ २१॥ यानि रूपाणि जगृहे इंद्रो हयजिहीर्षया। तानि पापस्य खंडानि लिंगं खंडमिहो + त्रुटी मू० लिं

दर्शयति। २२। यानीति वक्तृवचनेन चान्यान्यपि गृहीतानीत्युक्तं तत्प्रवृत्तिपाखंडमार्गाः प्रवृत्ता इत्याह। २३। तेन गृहीतेन पुन
र्विसृष्टेषु। २४। नग्ना जैनाः रक्तपटाः बौद्धाः आदिशब्देन कापालिकादयः तेषु उपधर्मेषु धर्मोपमेषु धर्म एवायमिति मतिः। स
ज्जते रतिद्वयोरन्वयः। पेशलेषु आपाततो रम्येषु॥ वाग्मिषु हेतुक्तिचतुरेषु॥ २५॥ ५३

शक्रवधेऽभिसंधितं कृतनिश्चयं प्रचोदितात् ॥ यज्ञोक्तवधादन्यत्र वधस्तु न युज्यते ॥ तद्वधं तु वयं करिष्याम इत्याहुः ॥ २७ ॥ वयमिह यज्ञनाशकं त्वत्-
कीर्त्या विहतप्रभं इंद्रमाह्वयामहे अयातयामैरगतवीर्यैराह्वानमंत्रैः ॥ अनंतरं च तवाहितं जुहवाम होष्यामः ॥ २८ ॥ अस्यपर्यो ॥ २९ ॥ स्रुक्हस्ते-
भ्यो यतान् ॥ ये यज्ञं यज्ञेन जिघांसत यथा यज्ञेनेष्टाः सुरा यस्य तनवः ॥ स इंद्रो भवतां वधार्हो न भवति यद्यस्माद्यज्ञो नामायमिंद्रो भगवतस्तनुरव-
तारः ॥ ततः स भगवान् कृत्वां रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरमित्युक्तत्वात् ॥ अतो बलीयसानेन सख्यमेव का-

तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः ॥ इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥ २६ ॥ तमृत्विजः शक्रवधाय संधि-
तं विचक्ष्य दुःप्रेक्ष्यमसह्यरंहसं ॥ निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥ २७ ॥ वयं मरुत्वंतमिहार्थ-
नाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषं ॥ अयातयामोपहवैरनंतरं प्रसह्य राजन् जुहवाम तेऽहितं ॥ २८ ॥ इत्यामंत्र्य क्रतुपतिं
विदुरास्यर्त्विजो रुषा ॥ स्रुक्हस्तान् जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत ॥ २९ ॥ न वध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः ॥ यं जि-
घांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥ तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः ॥ इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता
॥ ३१ ॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ॥ अलं ते क्रतुभिः स्विष्टैर्यद्भवान् मोक्षधर्मवित् ॥ ३२ ॥ नैवात्मने महें-
द्राय रोषमाहर्तुमर्हसि ॥ उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ॥ ३३ ॥

तेभ्यः ॥ अन्यथा न यः पाखंडं सृजतीत्यभिप्रायेणाह ॥ ३० ॥ तदिदमिंद्रेणानुष्ठितं महदन्याय्यं पश्यत ॥ किमित्यपेक्षायामाह ॥ धर्मस्य व्यतिकरं विपर्य-
यं पाखंडं पश्यत ॥ तर्हि किमस्माभिः कर्तव्यं तत्राह ॥ पृथुकीर्तेरिति ॥ ३१ ॥ एकेनोनं शतं यस्मिंस्तादृशाः क्रतुः क्रतुप्रयोगः ॥ पृथोर्भूयात् पृथुरिति
पाठे एकोनशतं क्रतवो यस्य तादृशोऽपि महेंद्रात् पृथुकीर्तिर्भूयादित्यर्थः ॥ तदेवमृत्विजः प्रत्युक्त्वा पृथुं प्रत्येवाह ॥ अलमिति ॥ ३२ ॥ आत्मने ।
वात्मने महेंद्राय रोषं कर्तुं नार्हसि ॥ तत्र हेतुः उभाविति ॥ तथापि क्रतुसमाप्तिमेव ध्यायंतं प्रत्याह ॥ ३३ ॥

ना० ख० ५४ अस्मिन्नयद्रुविघ्नेचिंतां मास्मन स्वथाः ॥ यस्माद्देवहतंकार्यकार्यं ध्यायतो मतः ननुस्थितं अतिरुषंसतत्र अंधंतमो मोहं विशति । ननुप्राप्ततिलनते ॥ ३४
अतएवक्रतुर्विरमतु नविघ्नः किंननिवार्यते अतआह ॥ यतोदेवेषु दुराग्रहो भवतीति ३५ ॥ ननिरिंडो पसंस्थैरधिष्ठिते ॥ हारिनिस्थितां यकर्व
केः ॥ यदंइत्तेस्वंभुस्नानीतितथा ॥ तेनसंष्टेः ततो मम किमिति चेत्तत्राह । नवानिति द्वाभ्यां ३६ ॥ सांख्ययोगादिनानासिद्धांतानुरूपं धर्मं वेनस
न्यात तु सपरित्रातुं देहादिहित्नोः कलेवरं वतीर्णोसि ३७ ॥ अस्य विश्वस्याद्भुतं विचार्यैवं तत्पादितो सितेवां विश्वसृङ्नाम्नीयी हि ॥ आर्षप्रयोगः

मास्मिन् महानागमन्यथास्मचिंतां निशामय ॥ यस्माद्देवहतं नुकर्तुं मनो तिरुषं विशाने तमोंधं ॥ ३४ ॥
क्रतुर्विरमतामेषदेवेषु दुरवग्रहः ॥ धर्मव्यतिकरो यत्र पाखंडै रिंद्रनिर्मितैः ॥ ३५ ॥ एतिरिंडोपसंसृष्टैः खंडैर्हारि निर्दने ॥
ह्रियमाणं विचक्ष्वैनं यस्तेयज्ञध्रुगश्वमुट् ॥ ३६ ॥ नवान्यस्त्रातुमिहावतीर्णः धर्मं च नानासमयानुरूपं ॥ वेनापचारादव
लुप्तमद्यतद्देहतो विष्णुकलासि वैन्यः ॥ ३७ ॥ सत्वं विमृश्यास्य भवं प्रजापते संकल्पनं विश्वसृजां पिपीपृहि । ऐंद्रींच मा मा
यामुपधर्ममातरं प्रचंडपाखंडपथं प्रभो ॥ ३८ ॥ मैत्रेय उवाच ॥ सइत्थं लोकगुरुणा समादिष्टो विशांपतिः ॥ तथा
चकृत्वा वात्सल्यं मघोनापि च संदधे ॥ ३९ ॥ कृत्वावभृथस्नानाय पृथवे भूरिकर्मणे ॥ वरान्ददुस्ते वरदायेतद्बर्हि
षितर्पिताः ॥ ४० ॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः ॥ आशिषो युयुजुः क्षत्तरादिराजाय सत्कृतः ॥ ४१ ॥ त्वा
याहूता महाबाहो सर्व एव समागताः ॥ पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ ४२ ॥

पररोयेत्यर्थः प्रचंडोयः पाखंडपथः । तस्मै वैंद्रीमाया उपधर्मं जननीतां जहि ॥ ३८ ॥ तथा कृत्वा यज्ञाग्रहं हित्वा वात्सल्यं स्नेहं च कृत्वा इंद्रेण सह संधा
नं कृतवान ॥ ३९ ॥ कृत्वावभृथस्नानं येन तस्मै ॥ ४० ॥ तुष्टानां वाक्यं त्वयेति ॥ ४१ ॥ ४२ ॥ ५४

प्रतिचर्ये एकोनविंशः ॥ १९ ॥ विंशे तु विष्णुना साक्षात् पृथोर्यज्ञे तु शासनं । वरदान प्रसंगे न प्रीतिरत्योन्य मुच्यते ॥ १ ॥ मघवता साकं इंद्रेण सह वर्त्तमानः
॥ १ ॥ आत्मानं त्वां क्षमां प यतो कारयितो मुख्य ॥ २ ॥ यर्हि यस्मात् कलेवरं आत्मा न भवंति । अतस्तदभिमानेन तेभ्यो नाभिद्रुह्यति ॥ ३ ॥ अविद्यास्वरू
पाख्यानं ततः कामः ततः कर्म तैरारब्धमिति विद्वान् अतएव प्रतिबुद्धः आत्मज्ञः अस्मिन्नेवानुषज्जते तथापि पुत्रादिममत्वेन सतोऽहो नवेत्तत्रा
रा ह ॥ असंसक्त इति प्रतिबोध कर्म विवएवन देहे नु गाना वमाह ॥ ५ ॥ इति द्वाभ्यां ॥ ६ ॥ असावात्मा आत्मनो देहात्परः भिन्नः तत्र न वधावेलक्षण्ये

इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकोनविंशोऽध्यायः ॥ मैत्रेय उवाच ॥ भगवानपि वैकुंठः साकं मघव
तावित्नुः यज्ञैर्यज्ञपतिः स्तुष्टो यज्ञभुक्तमभाषत ॥ १ ॥ श्रीभगवानुवाच ॥ एषतेत्वकरोद्भंगं हयमेधशतस्य ह ॥ क्षमापय ।
त आत्मानममुष्य क्षंतुमर्हसि ॥ २ ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः ॥ नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ।
॥ ३ ॥ पुरुषा यदि मुह्यंति त्वादृशा देवमायया ॥ श्रम एव परं जातो वृद्धानां दीर्घसेवया ॥ ४ ॥ अतः कायमिमं विद्वान्
अविद्याकामकर्मभिः ॥ ४ ॥ आरब्धमिति नैतस्मिन् प्रतिबुद्धोनुषज्जते ॥ ५ ॥ असंसक्तः शरीरेस्मिन्नमुनोत्पादि-
ते गृहे ॥ अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः ॥ ६ ॥ एकः शुद्धः स्वयंज्योतिर्निर्गुणोसौ गुणाश्रयः सर्वगोना
वृतः ॥ साक्षी निरात्मात्मात्मनः परः ॥ ७ ॥ य एवं संतमात्मानमात्मस्थं वेद पूरुषः । नाज्यते प्रकृतिस्थोपि तद्गुणैः समयि स्थितः ॥ ८ ॥

न तेनेदं साधयति ॥ ७ ॥ इति नवभिः पदैः ॥ देहो हि बालयुवादिभेदादनेकः मलिनश्च जडश्च स्वकारणाभूतगुणाश्रितश्च परिच्छिन्नश्च स्वगृहादि
निरावृतश्च दृश्यश्च ॥ सात्मा च आत्मा तु नैवं अतो भिन्नः ॥ ७ ॥ प्रकृतिस्थः देहस्थोपि तद्विकारैर्न लिप्यते । यतः समपि ब्रह्मणि स्थितः इवं मव स्था ।
कस्योत्पद्यत इत्यपेक्षायामाह ॥ ८ ॥

ना०ग०१०च० यर्हि विशालाशयः प्रसन्नमनाः तदा परित्यक्तगुणाः सन् सम्यग्दर्शनो स्थला शांतिमश्नुते सम्यग्दर्शनमेवाह १० उदासीनमेवा
५५ त्मानं द्रव्यज्ञानक्रियात्मनां कूटस्थमिवमात्मानं देहज्ञानकर्मेंद्रियमनसां अध्यक्षमिव स्थितमात्मानं यो वेद स संसारिणः कथं कूट
स्थत्वमत आह भिन्नस्य लिंगदेहस्य गुणप्रवाहः संसारः भिन्नत्वे हेतुः द्रव्याद्यात्मकस्यात एव चेतनाचिदात्मनः अतो दृष्टासु आप
दु सु हर्षशोकादिभिः न विक्रियंते १२ त्वं च सूरिः अतः सुखेषु खे च समः सतः समाना उत्तमाधममध्यमा यस्य जितानींद्रियाणि आशयश्च

यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः भजते ज्ञानकैस्तस्य मनोरागं न प्रसीदति ९ परित्यक्तगुणः सम्य
ग्दर्शनो विशालाशयः शांतिमेस समवस्थानं ब्रह्मकैवल्यमश्नुते १० उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनां
कूटस्थमिवमात्मानं यो वेदाप्नोति शोभनं ११ भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः
दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियंते मयि बद्धसौहृदाः १२ समः समानोत्तममध्यमाधमः सुखे च दुः
खे च जितेंद्रियाशयः मयोपक्लृप्ताखिललोकसंयुतो विधत्स्व धीराखिललोकरक्षणं १३ श्रेयः प्रजापा
लनमेव राज्ञो यत्सांपराये सुकृतात् षष्ठमंशं हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारो धमत्ति १४

येन सः त्वं अखिललोकरक्षणं विधत्स्व कथमेकेन मया रक्षणं कर्त्तुमशक्यं तत्राह मयेश्वरेण उपक्लृप्ताः संपादिताः अखिला
लोकाः अमात्याः नृपः तैः संयुतः ननु रक्षणं दंडादिसापेक्षं अतः स योग्यत्वा पुण्यं करिष्यामीति चेदत आह श्रेय इति १३ यद्यस्मा
त् परत्र परलोके प्रजाभिः कृतात् सुकृतात् षष्ठमंशं हर्ता हरति अरक्षणे दोषमाह अन्यथा प्रजाभिः कृतं पुण्यं यस्य सः प्र
जानां अघं अत्तिः पापं भुंक्ते अन्यथा पेस्य सर्व विवरणं करहारः सतु अरक्षिता चेत् एवं च मोक्षोप[illegible]नापास्ते न भविष्यतीत्याह १४ ५५

द्विजाग्र्याणां ॥ अनुमतस्य अनुवृत्तस्य ॥ परंपराप्राप्तो यो धर्मः स एव प्रधानः अर्थकामौ तु प्रासंगिकौ यस्य ॥ अन्यतमः अतिप्रायेणा
न्यः धर्मो दृष्टिना आत्मा इत्यर्थः । एकपद्यपाठे ॥ प्रधानवत्तमो ॥ अर्थकामौ यस्येत्यर्थः अस्याः पृथिव्याः अविता सन् ॥ अल्पेन कालेन गृहा
गतान् सनकादीन् ॥ द्रष्टासि ॥ अनुरक्तो लोको यस्मिन् सः ॥ १५ ॥ मत्तः मत्तः सकाशात् किंचिद्वरं वृणीष्व गुणाः समादयः शीलं निर्मत्सरा
दिस्वभावः तैरहं यंत्रितो वशीकृतः तद्विहितैस्तु मखादिभिर्नाहं ॥ सुलभः यतः समं चित्तं येषां तेष्वेव वर्तितुं शीलं यस्य सोऽहं ॥ १६ ॥ १७

एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः ॥ ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धाननुरक्तलोकः ॥ १५
वरं च मत्कंचन मानवेंद्र वृणीष्व तेऽहं गुणशीलयंत्रितः ॥ नाहं मखैर्वै सुलभस्तपोभिः योगेन वा यत्समचित्तवर्ती ॥ १६ ॥ मै
त्रेय उवाच ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् अनुशासित आदेशं शिरसा जगृहे हरेः ॥ १७ स्पृशंतं पादयोः प्रेमणा
व्रीडितं स्वेन कर्मणा ॥ शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ १८ ॥ भगवानपि विश्वात्मा पृथुनोपहृतार्हणः ॥ समुज्जिहानया
भक्त्या गृहीतचरणांबुजः ॥ १९ ॥ प्रस्थानाभिमुखोऽप्येनमनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सतां ॥ २० ॥ स
आदिराजो रचितांजलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ॥ न किंचनोवाच च बाष्पविक्लवो हृदोपगुह्या पदे स्थितः ॥ २१ ॥ मुमधात्
अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषं ॥ पदा स्पृशंतं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरंगविद्विषः ॥ २२ ॥

प्रेमा पर्यितं पादयोः स्पृशंतं स्वेन कर्मणा अश्वापहरणेन व्रीडितं प्रेमणा परिष्वज्य ॥ १८ ॥ भगवान् प्रस्थानाभिमुखोऽप्यनुग्रहेण विडंबित । न प्रतस्थे । प्रयाण
तं कृतवानिति द्वयोरन्वयः कथंभूतः उपहृतं अर्पितं अर्हणं यस्मै ॥ समुज्जिहानया समुद्गच्छंत्या वर्द्धमानया तया गृहीते चरणांबुजे यस्य पद्मपलाशा
क्षः लीयस्य । तथा न तः उपहृतं अर्पितं पश्यन् पश्यन् भगवतस्तत्तथापि रेखमुक्तात्स्यतत्कुडेकमाह । सद्गतिहान्यां ॥ २० ॥ बाष्पविक्लवत्वेन तत्क्षणमेव स्थि
तः सन् अमुं हरिं हृदा उपगुह्य अधात् । धृतवान् ॥ २१ ॥ अतृप्तयोर्दृशोः गोचरं विषयं संतं । पदा क्षितिं स्पृशंतमित्यन्वयः तावत् । न खलु देवाः पदा भुवं स्पृशंति
अतः हृदायं ... रखनो न तु हरिः आत्मानं विस्मृतवानिति । अत एव ... विन्यस्तं हस्ताग्रं येन तं वरं वृणीष्वेति यदुक्तं तत्र सह

हेविभोवरदानांब्रह्मादीनां।ईश्वरात्त्वत्तःसकाशाद्बुधः।कथंवरान्वृणीते।कीदृशान्गुणविक्रियात्मनांगुणविक्रियोहंकारः।सएवात्मायेषांतेषांब्रह्मादीनांसंबं
धिनः।देहाभिमानितानांगणानित्येवा।तथाचेद्बुधएवनवृणीतेत्यर्थः॥जुगुप्सितत्वादपीत्याहयइति।बुधएवाहमपिनवृणेइतिसमुच्चयायचकारः।कैवल्यप
तेइतिसंबोधनात्कैवल्यंवरिष्यतीतिमाशंकीरित्याह।नेति।२३॥महत्तमानांमुखतः।हृदयात्मुखद्वारेणनिर्गतोभवत्पदांभोजमकरंदः।यत्रःश्रवणादि
सुखंनास्ति।तादृशंचेत्कैवल्यंतर्हितत।क्वचित्कदाचिदपिनकामयेतर्हिकिंकामयेतदाह॥यतःश्रवणायकर्णानामयुतंविधत्स्व॥ननुकोप्येवंन

पृथुरुवाच॥ वरान्विभोत्वद्विबुधेश्वराद्बुधः॥कथंवृणीतेगुणविक्रियात्मनां॥येनारकाणामपिसंपद्यतिदेहिनांता
नीशकैवल्यपतेर्वृणेनच॥२३॥नकामयेनाथतदप्यहंक्वचितनयत्रयुष्मच्चरणांबुजासवः॥महत्तमांतर्हृदयान्मु
र. खच्युतोविधत्स्वकर्णायुतमेषमेवरः॥२४॥सउत्तमश्लोकमहन्मुखच्युतोभवत्पदांभोजसुधाकणानिलः॥स्मृतिंपु
नर्विस्मृततत्ववर्त्मनांकुयोगिनांनोवितरत्यलंवरैः॥२५॥

वृतवान्।किमन्यच्चिंतयेत्याह।ममतुएषएववरइति॥ननुकैवल्याभावेरागद्वेषाद्याकुलानांभक्तिसुखमपिनस्यादित्याशंक्याह।सइति।२४।भवत्पा-
दांभोजसुधायाःकणोलेशः।तत्संबंधीयोनिलःसएवदूरादपिकिंचिद्विशेषश्रवणमात्रमित्यर्थः।विस्मृतंतत्ववर्त्मायैः।कुयोगिनःतेषामपिस्मृतिं-
आत्मज्ञानंवितरसि॥अतोनखलुभक्तानांरागादिसंभवः।अतोनोस्माकंसारग्राहिणांअन्यैर्वरैरलं।भक्तावेवमोक्षादिसर्वसुखांतर्भावादि-
त्यर्थः।ननुभक्तिमुक्तिफलेवन्यतः।फलंविधायसाधतेनवतःकोपमाहःइत्याशंक्याह।२५॥

हेसुश्रवः मंगलकीर्त्ते तिशिवं यशः॥सतां संगमे यः सकृदपि यदृच्छयापि उपशृणोति गुणज्ञश्चेत्सः पशुं विनान्यः कथं विरमेत्॥गुणातिशयं स
चयति॥यं श्रीः यं यश एव प्रवव्रे वृतवती गुणानां सर्वपुरुषार्थानां संग्रहः॥स्वस्मिन समाहारः।तदिच्छया अतो लक्ष्मीरिवाल्पवरत्यागेन त्वा
महं भजे इत्याह॥अथेति।२६॥लालसः उत्सुकः सन कर्मणि क्रियमाणे यथेंडेण सह कलिः॥एवं न त्वावयोरपि किं लक्ष्म्या सह कलिः।स्यादिति वितर्क्य।
यति॥एकस्मिन्पत्यौ स्पर्द्धमानयोरावयोरपि किं कलिर्न स्यादिति काक्वा वितर्कः॥ननु पर्यायेण सेवायां न स्यात्।नैवं कृतत्वच्चरणयोरेवै

यशः शिवं सुश्रव आर्यसंगमे यदृच्छया चोपशृणोति ते सकृत्॥कथं गुणज्ञो विरमेदृते पशुं यं श्रीर्प्रवव्रे गुणसंग्रहे
च्छया॥२६॥अथाभजे त्वाखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः॥अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृ
तत्वच्चरणैकतानयोः॥२७॥जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितं॥करोति फल्ग्वप्युरु
दीनवत्सलः॥स्व एव धिष्ण्येऽभिरतस्य किं तया।२८॥भजंत्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयं
॥भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे॥२९॥

कतानो मनोविस्तारः।ययोस्तयोः।न वस्तुवा कलिस्तथापि न हेयं॥इत्याह जगदिति॥२७॥जगज्जनन्यां वैशसं विरोधः स्यादेव तत्र हेतुः यस्या
८ कर्मणि नः समीहितं इच्छा न वर्त्तते॥तथापि तु विरोधे मम त्वत्कृपा तत्रैवापि न वपक्षपात एव स्यादित्याह।फल्गु तुच्छमपि उरु बहु करोषि
यतो दीनवत्सलः स्वस्वरूप एव रममाणस्य तया किं प्रयोजनं तां नाद्रियस इत्यर्थः॥२८॥यतः त्वं दीनवत्सलः अत एव साधवो निःकामाः
अथ ज्ञानानंतरमपि त्वां भजंति॥कथंभूतं मायागुणानां विभ्रमो विलासः तस्योदयः कार्यं निरस्तो यस्मिन् तं किमर्थं भजंति।तत्राह भवत्पादि
दा

[illegible] ॥२८॥

भा० च० अनुग्रहोतेवाचातंत्यायदिजनोयंअसितः। बद्धः स्यात्तर्हि पुनः पुनः फलैर्विमोहितः। सनकथंकर्मकरोति। तन्माययाखंडितस्यत्वयापुनः खं
५७ डनं नविधेयं किंतुहितमेवचेष्टितव्यं इत्याह ३० त्वन्मायया कृताहात्मनः त्वत्तः खंडितः। पृथक्कृतः। यतोन्यत्पुत्रादिकं आशास्ते। अतः स्वयंवि
ज्ञापितएवहितंचेष्टितुमर्हसि ॥ बद्धितांजलिभिः भक्तितः। पूजिताः संतः वैकुंठानुगताः। पार्षदाश्च ३६ ॥ ३७ ॥ अदृश्याय लोचनपथमति

मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजंतमात्थयत ॥ वाचानुतंत्या यदि ते जनोसितः कथं पुनः कर्म करोति मो
हितः ॥ ३० ॥ त्वन्माययाद्धाजन ईश खंडितो यदन्यदाशास्त ऋतात्मनोबुधः ॥ यथाचरेद्बालहितं पिता स्वयं तथात्व
मेवार्हसि नः समीहितुं ॥ ३१ ॥ इत्यादिराजेन नुतः स विश्वदृक्तमाह राजन्मयि भक्तिरस्तु ते ॥ दिष्ट्येदृशी धीर्मयि ते कृता
यया मायां मदीयां तरति स्म दुस्त्यजां ॥ ३२ ॥ तत्कुरुष्व मयादिष्टमप्रमत्तः प्रजापते ॥ मदादेशकरो लोकः सर्वत्राप्नो
ति शोभनं ॥ ३३ ॥ मैत्रेय उवाच ॥ एवं वैन्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः ॥ पूजितोनुगृहीत्वैनं गंतुं चक्रेच्युतो मतिं ॥ ३४ ॥
देवर्षिपितृगंधर्वसिद्धचारणकिन्नराः ॥ पन्नगाप्सरसो मर्त्याः खगाः भूतान्यनेकशः ॥ २५ ॥ यज्ञेश्वरधिया राज्ञा वाग्वित्तां
जलिभक्तितः ॥ संभाजिता ययुः सर्वे वैकुंठानुगतास्ततः ॥ ३६ ॥ भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः ॥ हरन्निव मनो
मुष्य स्वधाम प्रत्यपद्यत ॥ ३७ ॥ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने ॥ अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥ ३८ ॥
॥ इति श्रीचतुर्थस्कंधे पृथुचरिते विंशोध्यायः ॥ मैत्रेय उवाच ॥ मौक्तिकैः कुसुमस्रग्भिः दुकूलैः स्वर्णतोरणैः ॥ महा
सुरभिभिर्धूपैः मंडितं तत्र तत्र ह ॥ १ ॥

कृताय संदर्शितात्मने संदर्शित आत्मा येन तस्मै ३८ ॥ चतुर्थे विंशः एकविंशे तु पृथुना प्रजानामनुशासनं । महासत्रे सुरादीनां महासदसि वर्ण्यते ॥ ५७
पुरं यथा विभूषितं तत्पुरमनुवर्णयति । मौक्तिकैरिति त्रिभिः ॥ १ ॥

म

चंदनागरुपुष्पैः। तोयैः आर्द्रा रथ्यादयस्तद्युक्तं। तोकैः हरितयवैः। अंकुरैर्वा अर्चिनिर्दीपैः। २। ३। संनतान्यपोषाणि मंगलानि दध्यादीनि तैः। सहानिड
गनुः मृष्टाः उज्वलाः कन्याश्च। ४। गतस्मयो निरहंकारः। ५। प्रियान्वरान् प्रददाति तथा। ६। गुणैर्महान् अतएव महत्तमः प्रकृष्टतमः। ७। गुणैर्विज्ञृंभितं
उर्जितं। गुणवद्भिः समाडितं। यशो गृणंतमर्चयन्नाह सदस्पते शौनक। ८। लब्धात्मप्रवेशसुराणां महिम्ना निर्येन स किमकरोदिति शेषः श्रवणोत्सु

चंदनागुरुतोयार्द्ररथ्याचत्वरमार्ग[ink blot]त॥ पुष्पाक्षतफलैस्तोकैर्लाजैरर्चिनिरर्चितं॥२॥ सवृंदैः कदलीस्तंभैः पूगपोतैः प
रिष्कृतं॥ तरुपल्लवमालाभिः॥ सर्वतः समलंकृतं॥ प्रियसंदीपवलिभिः संनताशेषमंगलैः। अनीयुर्मृष्टकन्याश्च मृष्ट
कुंडलमंडिताः॥४॥ शंखदुंदुभिघोषेण ब्रह्मघोषेण चार्त्विजां॥ विवेश नवतं वीरः स्तूयमानो गतस्मयः॥५॥ पूजितः
पूजयामास तत्र तत्र महायशाः। पौरान् जानपदांस्तांस्तान् प्रीतः प्रियवरप्रदः॥६॥ स एवमादीन्यनवद्यचेष्टितः क
र्माणि भूयांसि महान्महत्तमः। कुर्वन्शशासावनिमंडलं यशः स्फीतं विधायारुरुहे परं पदं॥७॥ सूत उवाच॥ स्कन्दा दिरा
ज्यस्य यशो विजृंभितं॥ गुणैरशेषैर्गुणवत्सभाजितं॥ क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणंतमर्चयन्
॥८॥ विदुर उवाच॥ सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः॥ बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गां॥ को न्वस्य कीर्तिं
न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः॥ लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं॥९॥ मैत्रेय उवा
च॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन्॥ आरब्धानेव बुभुजे भोगान् पुण्यजिहासया॥१०॥

कथमाविः। कुर्वन् प्रार्थ्यते। को न्विति। ९। यद्विक्रमः पृथिवीदोहनं। तस्योच्छिष्टं तु त्वं कामं तच्च तस्य कर्म। वदः प्राचीनकर्मनिरारब्धान्नेव बुभु
जे॥ न तु नोगांतरार्थं कर्माणि करोति॥ तदपि भोगेन पुण्यक्षपणेच्छया। न तु सुखाशक्त्या ॥१०॥

म

ना० च० अमसवलितं अथ इति हतः आदेशो आज्ञा यस्य । सत्तद्धी येषु एकै एव दंडं धारयंतीति लथा किं च सर्वत्रेनेत्याह ॥ अस्य कुलव्यतिरेकेण अच्युता॥
५८ गोत्रप्रवर्त्तक लुब्धा येषां वैष्णवानां तद्व्यतिरेकेण ॥ १२ ॥ एकदा तस्य महासत्रदीक्षा आसीत ॥ तत्र देवानां समाजे आसीदित्यर्थः ॥ १३ ॥ सदसो
मध्ये तु स्थितः ॥ सन् स मंततः भमैरूतेति व ष ॥ श्लोकेनान्वयः ॥ १३ ॥ आंसुः उन्नतः पीनौ चापुतौ च भुजौ यस्य ॥ कंडवद्रूणो ईरूणी॥
यस्य शोभमानः द्विजाः स्मितं च यस्या ॥ १४ ॥ व्यूढं विस्तीर्णं वक्षो यस्य ॥ वलित्रिस्तिसृभिः वल्या सुंदरं च दलवत ॥ अधो ग्रंअस्वत्थपत्रा।

सर्वेषां सवलिता देवाः ससद्धो यैकदंडधृक् ॥ अस्मत्र ब्राह्मणकुलात् अन्यत्राच्युतगोत्रतः ॥ १२ ॥ एकदासीन्महासत्रंदीक्षा
तत्र द्विवौकसां ॥ समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥ १३ ॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ॥ सुस्थितः सदसो
मध्ये ताराणामुडुराडिव ॥ १४ ॥ आंसुः पीनायतभुजो गौरः कंजारुणेक्षणः ॥ सुनासः सुमुखः सौम्य पीनांसः सुद्विजः
स्मितः ॥ १५ ॥ व्यूढो वक्षा वृहच्छ्रोणिः वलिवल्गूदरोदरः ॥ आवर्त्तनाभिरोजस्वी कांचनोरुरुदग्रपात ॥ १६ ॥ असम वा
क्रासितः स्निग्धमूर्द्धजः कंबुकंधरः । महाधने दुकूलाग्र्ये परिधायोपवीय च ॥ १७ ॥ व्यंजिताक्षेपगात्रश्रीः नियमन्यन्य
स्तलक्षणः ॥ कृष्णाजिनधरः श्रीमान् कुशपाणिर्व्रतोचितः ॥ १८ ॥ शिशिरस्निग्धतारक्षः तानेत्रतस मंततः । रुचि
वानिरमुदीर्य सदः संहर्षयन्निव ॥ चारुचित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवं ॥ २० ॥ ले

मिवोपरि विस्तृतं ॥ अधस्तात्संकुचितं उदरं यस्य ॥ आवर्त्त विधयत् ॥ वनिम्ना नाभिर्यस्य । कांचनवदुज्ज्वलौ ऊरू यस्य । उदग्रौ तु उन्नतौ गोपादौ य
स्य ॥ १६ ॥ सुदृष्मा श्वेतेव क्राश्वासिता स्निग्धा मूर्द्धजा यस्य । कंबुवत्त्रिरेखांकिता कंधरा यस्य परिधाय वसित्वा उपवीय उत्तरीयं कृत्वा ॥ १७ ॥ निय
मेन मितेन यम्ना निरूक्षणानि येन तत् ॥ अत एवातैरनावृतत्वात् व्यंजिता अक्षोभ्यगात्रश्रीः स्वाना विकीर्णता यस्य ॥ कृतान्युचितानि कर्माणि येन ॥ १८
शिशिरे स्नेहौ पहरे स्निग्धे च तारे यये ... रुणी यस्य ॥ इदं वक्ष्यमाणं वाक्यं उक्तवान् ॥ चारु श्रोत्रप्रियं चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रशस्तं मृ ५८
ष्टं कुंठं पदं गौरी रार्थं अविक्लवं अव्याकुलं ॥ २० ॥

नाचरणे हेतुः ॥ धर्मे जिज्ञासुभिः पुंभिः सत्सु मनीषितमावेद्यं वक्तव्यं । अतः प्रजानुशासनमिषेण जिज्ञासैव क्रियते न युष्मान्प्रति धर्मप्रवचनीयेति भावः
इदानीं प्रजाः शिक्षयिष्यन् प्रजाशिक्षादिकं मम आवश्यकमित्याह ॥ अहमिति त्रिभिः । २० । पृथक् सेतुषु स्थापयिता । २१ । दिष्टदृक् प्राक्तनकर्मसाक्षी
ईश्वरो यस्य तुष्यति ॥ तस्य ब्रह्मवादिनो यान् लोकान् नाकुः प्रजारक्षणाद्यनुष्ठानात्ते लोका मे स्युः कथंभूताः कामानां सम्यक्दोहः ॥ य करणं येषु अ
नपचात्वनिरोधं स्यादित्याह ॥ य इति । २२ । शमलं पापं भगं मे ऐश्वर्यं ॥ २३ ॥ तत्तस्मान्मे प्रजाः भर्तुर्मम पिंडार्थं पिंडदानवत् परलोकहिताय स्वकार्यमेव

राजोवाच ॥ सभ्याश्शृणुत भद्रं वः साधवो य इहागताः ॥ सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितं । २० अहं दंडधरो धात्रा
प्रजानामिह योजितः । रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् । २१ तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः ॥ लोकाः
स्युः कामसंदोहाः यस्य तुष्यति दिष्टदृक् । २२ ॥ य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् प्रजानां शमलं भुंक्ते भगं च स्वं ज-
हाति सः । २३ तत्प्रजा भर्तृपिंडार्थं स्वार्थमेवानसूयवः ॥ कुरुताधोक्षजधियः तर्हि मेनुग्रहः कृतः । २४ ॥ यूयं तदनुमो-
दध्वं पितृदेवर्षयोमलाः । कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलं । २५ अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः
इहामुत्र च लक्ष्यंते ज्योत्स्नावत्यः क्वचिद्भुवः ॥ २६ ॥

कुरुत ॥ स्वधर्ममेवानुतिष्ठत । अधोक्षजे धीर्येषां ते तद्दृशाः संतः वासुदेवार्पणश्चेत्यर्थः । अनुग्रहः कृतो भवेदिति शेषः ॥ २४ ॥ शास्तुः शिक्षयितुः
नु अनुज्ञातुरनुमोदितुश्च प्रेत्य परलोके यत्फलं तत्तुल्यं कर्मकर्तव्यमित्यनुमोदनमाह । ननु वासुदेवार्पणीयमिति ॥ वेनादिभिस्तदनंगीकारात् इत्ये-
वं वादिनः ॥ शनैः संबोधयन्नाह । २५ हे सत्तमाः यज्ञपतिर्नाम परमेश्वरः । केषांचिन्मते तावदस्ति ॥ तथापि विप्रतिपत्तेः न तत्सिद्धिरित्याशंक्य जगद्वै-
चित्र्यस्यान्यथानुपपत्तिं प्रमाणयति ॥ इहामुत्र च ज्योत्स्नावत्यः कांतिमत्यः भुवो भोगान्मयः शरीराणि च । नन्विदं कर्म वैचित्र्यादेव स्यैत्स्यति ॥ तथापि
विहंतु नवेनेश्वरसिद्धिरित्याह ॥ मनोरिरिति । २६ ॥

भा०च०
५९ अस्मत्पितामहस्यांगस्य ॥२७॥ कृत्यमस्ति । अवश्यं कर्मफलप्रदाता ज्ञाव्यमिति ते यां मतमित्यर्थः ॥२८॥ मृत्युर्दौहित्रादीन्विना धर्मविमोहि-
तान् अतः शोच्याननुकम्पेव फलदातास्तीति विधुदेपूपगताच देवता किं परमेश्वरेणेत्यत्राह ॥ वर्गेति । वर्गेति त्रिवर्गः स्वर्गो धर्मस्य फलं अपवर्गो मो-
क्षः तेषामैकात्म्येन ॥ एकरूपेण सर्वानुगतेन हेतुना तत्रापि प्रायेण हेतुना । अयं भावः । न तावज्जडस्य कर्मणः । फलदातृत्वं घटते । न चार्वा-
क्देवतानां स्वातंत्र्यं अंतर्यामी मिश्रुते । न च तदा कर्म्मभ्योऽन्यफलदातारं स्वयं च विततत्सिद्धिश्च संभवति । अतः सर्वात्मत्वेन कर्तुमकर्तुम-
न्यथाकर्तुं समर्थेन परमेश्वरेण ज्ञाव्यमिति किंच ॥ जीवानां मोहदः परमेश्वर एव न अर्वाक्देवताः तासामपि जीवत्वाविशेषात् । इत्याशये

मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः ॥ प्रियव्रतस्य राजर्षेः ॥ अंगस्यास्मत्पितुः पितुः ॥२७॥ ईदृशानामथान्येषामजस्य
च भवस्य च । प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥२८॥ वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥ दौहित्रादीन्
ऋते मृत्योः शोच्यान्धर्मविमोहितान् ॥२९॥ यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः सद्यः क्षिणो-
त्यन्वहमेधती सती । यथा पदांगुष्ठविनिःसृता सरित् ॥३०॥ विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्य-
वान् ॥ यदंघ्रिमूले कृतकेतनः पुनः न संसृतिं क्लेशवहां प्रपद्यते ॥३१॥ तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगु-
णैः स्वकर्मभिः ॥ अमायिनः कामदुघांघ्रिपंकजं यथाधिकारावसितार्थसिद्धयः ॥३२॥

नाहत्रिभिः ॥२९॥ यत्पादयोः सेवायामभिरुचिः । तपस्विनां संसारश्रान्तां अशेषैर्जन्मभिः संवृद्धं धियो मलं सद्यः क्षपयति । तमेव भजतेति तृतीये-
नान्वयः ॥३० कथंभूता अन्वहमहनि वर्द्धमाना सती सात्त्विकी तत्पादसंबंधस्यैवैष महिमेति । दृष्टांतेनाह यथेति ३१ विनिर्धुता अशेषा
मनोमला यस्य । असंगो वैराग्यं तेन विज्ञातस्य विशेषः साक्षात्कारः । तदेव वीर्यं यस्य । यस्यांघ्रिमूले कृताश्रयः सन् ॥३१ आत्मवृत्तिभिः अध्या- ५९
ति पनादिभिः मनोवचःकायानां गुणैः ध्यानस्तुतिपरिचर्याभिः । अमायिनः । कपटाः सन्तः ३२

ननु ब्रह्मादिभिः सेव्यो ऽयं किमस्मद्भक्त्या न विष्यतीति तत्राह ॥ यथाधिकारमेवावसितानि स्थितानि समस्ताचार्यसिद्धये सोस्य कर्मभिः यागादिभिः नउ
ते स्तुतं ॥ तत्र ब्रह्मादीनां ब्रह्मविरिंचितिन्यायेन सर्वेषु यागतदंगतत्फलेषु भगवद्दृष्ट्या कर्म कर्तव्यं ॥ न निन्दद्वेषेति व स्तुते षां भगवद्रूपतामा
ह ॥ यान्यां असौ भगवानेव स्वरूपतः ॥ विशुद्धविज्ञानघनो ऽपि अगुणो ऽपि अगुणो निर्विघ्नो ऽपि सन्निह कर्ममार्गे अनेकगुणः नानाविघ्नो व
भूतध्वरो यज्ञः संपद्यते ॥ यज्ञो वै विष्णुरिति श्रुतेः ॥ अनेकगुणत्वमेवाह ॥ पृथग्विधानि यानि द्रव्याणि तैः तत्र द्रव्याणि व्रीह्यादीनि गु
णाः शुक्लत्वादयः ॥ द्रक्रियो मंत्राः अर्थैः अर्थसाध्य उपहारः आशयः संकल्पः लिंगं पदार्थानां शक्तिः नामधेयोतिष्टोमादिः तैर्यज्ञाध्वरः ॥ सं
पद्यते ॥ योगफलस्यापि भगवद्रूपतामाह ॥ प्रधानेति ॥ ३३ ॥ एवंविधस्तु परमानंदोपि शरीरचेतनां विषयाकारां बुद्धिं प्रतिपद्य तदभिव्यं

आसा विहानेकगुणो गुणाध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः ॥ संपद्यते ऽर्थाशयलिंगनामभिः ॥ विशुद्धविज्ञान
घनः स्वरूपतः ॥ ३३ ॥ प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनां ॥ क्रियाफलत्वेन विभुर्विभाव्यते यथानलो
दारुषु तद्गुणात्मकः ॥ ३४ ॥ अहो ममामी वितरंत्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरं ॥ स्वधर्मयोगेन यजंति मामका
निरंतरं क्षोणितले दृढव्रताः ॥ ३५ ॥

मानंदरूपः सन् क्रियाफलत्वेन प्रतीयते एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः । यथानलो दारुषु स्थितः तद्गुणात्मकः
दारुधर्मा दैर्घ्यवक्रत्वादिमान् ॥ तद्वत्कथंभूते शरीरे । प्रधानं अव्यक्तं कालः क्षोभकः आशयो वासनाधर्मो दृष्टं तैः । संगृह्यते ऽत्र
तद्दृति तथा तस्मिन् तदेवं प्रवर्तान् भगवद्भक्तेन प्रवर्त्य स्वतः प्रवर्तानां प्रवर्तते अभिनंदनेन द्रढयति । अहो इति । वितरंति कुर्वंति ।
इदानीं हरिभक्तिदार्ढ्यं पक्षाग्रणां भक्तिं विधत्ते ॥ मा ज्ञात्वित्यष्टभिः महत्प्रयुताः [illegible] पूज्यतामिंद्रा त कुलस्य तेजः । तत्तस्मात् य
जा सकासात् द्विजानां कुले अडितो देवताये षां वैष्णवानां तेषां च कुले मा ज्ञात्व पुनर्भवेत् । ३५ । कश्चिचिदपि प्रनामो मा करोतु । कथंभूते सम्भक्ति व
[illegible] यामानो आत्मानं स्तुवन्नाह ॥ ३६ ॥

यच्चरणारविंदनात्। हरिर्लक्ष्मी यत्रास्थावाय ३७॥ यत्सेवया येश्वरस्तुष्यति तदेव ब्रह्मकुलं निषेव्यतां इति द्वयोरन्वयः॥ हरेर्लोकसंग्रह
रूपो यो धर्मः तत्परैः ननु ब्रह्मकुलेणैव नित्यं सेव्यमाने सर्वदेवतामुखतोग्नौ यज्ञाद्यनुष्ठाने। न स्यात् नचुतेन विना चित्तशुद्धिः। नचतया विना
मोक्षः स्यात् इत्याशंक्याह॥ पुमानिति द्वाभ्यां ३८। यस्य ब्रह्मकुलस्य नित्यं संबंधेनतिषेवया पुमान् स्वयमेव ज्ञानाभ्यासादिकं विनापि अत्यु
त्तमं धामं मोक्षं लभेत॥ कुतः यत्सेवयास्वत एव तातेति वेलं शीघ्रं प्रसीदतः। आत्मनः स्थितात्। अतः परं श्रेष्ठं देवानां किं मुखमस्ति ब्राह्मणं सेवैथ

माजातुतेजः प्रभवेन्महर्द्धिभिः। तितिक्षयातपसाविद्ययाच॥ देदीप्यमानेऽजितदेवतानांकुलेस्वयंराजकुलात्द्विजानां ३६॥
ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यंहरेर्यच्चरणाभिवंदनात्। अवापलक्ष्मीमनपायिनीयशोजगत्पवित्रंचमहत्तमा
ग्रणीः ३७॥ यत्सेवयाशेषगुहाशयः स्वराट् विप्रप्रियस्तुष्यतिकाममीश्वरः॥ तदेवतद्धर्मपरैर्विनीतैः सर्वात्म
नाब्रह्मकुलंनिषेव्यतां ३८॥ पुमाल्लभेतानतिवेलमात्मनः प्रसीदतोत्यंतशमंस्वतःस्वयं॥ यन्नित्यसंबंधिनिषेवयात
तः परंकिमत्रास्तिमुखंहविर्भुजां ३९॥ अश्नात्यनंतः खलु तत्त्वकोविदैः श्रद्धाहुतंयन्मुखइज्यनामभिः॥ नवैतथा
चेतनयाबहिःकृते हुताशने पारमहंस्यपर्यगुः ४०॥

वज्ञानादिफलं तत्सर्वं भवतीत्यर्थः। हरेरपि परं तदेव मुखमित्याह ३९। इज्यानां यज्ञानां इंद्रादीनां नामभिः यस्य मुखे श्रद्धया हुतं हविः अनं
तो यथाश्नाति तथा चेतनया रहिते हुताशने नाश्नाति॥ कैर्हुतं केन मन्नाति तत्त्वकोविदैः सर्वं देवमयश्चैतन्यमत्स्थिरं तत इति तत्त्वविद्भिः कु
ताएवं कृतोसौ तत्राह॥ पारमहंस्यज्ञानं तत्परान् अर्हतीति॥ अधिकुर्वतीति पारमहंस्यपर्या। तावाचो गावो यस्मिन् उपनिषद्भिः ज्ञानघनत्वेनोक्तं
इत्यर्थः॥ यद्वा परमहंसानां ज्ञाननिष्ठानां गम्यः पारमहंस्यः परितो गच्छंति॥ गावो यस्मात्सपर्यगुः इंद्रियाणि यंता स चासौ पारमहंस्यपर्य
गुः ज्ञानस्वरूपः सर्वांतर्यामीत्यर्थः॥ न केवलं चेतनत्वेन हुताशनाद्विशेषः किंतु वेदज्ञानादपीत्याह ४०॥ ६०

यदित्यस्यार्थः येब्रह्मवेदं नित्यं बिभ्रति। तेषामित्युत्तरेणान्वयः॥ मंगलं नाम प्रशस्ताचरणं नित्यमप्रशस्तस्य वर्जनं॥ एतद्धि मंगलं प्रोक्तमृषिभिस्त
त्वदर्शिभिः। मौनमध्ययनविरोधिवार्त्तात्यागः॥ समाधिना चित्तस्थैर्येण। अर्थदृष्टये वेदार्थमपि विचारयतीत्यर्थः॥ तत्र वेदे दृढं विश्वं हे।
आर्याः आयुः यावज्जीवं अधिकिरीटं किरीटस्योपरि वहेयइति। प्रार्थनायां लिङ्। यद्वेणं गुणानुजनस्य फलमाह। ६२। गुणायनं अन्वा

यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः॥ समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभा
सते॥ ६१॥ तेषामहं पादसरोजरेणुमार्यो वहेयाधिकिरीटमायुः॥ यं नित्यदा बिभ्रति आशु पापं नश्यत्यमुं सर्वगुणा
भजंति॥ ६२॥ गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणते नु संपदः॥ प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च
मह्यं॥ ६३॥ मैत्रेय उवाच॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः॥ तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः॥ ६४॥ पुत्रे
णाजयते लोका इति सत्यवती श्रुतिः॥ ब्रह्मदंडहतः पापो यद्वेनोऽत्यतरत्तमः॥ ६५॥ हिरण्यकशिपुश्चापि भगवा
न्निंदया तमः॥ विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः॥ ६६॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः॥
यस्येदृश्यच्युते भक्तिः॥ सर्वलोकैकभर्त्तरि॥ ६७॥ अहो वयं ह्यद्य पवित्रकीर्त्ते त्वयैव नाथेन मुकुंदनाथाः॥ यदु
त्तमश्लोकतमस्य विष्णोः॥ ब्रह्मण्यदेवस्य कथां व्यनक्ति॥ ६८॥ नात्यद्भुतमिदं राजंस्तवाजीव्यानुशासनं। प्र
जानुरागो महतां प्रकृतिः करुणात्मनां॥ ६९॥

नु संपदः॥ संवृणते सम्यक् भजंतीति तस्मात्प्रसीदतां प्रसीदतु गवां च कुलं। ६३॥ साधुवादमाह पुत्रेणेति षड्भिः॥ ६४॥ यद्यतः वेनोऽपि तमो
नरकं अत्यतरत। ६५। ६६॥ मुकुंदनाथाः समस्तनाथत्वमेव मुकुंदनाथत्वमेव मुकुंदनाथत्वे पर्यवसितमित्यर्थः। तत्र हेतुः। यदिति। आ
जीव्यानां सेवकानां। आसु अनुशासनं प्रजास्वनुरागः। प्रकृतिः स्वभावः॥ ६८॥

उपासादितः प्रापितः कर्मभिः भ्राम्यतां ईश्वरदृष्ट्या विशाल्ययोपि प्रणमंति ॥ नमइति ॥ ४९ ॥ ब्रह्माविश्य ॥ ब्राह्मणजातिमधिष्ठाय क्षत्रं क्षत्रियं विभर्ति
॥ ५० ॥ चतुर्थे एकविंशः ॥ २१ ॥ द्वाविंशे तु परं ज्ञानं पृथवे हरिशासनात् ॥ सनत्कुमारो भगवाननुपादिशदितीर्यते ॥ अर्चिषा लक्षितान् सनकादयइति ॥
ज्ञापितान् अचष्ट अपश्यत् ॥ २ ॥ तेषां दर्शनेनोद्गतान् प्राणान् प्राप्तुमिच्छुरिव ॥ अयं भावः ऊर्द्ध्वं प्राणा ह्युत्क्रामंति यूनः ॥ स्थविर आयति

अथ नस्तमसः पारस्त्वयोपासादितः प्रभो । भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥ ४९ ॥ नमो विवृद्धसत्वाय पुरु
षाय महीयसे ॥ यो ब्रह्म क्षत्रमाविश्य बिभर्तीदं स्वतेजसा ॥ ५० ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुच
रित्रे एकविंशः ॥ २१ ॥ मैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमं । तत्रोपजग्मुर्मुनयश्चत्वारः सूर्य
वर्चसः ॥ १ ॥ तांस्तु सिद्धेश्वरान् राजा व्योम्नोवतरतोर्चिषा ॥ लोकानपापान् कुर्वाणान् सानुगोचष्ट लक्षितान् ॥ २ ॥ तद्दर्श
नोद्गतप्राणान् प्रत्यादित्सुरिवोत्थितः ॥ ससदस्यानुगो वैन्य इंद्रियेशो गुणानिव । ३ ॥ गौरवाद्यंत्रितः सभ्यः प्रश्रया
नतकंधरः ॥ विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् । ४ । तत्पादशौचसलिलैर्मार्जितालकबंधनः ॥ तत्र शी
लवतां वृत्तमाचरन्मानयन्निव । ५ ॥

प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ इति स्मृतेः । प्राणास्तावदेनं साक्षिप्तास्तान् ॥ प्रत्युद्गच्छंति ॥ अतः स्वयमनुगच्छतः । प्राणहानिः स्यादि
ति न्यायादिव ससंभ्रमः ॥ प्रत्युद्गमं चकारेति ॥ सह सदस्यैरनुगैश्च वर्तमानः ॥ इंद्रियेशो जीवः गुणान् गंधादीन् प्रति यथोद्गच्छति तथोत्सुकोहृ ६२
ष्टातः । ३ ॥ यंत्रितो वशीकृतः गृहीत अध्यर्हणं । अर्घ्यं आसनं च यैस्तान् । ४ ॥ मार्जितं क्षालितं अलकबंधनं यस्य ॥ मानयन्निव स्वयं च चार
॥ ५ ॥

तवस्था पयगृडत्वे नमान्यान्प्रीतः प्राहेत्यु क्तं तदेव प्रतिपर्वेकं वचनमाह ॥ अहो इति द्वाभ्यां ॥ हे मंगलायनाः । मंगलमयनं येषां तेमया किं मंगलमाचरितं । यस्य योगिभिरपि दुर्दर्शानां ॥ ७ ॥ दुर्दर्शानां ॥ ७ ॥ दुर्दर्शत्वमाह ॥ सर्वदृशमात्मानं यथा सर्वेदृश्यानलक्ष्यंति ॥ ये अस्य विश्वस्य हेतवो महदादयो मन्वादयो वा ॥ यद्वा कथं भूतान ये अस्य सर्वदृशआत्मदर्शनस्य हेतवस्तान ॥ ९ ॥ ये षां साधूनां गृहाः अर्हाणां पूज्यानां वा यो वरणीयाः स्वीकारार्हाः ॥ अंबुआदयो येषु तादृशाः । अंबुचतृणंच भूमिश्च ईश्वरो गृहस्वामी । अवरा नृत्यादयश्च ॥ १० ॥ व्यालानामालया द्रुमा-

धि

हाटकासनआसीनान् स्वधिष्ण्ये इव पावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ॥ ६ ॥ अहो आचरितं किं मे मंगलं मंगलायनाः ॥ यस्य वो दर्शनं ह्यासीत् दुर्दर्शानां च योगिभिः ॥ ७ ॥ किं तस्य दुर्लभतरमिह लोके परत्र च ॥ यस्य विप्राः प्रसीदंति नः शिवो विष्णुश्च सानुगः ॥ ८ ॥ नैव लक्षयते लोको लोकान् पर्यटतोपि यान् ॥ यथा सर्वदृशं सर्वआत्मानं येस्य हेतवः ॥ ९ ॥ अधना अपि ते धन्याः साधवो गृहमेधिनः ॥ यद्गृहा ह्यर्हवर्याबुतृणभूमीश्वरावराः ॥ १० ॥ व्यालालयद्रुमा वै ते ष्वरिक्ताखिलसंपदः ॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥ ११ ॥ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः ॥ चरंति श्रद्धया बालाः एवं ब्रंहंति च ॥ १२ ॥ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवादिनां ॥ व्यसनावाप एतस्मिन् पतितानां स्वकर्मभिः ॥ १३ ॥ भगवत्सु कुशलप्रश्नः आत्मारामेषु नेष्यते ॥ कुशलाकुशला यत्र न संति मतिवृत्तयः ॥ १४ ॥

धीराः

एव ते ॥ अरिक्ताः पूर्णाः अखिलाः संपदो येषु तादृशाः ॥ अपि यद्गृहाः येषं गृहाः तीर्थपादीया वैष्णवाः तेषां पादतीर्थेन विवर्जिताः ॥ ११ ॥ स्वागतं स्वागमनं जातं ॥ यच्च यस्माद्बाला एव नवंतो बृहंति व्रतानि चरंति ॥ यद्वा येषां वो व्रतानि अन्ये बाला श्चरंति ॥ १२ ॥ इंद्रियार्था मेवार्थं पुरुषार्थं विदंति येषां नः व्यसनानुप्राप्ते ॥ यस्मिन् तस्मिन् संसारे ॥ न च स्वागतानां कुशलं पृच्छ्यते लोकेन त्वात्मनस्तत्राह ॥ १४ ॥

भा०च०
६२ तदस्मात् कृतविश्वासः सन् ॥ तपश्चितां तस्मात् तान् सुहृदो युष्मान् पृच्छामि ॥ न खल्वयं स्पो योगितुल्यास्तथं किंतु साक्षाद्भगवानेवेत्याह ॥ व्यक्तं नि-
श्चितं आत्मवतां धीराणां आत्मा ते ह्यात्मलेसप्रकाशमानः ॥ आत्मानं भवयति ॥ प्रकाशयतीति तत् य इमां पृथ्वीं चरति ॥१६॥ सूक्तं शोभनं वच-
नसारं स्वल्पायं ॥ सुष्ठु गंभीरार्थं मितमल्पाक्षरं ॥ मधु श्रोत्रप्रियं मुखं सत्यास्मयमान इव स्मतीयमानः ॥१७॥ स्वयमपि पृथोः संगमं निनंदतीति सं- १
गम इति ॥ उभये भावक श्रोतृणां येषां संभाषण सहितः ॥ प्रश्नः [illegible] ॥ सर्वेषां सं सुखं विस्तारयति ॥ तदे-
वं संगमं प्रश्नं चाभिनंद्य अनुवादमुखेनैव मोक्षसाधनमुपदिशति ॥ अस्त्येवेति ॥१९॥ गुणानामनुवादेन प्रश्नद्वारेण अनुवादप्रवर्तने श्रवा-

तदहं कृतविश्वासः सुहृदो वस्तपस्विनां ॥ व्यसना वापएतस्मिन् क्षेमः केनांजसा भवेत् ॥१५॥ व्यक्तमात्मवतामात्मा भग-
वानात्मभावनः ॥ स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः ॥१६॥ मैत्रेय उवाच ॥ पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं
मधु ॥ स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥१७॥ सनत्कुमार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना ॥ भव-
भवतो ता विदुषा चापि साधूनां मतिरीदृशी ॥ संगमः खलु साधूनामुभयेषां च संमतः ॥ यत्संभाषणसंप्रश्नः सर्वेषां
वितनोति शं ॥१९॥ अस्त्येव राजन् भवतो मधुद्विषः पादारविंदस्य गुणानुवादने ॥ रतिर्दुरापा विधुनोति नैष्ठिकी कामं क-
षायं मलमंतरात्मनः ॥२०॥ शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः ॥ असंग आत्मव्यति-
रिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥२१॥

णे नैष्ठिकी ॥ आत्मनो मनसः अंतःस्थं कामात्मकं विधुनोति ॥ कषायं धातुरागवत् निवर्त्यं चित्तस्थं बहिर्वैराग्यं आत्मनिरतिस्तु भवति न न
चलतोधिकं साधनमस्ति ॥ शास्त्रेषु तयोरेव मोक्षहेतुत्वनिश्चयादित्याह ॥ शास्त्रेष्विति ॥२०॥ सध्र्यक् विमृशेषु सम्यग्विचारेषु एतावानेव
सत्यं हे मुख्य हेतुरेव निश्चितः कोसौ आत्मव्यतिरिक्ते असंगो वैराग्यं आत्मनि च रतिः ॥ आत्मनो विशेषणं निर्गुणे ब्रह्मणीति ॥ तत्वेतावदेवाति- ल ६२
दुर्लभमित्याशंक्योक्तः ॥ माधिकारिणः श्रवणमात्रेण भवति अन्यस्य तु चित्तशुद्ध्यनुसारेण साधनतारतम्यतः वर्द्धमानया सत्त्वेयमिति सिद्धे-
त्याह ॥ सेति [illegible] ॥२१॥

सा ब्रह्मणि रतिः असंगश्च अग्रजादिभिः स्यादिति चतुर्थेनान्वयः ॥ जिज्ञासया तद्विशेषबुभुत्सया पुण्यं श्रवो यस्य तस्य हरेः ॥ पुण्यया कथया च
॥२२॥ अर्थारामाः अर्थनिष्ठास्तामसाः इंद्रियारामाः । कामनिष्ठा राजसाः तैः सह या गोष्ठी तस्यां अतृष्णया तेषां ये संमताः ॥ अर्थाः कामाश्च
तेषामपरिग्रहेण ॥ विविक्ते एकांते या रुचिस्तया चात्मन्येव परितोषे सति स्यात् ॥ किंतु हरेर्गुणपीयूषपानादिना ॥ तस्मिन् सति विविक्ते रुचि
नै कार्यो ॥ न चात्मनि परितोषः कार्य इत्यर्थः । पारमहंस्यचर्यया उपशमादिप्रधानया वृत्त्या ॥ स्मृत्या आत्महितानुसंधानेन ॥ मुकुंदाचरितमे
वाग्र्यं सीधु श्रेष्ठममृतं तच्चरितस्मृतिसुखेनेत्यर्थः ॥ मांगांतरस्यानिंदया निरीहया योगक्षेमार्थक्रियारहितत्वेन ॥ शीतोष्णादिद्वंद्वसहतेन

सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाध्यात्मिकयोगनिष्ठया ॥ योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पु
ण्यया च ॥२२॥ अर्थेंद्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेण ॥ विविक्तरुच्या परितोष आत्मन् विना हरे
र्गुणपीयूषपानात् ॥२३॥ अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैश्चाप्य या
निंदया निरीहया द्वंद्वतितिक्षया च ॥२४॥ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृंभमाणया ॥ भक्त्या ह्यसंगः
सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा रतिः ॥२५॥ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविराग
रंहसा ॥ दहत्यवीर्यं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः ॥२६॥

कथयत्यत्रोत्तमपिकपतं नक्राबंतरं गत्वेन पुनरुच्यते ॥२४॥ तत्पराः हरिभक्ताः तेषां कर्णपूराः कर्णालंकारभूताः । ये हरेर्गुणाः तेषां अभिधा
नेन ॥ सदसति कार्यकारणात्मके तेन भगवद्भक्त्या असंगः ॥ आत्मरतिश्च ततः किमत आह ॥२५॥ यदा निष्ठां प्राप्ता रतिर्भवति । तदा आचार्यवान् स
न् ज्ञानवैराग्ययोर्वेगेन ॥ अवीर्यं निर्वासनं सत् जीवस्य कोशमावरकं हृदयं पुमान् दहति ॥ कथंभूतं पंचभूतप्रधानं यद्वा ॥ अविद्यास्मितारा
गद्वेषाभिनिवेशाः ॥ पंच तदात्मकं उत्थितः प्रज्वलितोऽग्निः । योनिमरणिमिव ॥ यद्वा यदा रतिश्चाचार्यानुग्रहश्च तदा ज्ञानवैराग्यवेगेनानुस्थितः सा-
क्षात्कारः । अवीर्यं पुनः प्ररोहहेतुमं यथा तत्र बलेवं हृदयं दहति ॥ शेषं समानं ततः किमत आह ॥२६॥

दृग्धस्याश्रयो ह्रदयमुपाधिर्यस्य॥ अत एव मुक्ताः समस्ताः तद्गुणाः कर्तृत्वादयो येन आत्मनः सकाशात् वहिः। घटादिकं अंतः सुखदुः
खादिकं नैव विचष्टे न पश्यत्येव॥ कुतस्तत्र पेक्षायामाह। द्रष्टृदृश्यप्रतीतिरंतःकरणहेतुकेत्याह। परेति। परः आत्मा द्रष्टा तयोर्यद्व्य
वधानं ह्रदयं पूर्वमासीत्॥ यथा स्वप्ने राजाहमित्यारोपितं सैन्यादि द्रष्टारं दृश्यं सैन्यं च स्वप्नावस्थानाशे सति। न पश्यति तद्वत् द्रष्टृदृ
श्यप्रतीतेरंतःकरणहेतुकत्वमन्वयव्यतिरेकाभ्यामुपपादयति॥२७॥ आत्मानं द्रष्टारं इंद्रियार्थं दृश्यं यदुभयोस्तयोः परं संबंधहेतुम
हंकारं च सत्याशये अंतःकरणे सत्येव। आत्मनो विंवन्ततस्य प्रतिविंवस्य चैवं पश्यति॥ ननु उपलाघनावेतद्देवं चतुर्भिरसंगात्मरत्यो

दृग्धाश्रयो मुक्तसमस्ततद्गुणो नैवात्मनो वहिरंतर्विचष्टे॥ परात्मनोर्यद्व्यवधानं पुरस्तात् स्वप्ने यथा पुरुषस्तद्विना
शे।२७॥ आत्मानमिंद्रियार्थं च परं यदुभयोरपि॥ सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा।२८॥ इंद्रियैर्विषयाकृष्टै
राक्षिप्तं ध्यायतां मनः॥ चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात्।२९॥ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये॥ त
द्रोधं कवयः प्राहुरात्मापह्नवमात्मनः।३०॥ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः॥ यदध्यन्यस्य प्रेयस्त्वमात्मनः
स्वव्यतिक्रमात्।३१॥

मोक्षहेतुत्वमुक्तं इदानीं अनात्मरतेः संसारत्वे हेतुमाह॥ इंद्रियैरिति चतुर्भिः।२८। ध्यायतां गुणारोपेण स्मरतां
पुंसां इंद्रियाणि स्मृतेर्विषयैराकृष्टे तैश्च मनश्चाक्षिप्यते विषयाशक्तिं प्राप्यते॥ तच्च बुद्धेः सकाशाद्धर्मं चेतनां विचारसामर्थ्यं हरति। ए
तच्च विवेकिनां न लक्ष्यत इति दृष्टांतेनाह। तीरजः कुशादिः स्तंबो यथा मूले स्तोयं ह्रदात्॥ अपहरति तद्वत्।३०। चित्तं चेतनां स्मृतिं तस्यां भ्र
ष्टायां स्मृतिः। पूर्वापरानुसंधानं भ्रश्यति॥ एवं तद्रोधं ज्ञानभ्रंशं आत्मन एव हेतोः॥ आत्मनोपह्नवं नाशं प्राहुः।३१॥ यत् अधियं।
अधिकृत्य। अन्यस्य विषयस्य प्रियतमत्वं आत्मनस्तु कामाय सर्वं प्रियं भवतीति श्रुतेः। तस्यात्मनः। स्वैनैव यो व्यतिक्रमोपह्नवः तस्मात्॥ ६३
स्वार्थनाशः॥ अतः परतरः स्वार्थनाशो नास्ति कुत इत्यत आह॥३१॥

अर्थस्योसंनिधानं इंद्रियार्थः कामस्तस्यासंनिधानं सर्वार्थनाशः ॥ ज्ञानं विज्ञानं चापरोक्षं येन ध्यानेन ॥ मुख्यतां स्थावरतां ॥ ३३ ॥ अनात्मरतेरनर्थ
हेतुत्वमुक्तं प्रसंगात्पाप्याह । नेति ॥ ३३ ॥ यद्वस्तु धर्मादीनां विघातकं तस्मिन् संगो । तमः संसारं । तुल्यवन्निर्देशात् पुरुषार्थत्वातिवारयति । तत्रा
पीति । तत्रापि मोक्ष एवार्थ आत्यंतिकतया इष्यते त्रैवर्ग्योर्थो यतो नित्यं कृतांतभयसंयुतः ॥ ३५ ॥ कृतांतकालः भयसंयुतत्वमेवाह । परेषु ब्रह्मा
दयः अवरेषु अस्मदादयः गुणक्षोभात्तु पश्चाद्भवति । ईशः कालः तेन विध्वंसिताः आशिषो येषां ॥ ३६ ॥ यस्मादनात्मरतिरनर्थहेतुस्तस्मात्
गतां जंगमानां तस्थुषां स्थावराणां च देहादिनिरात्मना अहंकारेण चावृतानां । हृदि चकास्ति । प्रकाशते तमेव हि । कथं सोऽस्तीति पाठे सर्वेको

अर्थेंद्रियात्मासंनिधानं सर्वेषां अपन्हवो नृणां ॥ भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यतां ॥ ३३ ॥ न कुर्यात् कर्हिचित्संगं तमः
तीव्रं तितीर्षुकः ॥ धर्मार्थकाममोक्षाणां यदत्यंतविघातकं ॥ ३४ ॥ तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते ॥ त्रैवर्ग्योर्थो
यतो नित्यं कृतांतभयसंयुतः ॥ ३५ ॥ परेवरे च ये भावा गुणव्यतिकरादनु ॥ न तेषां विद्यते क्षेमम् ईशविध्वंसिताशिषः ॥ ३६ ॥ त
त्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियासुधिषणात्मभिरावृतानां ॥ यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक्च
का
कास्ति भगवांस्तमवेहि सोस्मि ॥ ३७ ॥

स्ति । ततोन्यद्वदेह सत्वित्यर्थः । ननु जीवो हृदि चकास्ति नान्यः तत्राह । क्षेत्रविदं जीवं तपति नियमयतीति । इति क्षेत्रवित्तपः तस्य भावस्तत्तातया । अंत
र्यामिरूपेण । यद्वा क्षेत्रवित्ते अहं ममतास्पदे पातीति क्षेत्रवित्तपः तेन रूपेण जीवस्तु पारतंत्र्यान्नपाति । ननु कर्मजीववृत्ति यक्रवृत्ति आविः प्रत्य
२ क् तर्हि बुद्धिः न । प्रत्यक् प्रतिलोमं चकास्ति । बुद्धिस्तु पराग्विषयाकारेण तर्ह्यहंकारः न वि[illegible]ष्वग्व्याप्तत्वेन सतु परिछिन्नः । एवंभूतो यो भगवान्
तमवेहीति । स्थावरं जंगमं वा हृदि चकास्तीति इत्युक्ते तेषां सत्वं तत्संबंधात् ईश्वरस्य मालिन्यं च प्राप्तं [illegible] निराकुर्वन्नुद्दिशन्नस्यात् प्रणमति ॥ ३७

भा० च०
६४

यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टनिकृष्टभावेन । कार्यकारणभावेन वा ॥ मायैव जातितं प्रपद्ये मायात्वे हेतुः विवेकेन विधुति निरास्ता
तिर्यस्य ॥ तत्र स्रजि वेति वा भ्रा छो दृष्टांतो नित्यमुक्तं ॥ यतः परिशुद्धं तत ॥ कुतः यतः विशुद्धं तत्वं सत्यं अत एव प्रत्यू ढा अनिरस्ता कर्मभिः कलिला
मलिना प्रकृतिर्येन तं ॥ तमेव हि ॥ ज्ञानमुपदिश्य तस्य ज्ञानस्य दुः करत्वेन भक्तिमुपदिशति द्वाभ्यां ॥ ३७ ॥ यस्य पादपंकजयोः पलाशानि अंगुलयो
[redacted]ते षां विलासाः । कांतिः तस्य भक्त्या अस्मत्या कर्माशयं । अहंकाररूपं हृदयग्रंथिं । कर्मभिरेव ग्रथितं रिक्ता निर्विषयाम

तस्मिन्निदं सदसदात्मतया ॥ विभाति माया विवेकविधुति स्रजि वाहि बुद्धिः ॥ तं नित्यमुक्तपरिशुद्धविशुद्धतत्वं प्रत्यू
ढ कर्मकलिलप्रकृतिं प्रपद्ये ॥ ३८ ॥ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति सं
तः तद्वन्न रिक्तमतयो यतयोपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवं ॥ ३९ ॥ कृच्छ्रो महानिह भवार्णवमप्लवे
शां षड्वर्गनक्रमसुखेन तितीर्षयंति ॥ तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णं ॥ ४० ॥ मै
त्रेय उवाच ॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ॥ दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृप ॥ ४१ ॥

तिर्येषां रुद्धः । प्रत्याहृतः स्रोतोगणास्तमरणं ननु ब्रह्मविदाप्नोति परमिति श्रुतेः । कथं यतयो नाद्रियंती त्युच्यते तत्राह । कृच्छ्र इति ॥ ३९ ॥ अप्ल
वेषां तत्प्लवस्तरणहेतुः ॥ इंद्रियाणि यषां तेषां महानिहतरणे कृच्छ्रः क्लेशाः । ते हि असुखेन योगादिना ॥ इंद्रियषड्वर्गग्राहं भवार्णवं तितीर्
षंति तत्तस्मात् दुर्गं तस्त्वं दुरार्णवमित्यर्थः ॥ यद्वा अर्णं वेत्याद्येऽसकारानावः आर्षः । दुस्तरोदकरूपं व्यसनमित्यर्थः । ४० ॥ आत्ममेधसा ब्रह्म
विदा दर्शिता आत्मनो गतिस्तत्वं येन । ४१ ॥ ६४

ब्रह्मन्निति संबोधनं आधान्यादेकस्य । यूयमित्युक्तिः सर्वान्प्रति ॥ ४२ ॥ आत्मना देहेन सह सर्वं राज्यादिकं मदीयं साधूच्छिष्टं साधुभिः स्वीयं।
सन्महत्प्रसादरूपेण दत्तं अतस्तत्र मम सत्वाभावात् ॥ गुरुदक्षिणार्थं किं ददे ॥ नाहि पित्रादत्तं मोदकादि तस्मैदानरूपेण प्रत्यर्प्यते
निवेदने तु तदीयस्यैव समर्पणं । यथा नृत्यो राज्ञः सेवारूपेण तांबूलादिकमर्पयति ॥ तथा मयापि सर्वं निवेदितं । स्वीकुरुतेत्याह । प्राणा इति
४३ आत्मनः स्वभावं प्रपंचयति । सेनापत्यं चेति द्वाभ्यां ४४ । ४५ ॥ वासः परिधत्ते अन्नमात्रं केवलं । भुंजानं तु दानेस्वतंत्राः सत्यपि स्वत्वे सर्वस्वे
न

पृथुरुवाच ॥ कृतो मेनुग्रहः पूर्वं हरिणार्त्तानुकंपिना ॥ तमापादयितुं ब्रह्मन् भगवान् यूयमागता ४२ ॥ निःपादितं
चकार्त्स्न्येन भगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टं हि सर्वं मे आत्मना सह किं ददे ॥ ४३ । प्राणा दाराः सुता ब्रह्मन् गृहा
श्च सपरिच्छदाः ॥ राज्यं बलं मही कोश इति सर्वं निवेदितं । ४४ ॥ सेनापत्यं च राज्यं च दंडनेतृत्वमेव च ॥ सर्वलोकाधि।
पत्यं च वेदशास्त्रविदर्हति ४५ ॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥ तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः
। ४६ । यैरीदृशी भगवतो गतिरात्मवादे एकांततो निगमिभिः प्रतिपादिता नः ॥ तुष्यंत्वदभ्रकरुणाः स्वकृतेन तेन
को नाम तत्प्रतिकरोति विनोदपात्रं ॥ ४७ ॥ मैत्रेय उवाच ॥ त आत्मयोगपतय आदि राजेन पूजिताः शीलं तदीयं
शंसंतः खेभवन्मिषतां सतां ४८ ॥ वैण्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया ॥ आत्मकाममिवात्मानं मेने आत्म।
न्यवस्थितः । ४९ ॥

नापि गुरोः प्रत्युपकर्तुं नाशक्यमित्याह । ४६ । आत्मवादे अध्यात्मविचारेण एकांततो निश्चयेन निगमिभिर्वेदविद्भिः ॥ ते नित्यं अनल्पकरुणाः स्वकृ
तेन कदानोद्धरणकर्मणा तुष्यंतु । को नाम तत्कृतमुपकारं प्रति स्वयमुपकरोति । उदपात्रेणांजलिं विना ॥ मया अंजलिरेव । तेभ्यो दत्त इत्यर्थः
यद्वा विनोदपात्रं उपहासास्पदं प्रत्युपकारे प्रवृत्तो जनानामुपहासास्पदं न वेदित्यर्थः । ४७ । खेभवन् आकाशमार्गेण गताः । ४८ । धुर्यो

भा०च०
६४

यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टनिकृष्टभावेन। कार्यकारणभावेन वा॥ मायैव भातीति तं प्रपद्ये मायात्वे हेतुः विवेकेन विधुति निराक्र-
तिर्यस्य॥ ततश्च स्रजि वेति वा आशयेऽदृष्टांते नित्यमुक्तं॥ यतः परिशुद्धं ततः॥ कुतः यतः विशुद्धतत्त्वं सत्यं अतएव प्रत्यूढा अनिरस्ता कर्मभिः कलिला
मलिना प्रकृतिर्येन तं॥ तमेवेहि॥ ज्ञानमुपदिश्य तस्य ज्ञानस्य दुःकरत्वेन भक्तिमुपदिशति द्वाभ्यां ३७॥ यस्य पादपंकजयोः पलाशानि अंगुलयः
[redacted]स्ते षां विलासाः। कांतिः तस्य भक्त्या सम्यक् कर्माशयं। अहंकाररूपं हृदयग्रंथिं। कर्मभिरेव ग्रथितं रिक्तानिर्विषयाम

तस्मिन्निदं सदसदात्मतया॥ विभाति माया विवेकविधुति स्रजि वाहिबुद्धिः॥ तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्व प्रत्यू-
ढकर्मकलिलप्रकृतिं प्रपद्ये॥ ३८॥ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति सं-
तः तद्वन्न रिक्तमतयो यतयोपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवं॥ ३९॥ कृच्छ्रो महानिह भवार्णवमप्लवे-
शां षड्वर्गनक्रमसुखेन तितीर्षयंति॥ तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णं॥ ४०॥ मै-
त्रेय उवाच॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा॥ दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृप॥ ४१॥

तिर्विषयां रुद्धः। प्रत्याहृतः स्रोतोगणास्तमरणं ननु ब्रह्मविदाप्नोति परमिति श्रुतेः। कथं यतयो नोद्ग्रथयंतीत्युच्यते तत्राह। कृच्छ्र इति ३९॥ अप्ल-
वेषां तत्प्लवस्तरणहेतुः॥ षट् ईशो येषां तेषां महानिहतरणे कृच्छ्रः क्लेशाः। ते हि असुखेन योगादिना॥ षड्वर्गग्राहं भवार्णवं तितीर्षंति ततस्मात् दुस्तरं भवार्णवमित्यर्थः॥ यद्वा अर्णवशब्दे सकारांतो नाव आर्षः। दुस्तरो दुःकररूपं व्यसनमित्यर्थः ४०॥ आत्ममेधसा ब्रह्म-
विदा दर्शिता आत्मनो गतिस्तत्त्वं येन। ४१॥

६४

उत्पन्निति संबोधनं आधान्यादेकस्य। यथमित्युक्तिः सर्वान्श्रुति ।६२। आत्मना देहेन सह सर्वं राज्यादिकं मदीयं साधुश्छिष्टं साधुभिः स्वीयं।
सन्महाप्रसादरूपेणादत्तं अतस्तत्र मम सत्वाभावात्॥ गुरुदक्षिणार्थे किं ददे॥ नाहि पित्राद्स्ते मोदकादि तस्मै दानरूपेण प्रत्यर्पयेते
निवेदनेन तु तदीयस्यैव समर्पणं। यथा नत्यो राज्ञः सेवारूपेण तांबूलादिकमर्पयति॥ तथा मयापि सर्वं निवेदितं स्वीकुरुते त्याह। प्राणा इति
।६३। आत्मनः स्वभावं प्रपंचयति। सेनापत्यं चेति द्वाभ्यां ।६४। ।६५। वासैः परिधत्ते अन्नमात्रं केवलं। भुंजानं तु दाने स्वतंत्राः सत्यपि स्वत्वे सर्वस्वे
न

पृथुरुवाच॥ कलो मेनुग्रहः एर्ष हरिणार्त्तानुकंपिना॥ तमायाद्यपि तं ब्रह्मन् भगवान् यूयमागता ।६२॥ नैः पादितं
चकास्तैर्ये ननगावद्धि घृणालुभिः॥ साध्वछिष्टं हि सर्वं मे आत्मनासह किं ददे॥६३॥ प्राणा दाराः सुता ब्रह्मन् गृहा
श्च सपरिच्छदाः॥ राज्यं बलं मही कोश इति सर्वं निवेदितं ।६४॥ सेनापत्यं च राज्यं च दंडनेतृत्वमेव च॥ सर्वलोकाधि।
पत्यं च वेदशास्त्रविदर्हति ।६५॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च॥ तस्यैवानुग्रहेणान्ये भुंजते क्षत्रियादयः
।६६। यैरीदृशी भगवतो गतिरात्मवादे एकांततो निगमिभिः प्रतिपादितानः॥ तुष्यंत्वदभ्रकरुणाः स्वकृतेन तेन
कोनाम तत्प्रतिकरोति विनोदपात्रं॥६७॥ मैत्रेय उवाच॥ त आत्मयोगपतय आदि[illegible]राजेन पूजिताः शीलं तदीयं
शंसंतः खेभूवन्मिषतां सतां ।६८॥ वैण्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया॥ आत्मकाममिवात्मानमेने आत्म।
न्यवस्थितः ।६९॥

नापि गुरोः प्रत्युपकर्तुं नाधावयमित्याह ।६६। आत्मवादे अध्यात्मविचारे एकांततो निश्चयेन निगमिभिर्वेदविद्भिः। ते नित्यं अनल्पकरुणाः स्वकृ
तेनैकदा लोकुरणकर्मणा तुष्यंतु। कोनाम तत्कृतमुपकारं प्रतिक्षयमुपकरोति। उदपात्रं अंजलिं विना॥ मयांजलिरेव। तेभ्यो वक्तुं इत्यर्थः
यद्वा विनोदपात्रं उपहासास्पदं प्रत्युपकारे प्रवृत्तो जनानामुपहासास्पदं न भवेदित्यर्थः ।६७। खे नभस्वन्ताकाशमार्गेणोद्गता ।६८। धुर्यो

मुख्यः अध्यात्मशिक्षया यासंस्थितिः। एकाग्रतातया आत्मन्यवस्थितः सन्मेने ४९ ब्रह्मसात्कृतं ब्रह्मण्येवर्पितं यथा भवति ५० निर्विषंगः
कर्मस्वनासक्तः कर्माध्यक्षं कर्मसाक्षिणं उदासीनं मन्वानो करोदिति पूर्वेणैवान्वयः नासङ्क्लेतेत्युत्तरेणान्वयः ५१। ५२ अर्चिषिमिनार्याः॥
५३॥ ५४॥ सोमश्चासौ राजा च स इव ५५ भुवो वसु गृह्णन् विसृजं श्चासौ सूर्यवत्। राज्ञः प्रतपन् माज्ञाकाणे आग्निरिवदुर्द्धर्षः ५६ द्यौः स्व

कर्माणि च यथाकालं यथादेशं यथाबलं॥ यथोचितं यथाचित्तमकरोद्ब्रह्मसात् कृतं॥ फलं ब्रह्मणि संन्यस्य निर्विषं
गः समाहितः॥ कर्माध्यक्षं च मन्वानः आत्मानं प्रकृतेः परं। ५२॥ गृहेषु वर्त्तमानोपि स साम्राज्यश्रिया न्वितः॥ तावु
ज्जितेंद्रियार्थेषु निरहंमतिरर्कवत् ५२॥ एवमध्यात्मयोगेन कर्माण्येषु समाचरन्॥ पुत्रानुत्पादयामास पंचार्चि
ष्यात्मसमतात्। ५३॥ विडितामृषभमकेत्राहर्यस्वंद्रविणं वकं॥ सर्वं कां लोकपालानां दधारैकः पृथुर्गुणान्। ५४
गोप्ता पायड गत्स्व स्वे काले काले च्युतात्मकः॥ मनोवाङ्मूर्त्तिभिः सौम्यैर्गुणैः संरंजयन्प्रजाः। ५५॥ राजेत्यधान्ना
मधेयं सोमराज इवापरः॥ सूर्यवद्विसृजन् गृह्णन् प्रतपंश्च भुवो वसुः॥ ५६॥ दुर्द्धर्षस्तेजसेवाग्निर्महीध्र इव
दुर्ज्जयः॥ तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणां॥ ५७॥ वर्षति यथाकामं पर्ज्जन्यइव तर्पयन्॥ समुद्र इव दु
पारसत्वेनाचलराडिव॥ धर्मराडिव शिक्षायां आश्चर्ये हिमवानिव॥ ५८॥ कुवेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा
मातरिश्वेव विश्वात्मा बलेन सहसौजसा॥ ५९॥ अविषह्यतया देवो भगवान् भूतराडिव॥ कंदर्प इव सौंदर्ये मृ
नस्वी मृगराडिव ६०॥
ऽइव ५७॥ समुद्रोयथागंभीर्येणैतावानितिनबुध्यतेतथासा वनिप्रायतोदुर्वोधः अचलराट्मेरुरिव ५८। सर्वा
त्मा सर्वगतः। संचारशक्तिः बलादिभिर्मातरिश्वेव ५९॥ भूतराट् रुद्रः। ६०॥

अडो ब्रह्मेव आत्मवत्त्वे डितेंद्रियत्वे ।६१॥ नन्वयादि निः परार्थोद्यमेव आत्मनैव तुल्यः निरुपमः पुंभिः सत्पुरुषैः राम सीतापतिर्यथा सतां कर्ण
रंध्रेषु प्रविष्टः ।६३॥ इति चतुर्थे द्वाविंशः ॥२२॥ त्रयोविंशे समार्गस्य वने नित्य समाधितः ॥ विमानमधिरुह्यैव वैकुंठगतिरीर्यते ॥१॥ अवयसं व
दृष्ट्वा ततो वनमागादिति ॥ तृतीयेनान्वयः स्वकृतः अनुसर्गः अनादिसर्गः पुरग्रामादिसर्गश्च वर्द्धित । अतोऽस्य स्वानुसर्गो येन तिः पाडात्
आत [illegible]ः दितः ईश्वरादेशो प्रजापालनादिर्येन उज्ज्ञितवान ॥

वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानज ॥ बृहस्पतिर्ब्रह्मवादे आत्मतत्त्वे स्वयं हरिः ॥६१॥ भक्त्या गोगुरुविप्रेषु विष्व
क्सेनानुवर्तिषु ॥ ह्रियाप्रश्रयशीलाभ्यां आत्मतुल्यः परोद्यमे ॥६२॥ कीर्त्योर्द्धगीयता पुंभिस्त्रैलोक्ये तत्र तत्र ह ॥ प्र
विष्टः कर्णरंध्रेषु स्त्रीणां रामः सतामिव ॥६३॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुचरिते द्वाविंशो
ध्यायः ॥२२॥ मैत्रेय उवाच ॥ दृष्ट्वात्मानं प्रवयसं एकदा वैन्य आत्मवान ॥ आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजाप
तिः ॥१॥ जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सतां ॥ निःपादितेश्वरादेशः यदर्थमिह जज्ञिवान ॥२॥ आत्मजेष्वात्मजां
न्यस्य विरहाद्रुदतीमिव ॥ प्रजासु विमनास्वेकः सदारोगात्तपोवनं ॥३॥ तत्राप्यदाभ्यनियमो वैखानससुसम्मते ॥ आर
ब्धउग्रतपसि यथा स्वविजये पुरा ॥४॥ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित ॥ अब्भक्षः कतिचित्पक्षान्वायु
भक्षः ततः परं ॥५॥ ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः ॥ आकंठमग्नः शिशिरे उदके स्थंडिलेशयः ॥६॥

आत्मजां पृथ्वीं विमनः सुचिंता सुतासु ॥ उदारः सनार्यः ॥३॥ अदाभ्या विघ्नैर्निवर्तयितुं मशक्यानि यमा यस्य । वानप्रस्थानां सुसंमति । उग्रे तपसि आर
ब्धः प्रवृत्तः कर्तरि क्तः स्वस्य धरामंडलस्य विजये पूर्वं यथा महता यत्नेन प्रवृत्तः ॥ उग्रं तपोऽचर्यायति ॥ कंदमूलेति त्रिभिः ॥४॥ क्वचित्कदाचिच्च ॥५
॥६॥

 चतुर्दिक्षु चत्वारोऽग्नयः ॥ [illegible]उपरि सूर्य इत्येवं पंचाग्नितापः स तापो यस्य स पंचतपाः । आसारं सह इत्यासारषाट् ॥ शिशिरे [illegible]कृतौ स्थंडिलेशयः
 न मिताशनः सर्वदा ।७। तेन तपसा क्रमानुसिद्धेन ध्यानेः आसेन ॥ ध्वस्तानि कर्माणि यस्य ॥ अतः अमल आशयो यस्य छिन्नानि बंधनानि वासनाय
स्य ॥ १०॥ परिकर्मणा परिचर्यया शुद्धसत्व आत्म मनो यस्य तस्य ज्ञानमनूलकीदृक्षं येन निरुपाधिं जीवकोशं हृदयग्रंथिं संशयानां आ अं
संनावनायहं आशयं चिच्छेद ॥ कीदृशेन अनयानन्यया निशितेन । कथं नूतया तस्य भगवतः । स्मरणेन अनुवर्तिः संयतेर्विर्यस्याः । सा तया निशि

तितिक्षुर्जितवाग्दांत ऊर्द्धरेता जितानलः ॥ आरराधयिषुः कृष्णमचरत्तप उत्तमं ।७॥ तेन क्रमानुसिद्धेन ध्वस्तकर्म
मलाशयः । प्राणायामैः संनिरुद्धषड्वर्गश्छिन्नबंधनः ॥८॥ सनत्कुमारो भगवान्यदाहाध्यात्मिकं परं योगं ते
नैव पूरुषमभजत्पुरुषर्षभः ।९॥ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा ॥ भक्तिर्भगवति ब्रह्मण्यनन्यविष
यानवत् ॥१०॥ तस्यानया भगवतः परिकर्मशुद्धसत्वात्मनः तदनुसंस्मरणानुपूर्त्या ॥ ज्ञानं विरक्तिमदभून्निशिते
न येन चिच्छेद संशयपदं निजजीवकोशं ॥११॥ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽछिनदिदं वयुनेन ये
न । तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् ।१२॥ एवं स वीरप्रवरः संयोज्यात्मानमा
त्मनि ॥ ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरं ।१३॥

तेन किंच ।२॥ छिन्नान्यधीरधिगतात्मगतिर्यस्य । यतो धिगतात्मगतिः । अत एव निरीहः ॥ आशासु स्पृहा निःस्पृहः । येन वयुनेन ज्ञानेन इदं ध्वंसयप सि
दं चिछेद हेतं तत्याज त्यक्तवान् ॥ तत्र यत्नादप्युपरराम इत्यर्थः ॥ तस्य योगसिद्धिष्वपि निस्पृहत्वं युक्तमेवेत्याह ॥ तावन्न प्रमतः । किं तु प्र
मत्तो भवति । तस्य श्रीकृष्णकथारत्वात् ॥ तासु लोभो न जात इत्यर्थः ।१२। देहत्यागप्रकारमेवाह ॥ संपीड्येति पंचभिः ।१३॥

पायुंगुदं संपीड्येति मुत्तरासनमुक्तं । संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः ॥ सव्येतरस्य गुल्फेन मुक्तासनमितीरितं ॥ मूलाधाराद्वायुमुत्था
प्य हृदयेन नाम्याम वस्थाप्य ततः कोष्ठे पूर्वस्थाप्य अयमुद्यत इति ॥ उत्तरेण अन्वयः कोष्ठान्येवाह ॥ हृदादीनांष्ठं कंठशीर्ष क्रमध्यं तस्मिन् ॥ १४
तं वायुपानंतरेणवास्य आणानुत्सर्पयन् क्रमेण मूर्द्धब्रह्मरंध्रे आवेष्य ततो देहारंभकपंचभूतानि समष्टिभूते षुविलापितवानित्याह । वायु
वायौ अयमुद्यत । एकीकृतवान् देहगतं कठिनांशं क्षितौ ॥ १५ ॥ खानींद्रियच्छिद्राणि द्रवांश्चांतो ये तदेवं देहं प्रविलाप्य क्षितीयां पृथ्वी प्रतिपत्य
र्थे ॥ महाभूतानामपि लयमाह । नाह क्षितिं अंभस्येकीकृतवान् । ततः अंभः अप्सु तेजः अग्निं वायुं ॥ तदेवं तामसाहंकारकार्याणां आकाशपर्य
तं लयमुक्त्वा सात्विकराजसाहंकारकार्याणां लयमाह । १६ ॥ इंद्रियेषु मन इति ॥ देवानामप्युपलक्षणं ॥ सविकल्पकज्ञानेन मनसः इंद्रियैराक

संयोज्य पायुं पार्ष्णिभ्यां वायुमुत्सारयन्नतः ॥ नाभ्यां कोष्ठे पि वस्थाप्य हृदुरः कंठशीर्षणि ॥ १४ ॥ उत्सर्पयन्मूर्द्धि
क्रमेणावेश्य निस्पृहः ॥ वायुं वायौ क्षितौ कायं तेजस्तेजस्यपयुज्यत ॥ १५ ॥ खान्याकाशे द्रवं तोये यथा स्थानं विभाग
शः ॥ क्षितिमंभसि तत्तेजः स्वदो वायुं नभस्यमुं ॥ १६ ॥ इंद्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवं ॥ भूतादिनामून्युत्कृष्य
महत्यात्मनि संदधे ॥ १७ ॥

र्षणात् । तेषुलयाभिधानं तत्कार्यत्वात् । तदुक्तं गीतासु ॥ इंद्रियाणां हि चरतां यन्मनोनुविधीयत इति ॥ अत्र च इंद्रियैर्विषयाकर्षैरास्विसंधा
यतां मन इति । इंद्रियेषु नन इति पाठे प्ययमर्थः । नहादीनां मतेनन स्यात् ॥ केषांचिन्मानसस्यानुमानिकत्व मते यींद्रिय व्यापारोस्येव नमो
गुणः शब्दः श्रोत्रग्राह्यः अतएवेंद्रियग्राह्यत्वात् इंद्रियेषु मनो विलापितमिति । तानींद्रियाणि यथोद्भवं उद्भवोत्र वति लानः सच विषयाधीन इ
ति । श्रोत्रादीनां शब्दादिविषुलयः ॥ यथा तन्मात्रकार्याण्येवेंद्रियाणि मनोप्यपंचीकृतपंचतन्मात्रकार्यं । अहंकारिकत्वानिज्ञानं न तु संतद्ध
नत्वविवक्षयोर विरोधः । भूतादिनाहंकारेण आगावशिष्टं ततः सहितानींद्रियाणि उत्कृष्यपरतो नीत्वा भूतादौ स्याते न सह महत्त्वे संदधे इत्यर्थः
क्र ए

सर्वेषां गुणानां कार्याणां विन्यासः । स्थितिर्यस्मिन् तं महांतं मायामये मायोपाधिप्रधाने जीवे ॥ चानुशयमुपाधिं यः पूर्वमनुशायी पुमान् ली
नः असौ पृथुः । ब्रह्मणि स्थितः सन् अजहादित्यर्थः नैवंप्रवेषामारन्य राज्ञी कथामाह ॥ अर्चिर्नामेति चतुर्भिः । १८ ॥ अनुगता अनुगता गामत
अतदर्हा तदयोग्या हि तिर्यक्पद्भ्यां भुवः स्पर्शनमिति यत् ॥ १९ ॥ भर्तुर्व्रतं यद्भूमिशायनादि तस्मिन् धर्मे या निष्ठा तया । कृशाणामपि यमार्षदेहयात्रा ।

तं सर्वगुणविन्याससंदोहे मायामये न्यधात् ॥ तं चानुशयमात्मस्थं असावनुशयी पुमान् ॥ १८ ॥ ज्ञानवैराग्यवीर्येण
स्वरूपस्थो जहात् प्रभुः ॥ अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनं ॥ सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः ॥ १९ ॥ अतीव
भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चारषदेहयात्रया ॥ नाविंदतार्तिं परिकर्षितापि सा प्रेयस्करस्पर्शनमाननिर्वृतिः
॥ २० ॥ देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः ॥ आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपय
दद्रिसानुनि ॥ २१ ॥ विधाय कृत्यं ह्रदिनीजलाप्लुता कृत्वोदकं भर्तुरुदारकर्म्मणः ॥ नत्वा दिविस्थांस्त्रिदशांस्त्रिः परी
त्य विवेश वह्निं ध्यायती भर्तृपादौ ॥ २२ ॥ विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिं ॥ तुष्टुवुर्वरदा देवैर्देवपत्न्यः स
हस्रशः ॥ कुर्वत्यः कुसुमासारं तस्मिन्मंदरसानुनि ॥ नदत्स्वमरतूर्येषु गृणंति स्म परस्परं । २३ ॥ देव्य ऊचुः ॥ अहो
इयं वधूर्धन्या या चैवं भूभुजां पतिं ॥ सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव ॥ २५ ॥ -

आक्रंदमूलादिवृत्तिः । नया चार्तिं दुःखं न प्राप । तत्र हेतुः प्रेयसः करेण स्पर्शनं मानश्च ताभ्यां निर्वृतिर्यस्याः । २० ॥ पृथिव्याः पत्युः दुहितृत्वं तस्या
देवतारूपेण । विपन्नं अखिलं चेतनादिकं च यस्मिन् ॥ तथाभूतं देहमालक्ष्य तद्देहं चितामारोपयत् । २१ । कृत्यं तत्कालोचितं विधाय ह्रदि
न्या जले आप्लुता स्नाता सती भर्तुरुदकं दत्वा दिवि अंतरिक्षे स्थितान् ॥ नत्वा वह्निं त्रिः प्रदक्षिणीकृत्य । २२ । देवैः सहिताः । २२ ॥ गृणंति स्म आना
पतं । २३ ॥

२६ भगवान पद्यते गम्यते तेनेनेति तथा तन्नैः कर्म्मज्ञानं ये चंचलायुषोपि साधयंतीति तेषां अन्यदेवतादिपदं किमु दुर्लभं न किंचिदित्यर्थः ॥ अन
न्तं पोषं गति सर्वं वितरति ॥२७॥ यतस्मात्मने द्रुह्यति ॥ योपवर्गसाधनं मानुष्यं लब्ध्वापि विषयेष्वासक्तिं याति ॥२८॥३०॥ विषाणपश्वादीनां वैरूप्यादीनां

सैषान्वगमत्तं बुद्धा तत्रैव अनुवैन्यं पतिं सती ॥ एषपतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा ॥२६॥ किं दुरापादनं तेषां मर्त्यानां
भगवत्पदं ॥ विद्युल्लोलायुषो ये वै नैष्कर्म्यं साधयंत्युत ॥२७॥ स वंचितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ॥ लब्ध्वापवा
र्ग्यं मानुष्यं विषयेषु विषज्जते ॥२८॥ मैत्रेय उवाच ॥ स्तुवंतीष्वसुरस्त्रीषु पतिलोकं गतां वधूं ॥ यं वा आत्मविदां धुर्यो
वैन्यः प्रापाच्युताश्रयः ॥२९॥ इत्थंभूतानुभावोसौ पृथुः पृथुपराक्रमः कीर्त्तितं तस्य चरितमुद्दामचरितस्य ते ॥३०॥ य इ
दं सुमहत्पुण्यं श्रद्धयावहितः पठेत् ॥ श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात् ॥३१॥ त्रिः कृत्व इदमाकर्ण्य नरो
नार्यथवादृता ॥ अप्रजः सुप्रजतमो निर्धनो धनवत्तमः ॥३२॥ अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पंडितः ॥ इदं स्वस्त्यय
नं पुंसां अमंगल्यनिवारणं ॥३३॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहं ॥ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभी
प्सुभिः ॥३४॥ श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परं ॥ संग्रामाभिमुखो राजा श्रुत्वैतदभियाति यान् ॥३५॥ बलिं तस्मै ह
रंत्यग्रे राजानः पृथवे यथा ॥ मुक्तान्यसंगो भगवत्यमलां भक्तिमुद्वहन् ॥३६॥ वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत्
पठेत् ॥३७॥ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकं ॥ अस्मिन्कृतमतिर्मर्त्यः पार्थिवीं गतिमाप्नुयात् ॥३८॥

वापतिः स्यात् ॥३२॥३२॥३३॥३४॥३५॥३६॥ यद्यपि बहूनि फलानि भवंति तथापि मुक्तान्यसंग एव श्रवणादि कुर्यात् ॥३७॥ महतो भगवतो
महात्म्यसूचकं ... पार्थिवीं ... मिति वा पाठः ॥३८॥

प्रथयन् कीर्तयन् । नवसिंधौ पोतः पादो यस्य ।३९। इति चतुर्थे त्रयोविंशः ।२३। एकादशान्तिरध्याये पृथोश्चरितमीरितं । प्रचेतसामप्या
ख्यातिः तन्मध्ये पंचविंशि पितृ ।१। चतुर्विंशे पृथोः पौत्रात् पृथोः प्राचीनबर्हिषः । प्रचेतसां तु निस्तेभ्यो रुद्रगीतं च वर्ण्यते ।२। अधिराट् आसीदित्यर्थः
यवीयेभ्यः कनिष्ठेभ्यः काष्ठा दिशः तुर्या चतुर्थी ।२। आकालव्यापथोर ।४। अश्वमेधे विडयावसरे अपत्यत्रयमेवाह । पावक इति । पुरा यः शापः

अनुदिनमिदमादरेण शृण्वन् पृथुचरितं प्रथयन् विमुक्तसंग । भगवति भवसिंधुपोतपादे स च निपुणां लभ
ते रतिं मनुष्यः ।३९। ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुचरिते नाम त्रयोविंशोध्यायः ॥२३॥
श्रीमैत्रेय उवाच ॥ विजिताश्वोधिराडासीत् पृथुपुत्रः पृथुश्रवाः । यवीयेभ्योददात् काष्ठाः भ्रातृभ्यो भ्रातृव श्री
त्सलः ।१। हर्यक्षायादिशत् प्राचीं धूम्रकेशाय दक्षिणां ।२। प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः । अंतर्धानग
श्री तिं शक्रात् लब्ध्वांतर्धानसंज्ञित । अपत्यत्रयमाधत्त शिखंडिन्यां सुसंमतं ।३। पावकः पवमानश्च शुचिरित्य
ग्नयः पुरा । वशिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ।४। अंतर्धानो नभस्वत्यां हविर्धानमविंदत । य इंद्र
मश्वहर्तारं विद्वानपि न जघ्निवान् ।५। राज्ञां वृत्तिं करादानदंडशुल्कादिदारुणां । मन्यमानो दीर्घसत्रव्या
जे जेन विससर्ज ह ।६। तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् । यजंस्तल्लोकतामाप कुशलेन समाधिना ।७।

तस्मान्मनुष्ये उत्पन्नाः संतः योगगतिं अग्नित्वं प्राप्ताः ।४। नभस्वत्यां अन्यस्यां भार्यायां अंतर्धानस्य विशेषणं य इति । एव
तेन शक्रात् अंतर्धानगतिलाभे कारणमुक्तं ।५। स चांतर्धानो राज्ञां वृत्तिं करादानादिनिदानं रूपं परहोऽन्मिकां मन्यमानो विससर्ज ६८
ह ।६।

हविर्द्धानिः हविर्धानस्यपुत्रः॥ योगेषुच प्राणायामादिषु क्रियाकांडे निष्णातत्वमाह॥ यस्येति॥ इदं वसुधातलं देवयजनं यज्ञवाटं। यत्रैको यज्ञः क
वे तः। तत्समीप एव यज्ञांतरं कुर्वतः संतः॥ अतएव प्राचीनबर्हिरित्युच्यते॥१०॥ समुद्रस्य कन्यां देवदेवेन ब्रह्मणोपदिष्टां शातद्रुतिं नाम किशोरीं बालां
परिक्रमंतीं प्रदक्षिणं गच्छंतीं॥ शुकीमिवेति। एवं ह्याख्यायते सप्तर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः। कामसंतप्तोऽभूत्। तं चैतद्भार्या स्वाहानामस त

हविर्द्धानेर्द्धविर्द्धानी विदुरासूत षट्सुतान्॥ वर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतं॥८॥ वर्हिषत्सुमहाभागो ह
विर्द्धानिः प्रजापतिः॥ क्रियाकांडेषु निष्णातः योगेषु च कुरूद्वह॥९॥ यस्येदं देवयजनमनुयज्ञं वितन्वतः॥ प्राची
दास्तृतंवसु नाग्रैः कुशैरासीदास्तृतं वसुधातलं॥१०॥ सामुद्रीं देवदेवोक्तामुपयेमे शातद्रुतिं॥ यां वीक्ष्य चारुसर्वांगीं किशो
रीं सुष्ठ्वलंकृतां॥११॥ परिक्रमंतीमुद्वाहे चकमेग्निः शुकीमिव॥ विबुधासुरगंधर्वमुनिसिद्धनरोरगाः॥ विजिताः सू
र्यया दिक्षु क्वणयंत्यैव नूपुरैः॥१२॥ प्राचीनवर्हिषः पुत्राः शातद्रुत्यां दशाभवन्॥ तुल्यनामव्रताः सर्वे धर्मस्ना
ताः प्रचेतसः॥१३॥ पित्रादिष्टाः प्रजासर्गे तपसेर्णवमाविशन्॥ दशवर्षसहस्राणि तपसार्चुस्तपस्पतिं॥१४॥

प्तर्षिनार्यारूपधारिणी सती रमयामास रमयित्वा च तद्रेतः शुकीरूपेणापररत्तं वेति धायागच्छत्। तां यथा सप्तर्षिनार्यो भ्रांत्याग्निः का
त्र मितवान्॥ तद्वच्छुकीमिवेति पाठे स्तोकघृतधारामिवेत्यर्थः॥११॥ सूर्यया नवोढयेव विबुधादयो विजिताः। अभिभूताः तत्र नूपुरैः। पादैरेव क्व
णयंत्यैव। तद्ध्वनिमात्रेणेत्यर्थः॥१२॥ तुल्यं नाम व्रतं आचारश्च येषां ते। धर्मस्नाताः धर्मपारगाः॥१३॥ तपसा तपसांपतिं हरिं अर्चयन् अर्च
यामास॥१४॥

भा० च० मुनयोपि संगत्यागेनासुमिश्रं यद्धधुरेव ॥ केवलं ननु प्रायुः तेनपिबेत ॥ ननु मुनीनां किं तद्ध्यानेन घोरत्वादित्याशंक्याह ॥ आत्मारामोपि
६९ लोकरचनया ॥ पालनाय ॥ सर्वा ज्ञाकारिणां पिवद्पौनं स्वत एव नवतीत्याशयेनाह ॥ प्रचेतस इति ॥ १८ ॥ १९ ॥ समुद्रंतत्किंचित्प्रलंतु
योधिकेचेति ॥ कर्मप्रवचनाय प्रसन्नाः शालिलाश्रयामत्स्यादयो यस्मिन ॥ २० ॥ नीलोत्पलोदरीनामाकरंजन्मस्थानं ॥ उत्पलांनोजकल्हारणि

॥ दुष्कृतं यथिहृष्टेन गिरिशेन प्रसीदता ॥ तद्ध्यायंतो जपंतश्च पूजयंतश्च संयताः ॥ १५ ॥ विदुर उवाच ॥ प्रचेतसां गिरित्रे
णयथासीत्पथि संगमः ॥ यदुताह हरः प्रीतः तन्नो ब्रह्मन्वदार्थवत ॥ १६ ॥ संगमः खलु विप्रर्षे शिवेनेह शरीरिणां ॥ दु
र्लभो मुनयो दध्युरसंगाद्यमभीप्सितं ॥ १७ ॥ आत्मारामोपि यस्त्वस्य लोककल्पस्य राधसे ॥ शक्त्या युक्तो विचरति घोर
या भगवान्भवः ॥ १८ ॥ मैत्रेय उवाच ॥ प्रचेतसः पितुर्वाक्यं शिरसादाय साधवः ॥ दिशं प्रतीचीं प्रययुः तपस्यादृतचे
तसः ॥ १९ ॥ ससमुद्रमुपविस्तीर्णमपश्यत्सुमहत्सरः ॥ महन्मन इव स्वच्छं प्रसन्नसलिलाशयं ॥ २० ॥ नीलरक्तोत्पलांभोजा
कल्हारेंदीवराकरं ॥ हंससारसचक्राह्वकारंडवनिकूजितं ॥ २१ ॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपं ॥ पद्मकोश
रजोदिक्षु विक्षिपत्पवनोत्सवं ॥ २२ ॥ तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरं ॥ विसिस्म्यू राजपुत्रास्ते मृदंगपणवाद्यनु
॥ २३ ॥
रात्रिदिनसंध्याविकासीनि इंदीवरं नीलोत्पलं ॥ तस्य पुनरुक्तिः प्राचुर्यज्ञापनार्थं हंसादीनिर्निकूजितं ॥ २१ ॥ मत्तानां भ्रमराणां सौस्वर्ये
ण हृष्टरोमाणीलतांघ्रिपा यस्मिन ॥ पद्मकोशरजो दिक्षु विक्षिपता पवनेनोत्सवो यस्मिन ॥ तत्र मृदंगपणवादि वाद्यं अनुपश्चात् दि
व्यमार्गे नेदैर्मनोहरं गांधर्वगानमाकर्ण्य विस्मयं प्राप्ताः ॥ पाठांतरे मृदंगपणवादिस्त्रवतरङ्गन ॥ तेषां ध्वनिं ॥ तिरस्कुर्वदित्यर्थः ६९
॥ २२ ॥

तेच त्रिलोचनं वीक्ष्य जातास्कर्षाः । प्रणेमुरित्युत्तरेणान्वयः ।२४॥ तप्तहेमवत्प्राभा कांतिः शितिः नीलः कंठो यस्य तं ।२५। २६। वेदिषदः ।
चिकीर्षितं भगवदाराधनं विदितं । अनुग्रहः कारणमाह ।२७। यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतं रंहसः । सूक्ष्मात्त्रिगुणात्प्र
३ धानाज्जीवसंज्ञमात् ॥ पुरुषाच्च परं ॥ प्रकृतिपुरुषयोर्नियंतारमित्यर्थः । तत्किं तस्य महत्वादित्याह ।२८॥ स्वधर्मनिष्ठः पुमानवकुभिः

तदैव सरसस्तस्मात् निःक्रामंतं महानुगं ॥ उपगीयमानममरप्रवरं विवुधानुगैः ।२४॥ तप्तहेमनिकायाभं शिति
कंठं त्रिलोचनं । प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ।२५। स तान्प्रपन्नान् गिरिशो भगवान् धर्मवत्सलः । धा
र्मज्ञान् शीलसंपन्नान् प्रीतः प्रीतानुवाच ह ।२६॥ श्रीरुद्र उवाच ॥ यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितं ॥ अनुग्रहा
य भद्रं वः एवं मे दर्शनं कृतं ।२७॥ यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतं वासुदेवं प्रपन्नः स प्रियो
हि मे ।२८॥ स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरंचतामेति ततः परं हि मां ॥ अव्याकृतं भागवतोथ वैष्णवं पदं यथा
हं विवुधाः कलात्यये ॥२९। अथ भागवता यूयं प्रियास्थ भगवान्यथा ॥ न मे भागवतानां च प्रेयानन्योस्ति कर्हिचि
त् ॥३०॥ इदं विविक्तं जप्तव्यं पवित्रं मंगलं परं ॥ निःश्रेयसकरं चापि श्रूयतां यद्वदामिव ।३१। मैत्रेय उवाच । इत्यनुक्रोश
हृदयो भगवानाह तान् शिवः ॥ बद्धांजलीन् राजपुत्रान् नारायणपरो वचः ।३२॥

ज्न्मभिः विरंचितां प्राप्नोति ततोपि पुण्यैर्वर्धति प्रायेण मामेति भागवतस्तु । अथ देहांते अव्याकृतं वैष्णवं पदमेति ॥ यथाहं रुद्रो रुद्रत्वाख्याधिकारि
कवद्वर्त्तमानः विवुधा देवाश्चाधिकारिकाः ॥ कलात्यये अधिकारांते लिंगभंगे सत्येष्यंति ।२९॥ अथ भागवतत्वाद्यूयं मे प्रियाः । स्थ भवथ । यद्वि
रपि मयि प्रीतिः कार्येत्याशयेनाह । न मदन्यो भागवतानां च प्रियान्योस्ति ।३०। अतः इदं तु सर्वं श्रूयतामिति ॥ विविक्तमसंकीर्णं यथा भवति
रहस्यादौ ब्रह्मणा सह स्तुवंत्यन्यैः श्रीमन्मिरिदं । स्तोत्रं प्राह चेतोन्यः कृपया भगवान्भवः ।३१।३२॥ ॥ ॥

भा०गा० च० तेजितं तवोत्कर्षः ॥ आत्मविद्धुर्याणां स्वस्तये शोभनसत्ता ॥ ये स्वानंदलाभावेत्यर्थः ॥ अतो मे स्वस्तिः स्वानंदसत्तास्तु ॥ ननु मम मोक्षे म
७० ह्यर्थ एव किं न स्यात्तत्राह । भगवताराधसा ध्यानं स्वरूपेण राद्धं परमानंदरूपेणैव नित्यं स्थितमित्यर्थः ॥ अतयेव भूतायात्मने तुभ्यं नमः
इत्यर्थः । सर्वस्मै सर्वरूपत्वं प्रपंचयन् प्रणमति सार्द्धदशभिः ॥ ३४ ॥ पंकजं लोकात्मकं नाभौ यस्य ॥ तस्मै कारणात्मने नमः । कारणत्वादेवास्
ष्यानां प्राणिनां उपाधयः भूतानि सूक्ष्माणि तन्मात्राणि इंद्रियाणि च तेषामात्मने नियंत्रे ॥ अंतःकरणचतुष्टयाधिष्ठातृत्वेन प्रणमति च
तुर्भिः श्लोकार्द्धैः वासुदेवाय चित्ताधिष्ठात्रे ॥ कूटस्थाय निर्विकाराय चित्तस्यैकरूपत्वात् । नमो निरुद्धाय हृषीकेशेंद्रियात्मने ॥ अहंकाराधिष्ठा

श्रीरुद्र उवाच ॥ जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे ॥ भगवताराधसाराद्धं सर्वस्मा आत्मने नमः ॥ ३३ ॥ नमः पंक
जनाभाय भूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे ॥ ३४ ॥ संकर्षणाय सूक्ष्माय दुरंतायांत
काय च ॥ नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने ॥ ३५ ॥ नमः परमहंसाय पूर्णाय निभृतात्मने । स्वर्गापवर्गद्वारा
य नित्यं शुचिषदे नमः ॥ ३६ ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे ॥ नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे ॥ ३७ ॥ तृसि
दाय च भूतानां नमः सर्वरसात्मने ॥ सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे ॥ ३८ ॥ नमस्त्रैलोक्यपालाय सह ओजो
बलाय च ॥ ३९ ॥

त्रे सूक्ष्माय अव्यक्ताय दुरंताय अनंताय ॥ अंतकाय मुखाग्निना लोकदाहकाय ॥ विश्वस्य प्रकर्षेण बोधो यस्मात् । अंतरात्मने बुध्याधिष्ठा
त्रे हृषीकाणामीषाय इंद्रियं मनः तदात्मने सूर्यरूपेण प्रणमति ॥ ३६ ॥ परमहंसाय सूर्याय । पूर्णाय तेजसा विश्वव्यापिने निभृतात्मने ह्रा
सवृद्धिशून्याय ॥ स्वर्गापवर्गयोर्द्वाराय शुचिष्पतः । करणानि षीदतीति शुचिषत्सस्मै हंसः शुचिषदिति श्रुतेः । ३६ । हिरण्यं वीर्यं यस्य
तस्मै तत्साधनायेत्यर्थः ॥ कुतः तं तवैतद्धिस्ताराय सोमत्वमाह ॥ ऊर्जे पितॄणामन्नाय इषे देवानामन्नाय । यज्ञरेतसे सोमाय सहि पितॄणां
देवानां चान्नं ॥ एवंरूपाय त्रय्याः पतये हरये नमः ॥ सूर्याग्निसोमत्वेनैवं तेजस्त्वमुक्त्वा जलत्वमाह ॥ ३७ । सर्वरसात्मने जलरूपाय । सर्वेषां सत्वानां
प्राणिनां ये आत्मानस्तेषां देहाय स्थवीयसे विराड्देहाय च ॥ ३८ ॥ ३९ ॥
७०

नमस्ते आकाशाय ॥ अर्धनालिंगाय । ज्ञापकाय परादगुणत्वात् ॥ अंतर्बहिरात्मने अंतर्बहिर्व्यवहारालंबनाय । एवं महात्मतरूपत्वमुक्तं ॥ अमु
ष्मै स्वर्गाय ॥ हरिवर्चसे एषवै ज्योतिष्मंतं पुण्यं लोकं याति इति श्रुतेः ४० ॥ अप्रवृत्तनिवृत्ताय च कर्मणोपि तद्देवाय यथाक्रमं पितृदेवप्रापि
फलाय ॥ अधर्म्मफलरूपाय च मृत्यवे ४१ ॥ हे ईशान आपिशांकारणात्मने सर्वकर्मफलदात्रे । मनवे सर्वज्ञाय मंत्रात्मकायेति वा । विष्णुत्वेन
प्रणमति । वृहते धर्माय परधर्मात्मने कृष्णाय ४२ रुद्ररूपेण प्रणमति ॥ मीढुषे रुद्राय अहंकृतमहंकारस्तदात्मने स च कर्तृकरणकर्म्मत्वा-

अर्धलिंगाय नमस्ते नमोंतर्बहिरात्मने ॥ नमः पुण्याय लोकाय अमुष्मै हरिवर्चसे ॥ ४० ॥ प्रवृत्ताय निवृत्ताय पितृदे
वाय कर्म्मणे ॥ नमो धर्मविपाकाय मृत्यवे दुःखदाय च ४१ ॥ नमस्ते आपिशामीशा मनवे कारणात्मने ॥ नमो धर्म्माय
वृहते कृष्णायाकुंठमेधसे ४२ ॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च ॥ शक्तित्रयसमेताय मीढुषे हंकृतात्मने
॥ ४३ ॥ चेति आकृतिरूपाय नमो वाचो विभूतये ॥ दर्पोनं मे दिदृक्षूणां देहि नागवतार्चितं ॥ रूपं प्रियतमं स्वानां स
र्वेंद्रियगुणांजनं ४४ ॥

नाय क्तित्रयसमेतां तस्मै ४३ ॥ ब्रह्मत्वेन प्रणमति । चेतो ज्ञातं आकूतिः । क्रियावाचोविधायन्नतिः सदिशिर्यस्मात्तस्मै ४३ ॥ एवं नमस्कृत्य दर्पोनं प्रार्थ
यते । दर्पोनमिति नवरिः नागवृतैः सतकृतं दर्पोनं देही त्वस्य विवरणं रूपमित्यादि प्रदर्शयेत्यं तं स्वानां भक्तानां प्रियतमरूपं प्रदर्शयेति । नव
मेनान्वयः ॥ सर्वेषामिंद्रियाणां ये गुणा विषयास्तेषामंजनं व्यंजकं सर्वेंद्रियविषयविषयिरूपमित्यर्थः । सर्वेंद्रियाणि स्वगुणैरनक्तिरंजयती
तिवा ४४ ॥

भा०अ०२८ स्निग्धः प्रावृषीव घनवत् श्यामं ॥ सर्वेषां सौंदर्याणां संग्रहो यस्मिन् । चारवश्चायताश्चत्वारो बाहवो यस्मिन् ॥ सुजातं यथोचितं सर्वावय-
७२ वं रुचिरमाननं यस्मिन् ॥ ४५ ॥ पद्मस्य कोशो मध्ये पलाशानि तद्वद्रुचिरे ईक्षणे यस्मिन् । सुकपोलमास्यं यस्मिन् । समौ कर्णौ विभूषणं यस्य कुंड-
लयोरग्रे वक्ष्यमाणत्वात् ॥ ४६ ॥ प्रीत्या प्रहसितावलोकौ यस्मिन् ॥ स्फुरंति किरीटादीनि यस्मिन् ॥ शंखादिमतामजतं ह्रिलक्ष्मी यद्दाम एतैः स्त-
माऋद्धिः उत्कर्षो यस्यास्ति तत् ॥ ४८ ॥ सौभगयुक्ता ग्रीवा येन सिंहस्य स्कंधे परितः ॥ प्रसरंतः केशा एव त्विषः । तादृशी सर्वतः । त्विषो विभ्रच्च
सौभगग्रीवः कौस्तुभो यस्मिन् । यद्वा सिंहस्येव स्कंधौ तयोस्त्विषः कुंडलहारादिदीप्तिभिर्वृद्धिरिति पृथग् विशेषणं सौभगयुक्ता ग्रीवा येन स कौ-

स्निग्ध। प्रावृट् घनश्यामं सर्वसौंदर्यसंग्रह ॥ चार्वायतचतुर्बाहुं सुजातरुचिराननं । ४५ ॥ पद्मकोशपलाशाक्षं सुंद-
रं सुन्नुनासिकं ॥ सुद्विजं सुकपोलास्यं समकर्णविभूषणं ॥ प्रीतिप्रहसितापांगमलकैरुपशोभितं । ४६ ॥ लसत्पंका-
जकिंजल्कदुकूलं मृष्टकुंडलं ॥ ४७ ॥ स्फुरत्किरीटवलयहारनूपुरमेखलं । शंखचक्रगदापद्ममालामण्युत्तमा-
र्द्धिमत् । ४८ ॥ सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभं ॥ श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् । ४९ ।
ते परारेचकसंविग्नवलिवल्गुदलोदरं ॥ प्रतिसंक्रामयद्विश्वं नाभ्यावर्तं गंभीरया ॥ ५० । श्यामश्रोण्यधिरोचिष्णुदुकू-
लस्वर्णमेखलं ॥ समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं ॥ ५१ ॥

स्तुभो यस्मिन् । श्रियाहेतुभूतया क्षिप्तस्तिरस्कृतो निकषाश्मा स्वर्णरेखांकितनिकषपाषाणो येन तादृशेनोरसा उल्लसच्छोभमानं ॥ ४९ ॥
श्वासोच्छ्वासाभ्यां संविग्नाश्चंचला वलयश्चाति: । वल्गु हृद्यं दलवदश्वत्थपत्रसदृशमुदरं यस्मिन् प्रतिसंक्रामयन् । यतो निर्गतं तेनैव द्वारेण पु-
नः प्रवेशयदिव ॥ ५० ॥ श्यामश्रोण्यधिकं रोचिष्णुः पत्पीतं दुकूलं तत्र स्वर्णमयी मेखला यस्मिन् । समौ अंघ्री जंघे च ऊरू च निम्ने जानुनी च स-
मे श्चारुतरे तैः शोभनं दर्शनं यस्य समाश्चार्वो अंघ्र्यादयो यस्मिन् ~ ~ जानुनी यस्मिन् । शोभनं दर्शनं यस्येति पदत्रयं वा ॥ ५१ ॥ ७२

यदादौ पश्यन्निर्येत ॥ यद्वा एवं भूतेन पदोपलक्षितं रूपं पदं पादारणं प्रदर्शयेत्यर्थः ॥ पदा शरदि यत्पद्मं तस्य पलाशं तद्वद्रोचिर्यस्य तेन नख-
द्युभिर्निरंतरमेव मघमज्ञानं विधुन्वता स्वीयं रूपं पदं पादारणं प्रदर्शय ॥ अपास्तं भक्तादादीनां साध्वसं येन तत् ॥ हे गुरो यतस्त्वमेव तमोजुषा-
मज्ञानां मार्गप्रदर्शको गुरुः ॥ ५२ ॥ अतिदुर्लभमिदं मया प्रार्थितमिति चेत्तत्राह ॥ एतद्रूपमनुध्येयं ध्यातव्यमेव तत्तु प्रत्यक्षतः प्राप्यमित्यर्थः
॥ ५३ ॥ तर्हि किं केनापि न प्राप्यते तत्राह भवानिति ॥ दुर्लभत्वमेवाह ॥ स्वाराज्यं तस्याप्यभिमतः स्पृहणीयः ॥ किंच एकांतेन यत्नात्मवित ॥ तस्या-

पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोंतरघं विधुन्वता ॥ प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजु-
षां ॥ ५२ ॥ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सता ॥ यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठतां ॥ ५३ ॥ भवान्भक्तिमता लभ्यो दु-
र्लभः सर्वदेहिनां ॥ स्वाराज्यस्याप्यभिमतः एकांतेनात्मविद्गतिः ॥ ५४ ॥ तं दुराराध्यमाराध्य सतामपि दुरापया ॥ एकांतभक्त्या
को वांछेत्पादमूलं विना बहिः ॥ ५५ ॥ यत्र निर्विष्टमरणं कृतांतो नाभिमन्यते ॥ विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रु-
योर्गतिं ॥६१॥ अहंभवान्नचान्यस्त्वंत्वमेवाहंविचक्ष्वभोः ॥ ननौपश्यंतिकवयश्छिद्रंजातुमनागपि ॥६२॥ यथा
पुरुषआत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूतमवेक्षेततथैवांतरमावयोः ॥६३॥ वर्हिष्मन्नेतदध्यात्मपारोक्ष्येण
प्रदर्शितं ॥ यत्परोक्षप्रियोदेवोभगवान्विश्वभावनः ॥६४॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेअष्टा
विंशोध्यायः ॥२८॥

वयोर्वस्तुभावंगतिंस्वरूपंपश्यतत्वंपदार्थयोरच्छिद्रंदर्शनैक्यमाह ॥६१॥ अहमेवभवान्
उपचारंवारयतिनचान्यइति । अतिहायदेशाद्युस्त्यानिप्रायःच्छिद्रमंतरं ॥ तर्हिकथमावयोरल्पत्वसर्वज्ञत्वादिधर्मभेदः ॥ तत्राह । यथेति
॥६२॥ आत्मानंदेहंआदर्शेनिर्मलंमहांतंस्थिरंचावेक्षेत ॥ परत्रचक्षुषिचतद्विपरीतंविद्याविद्योपाधिकृतोधर्मभेदइत्यर्थः । एवंसमा
नसोहंसोतेनप्रतिबोधितः स्वस्थः तद्व्यभिचारेणेश्वरवियोगेनकथामात्रमिति । बुद्धिंवारयति । वर्हिष्मन्निति ॥६३॥ पारोक्ष्येणरा
ज्ञंकथामिषेणतत्रहेतुःयद्यस्मात ॥६४॥ इतिचतुर्थेष्टाविंशोध्यायः ॥२८॥

भागवत
८६ न

इनत्रित्रोपरो स्मार्थ । व्याख्याने नोपसंहृतं ॥ स्त्रीसंगतो नवस्त्रीत्रासंगान्मुक्तिरितिस्फुटं २ ॥ अनन्तिलिंपतिचेतनीकरोतीत्यर्थः य
द्वाप्यनन्तिप्रकटयति । ततश्च स्वकर्मणा पुरंजनपदं व्याख्यातं भवति ॥ एकद्वादयः पादा यस्य ३ ॥ अविज्ञात पाश्चेनश्रास्तत्क्र
यः सर्वेश्वरः ॥ अविज्ञातनाम निरुक्तिः । यद्यस्मात्पुंभिः नामादियोगेन विज्ञायते ३ । तत्रतेषु पुरेमध्ये ४ अक्षमिति इंद्रियैः पंचव
तित्वात्पंचशीर्षाः । सर्वेऽस्त्वप्राणः एकादशमहानटाइत्यनेनैकादशो महानटो नायकः इत्यर्थः ७ बृहद्बलं यस्य तन्मनः नव

श्री दैन ब हिं स वा च ॥ भगवंस्तेवचो स्मानिर्भेसम्यगवगम्यते ॥ कवयस्तद्विजानंतिनवयं कर्ममोहिताः २ ॥
ना र द उ वा च । पुरुषं पुरंजनं विद्यात्यद्व्यनक्त्यात्मनः पुरं एकद्वित्रिचतुः पादं वहुपादमपादकं ३ । यो विज्ञाता
हृतस्तस्य पुरुषस्य सखेश्वरः ॥ यन्नविज्ञायते पुंभिर्नामभिर्वाक्रियागुणैः ४ ॥ यदाजिघृक्षुः पुरुषः कार्त्स्न्येन प्र
कृतेर्गुणान । नवद्वारं द्विहस्तांघ्रितत्रामनुतसाधिति ४ ॥ बुद्धिंतु प्रमदां विद्यात्ममायमितियत्कृतं ॥ यामधिश्व
पदेहेस्मिनपुमान्भुंक्तेक्षिभिर्गुणान ५ ॥ सखाय इंद्रियगणाज्ज्ञानंकर्मचयत्कृतं सख्यस्तद्वृत्तयः ॥ प्राणपंचव
तिर्यघोरगः ६ ॥ बृहद्बलं मनोविंद्यात उभयेंद्रियनायकं पंचालाः पंचविषयाः यन्मध्येनवखंपुरं ७ अक्षिणी
नासिकेकर्णौ मुखंशिश्नगुदाविति ॥ द्वेद्वेद्वारौ वहिर्याति यस्तदिंद्रियसंयुतः ८ अक्षिणीनासिकेकर्णौ मुखंशि
श्नोगुदाविति ॥ द्वेद्वेद्वारौ वहिर्यातियस्तदिंद्रियसंयुतः ८ अक्षिणीनासिकेआस्यमितिपंचपुरः कृताः । दक्षिणा
दक्षिणः कर्णः उत्तरा चोत्तरः स्मृतः ९ पश्चिमेइत्यधोद्वारौ गुदंशिश्नमिहोच्यते ॥ खद्योताविर्मुखी चात्रनेत्रेएक
त्रनिर्मिते रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः । नलिनीनालिनी नासे गंधः सौरभ उच्यते ॥ घ्राणोव
धूतोमुख्यास्यं विपणो वाग्रसज्ञमः १०
घ्राणानि स्यानि यस्य ७ बुमत्सखइत्यादेरर्थः सिं ऋपेणाह यतस्तदिंद्रियसंयुतः सन्नात्मैतानि
द्वाराणि विहिर्याति ८ पुरः पूर्वंभागा कृताः ९ नेत्रेइतिरूपमितिचचक्षुषाचेति खद्योतादीनां व्याख्यानं त्रोषानुवादः पुरंजनः नासे इतिव्या
ख्या १० ॥ घ्राणोवधूतोमुख्यास्यं अवधूतो ... स्यानत्वा घ्राणोवधूतः अस्यमिति व्याख्या

८६

ना त

अंधः श्रुतं ॥ १२ ॥ १३ ॥ ग्रामकमित्यस्यानुवादः ग्रामिणांरतिः तस्यव्याख्यामयमिति ॥ १४ ॥ विषचीनपदार्थानुवादो विषचिरितिकुत्सितमेनोगु
णोः तमः सत्त्वरजोगि ॥ १६ ॥ महिषीयद्यदीहेतेत्यादेरर्थं संगृह्णाह ॥ यथायथाबुद्धिः स्वप्नेविक्रियतेऽग्रतिवाविकरोतीइंद्रियापरिणाम
यतितस्यागुणैरक्तोलिप्यमानात्मात्यातस्यावृत्तिः दर्शनस्पर्शनाद्याः । केवलमुपदेष्टेवसनवलादनुकार्यते ॥ २१ ॥ आमगामित्येतत
द्व्याचष्टे संवत्सरस्येवाघ्रतिहतोरथोवेगः प्रतीतितोयस्यसंवत्सररयः वस्तुतश्चगतिः स्वसंसारादेर्बुद्ध्यावेववृत्तत्वेनदेशांतरगत्यसं

आपणोव्यवहारोत्रचित्रमंधो वहूदनं ॥ पितृहूर्देहिणः कर्णाः दुत्तरोदेवहूः स्मृतः ॥ ११ ॥ प्रवृत्तंचनिवृत्तंचशास्त्रं
पंचालसंज्ञितं । पितृयानंदेवयानंश्रोत्रात्श्रुतधराह्वयेत ॥ १२ ॥ आसुरीमेढ्रमर्वाग्व्यर्थवायोग्रामिणांरति । उपस्थो
दुर्मदः प्रोक्तो निरृतिर्गुदउच्यते ॥ १४ ॥ वैशसंनरकंपायुर्लुब्धकोऽधोन्मेष्यणः ॥ हस्तपादौपुमानताभ्यांयुक्तोति । पा
करोतिच ॥ १५ ॥ अंतः पुरंचहृदयं विषूचीमनउच्यते ॥ तत्रमोहप्रसादंवाहर्षंप्राप्नोतितद्गुणैः ॥ यथायथाविक्रिय
तेगुणाक्तोविकरोतिवा । तथातथोपद्रष्टात्मातद्वृत्तीरनुकार्यते ॥ १७ ॥ देहोरथस्त्विंद्रियाश्वः संवत्सररयोगा
ति ॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुवंधुरः ॥ १८ ॥ मनोरश्मिर्बुद्धिसूतोहन्नीडोद्वंद्वकूवरः ॥ पंचेंद्रियार्थप्रक्षेपः
सप्तधातुवरूथकः ॥ १९ ॥ आकूतिर्विक्रमोवाह्योमृगतृष्णांप्रधावति ॥ एकादशेंद्रियचमूः पंचसूनाविनोद
कृत ॥ संवत्सररथंडवेगः कालोयेनोपलक्षित २० ॥

वात । पाणांतरसंवत्सरस्यततकृतंरयप्रतान्यांगतिर्यस्येति । द्वीषमित्यस्यव्याख्यानं
नारदेनुकता ॥ द्विचक्रमित्यस्यव्याख्याद्विकर्मचक्रइति । त्रिगुणध्वजइति त्रिवेणपदव्याख्या ॥ १८ ॥ पंचप्रहरणमित्येतद्व्याचष्टे पंचें
द्रियार्थप्रक्षेपइति ॥ १९ ॥ पंचेंद्रियःस्तनाविनोदमिवान्यायेनविषयसेवांकरोतीतिपंचसूनाविनोदकृत अनेनचराचरमृगयांतत्
त्यादिव्याख्यातं ॥ २ ॥

त्वंउनीयेक्षणीचुक्षीउदकुंभीप्रमार्जनीपंचसूनागृहस्थस्यताभिःस्वर्गंनविंदति

श्रा० च० परिक्रांत्या परिभ्रमणेन २१ भगिनीत्वेन जगृहे लोकानां क्षयाय २२ चराः संचारिणः भूतानामुपसर्गो पीडा यं आशु पी घू म [illegible] त्युहे
८१ तुः रयो द्विगोयस्य प्रज्वारस्येति प्रत्याख्या व्याख्या। पाठांतरे भूतकृता अरयः अनेन अरि विनिरूपं भूत्यरिपदं व्याख्या। तं द्विविधः शीतो
ष्णरूपेण प्रवेशानि गेमध्ये नेहात २३ एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वकथातात्पर्यमाह एवमित्यादि विरमक्रमेणोत्यंते
न अधिदैविकादिभिर्दुःखैः क्लिश्यमानो ममाहमिति देहे शतं वर्षाणि शेते वर्तत इति द्वयोरन्वयः २४ अज्ञानापि पाप्मादीन्प्राण

तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः स्मृताः॥ हरंत्यायुः परिक्रांत्या षष्ट्युत्तरशतत्रयं २१ कालकन्या जरा साक्षाल्लो
य कस्तां नाभिनंदति स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः॥ २२ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः। भू
दे तोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः॥ २३ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः॥ क्लिश्यमानः शतं व
र्षं देहे देही तमोवृतः २४ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः। शेते कामलवान्ध्यायन्ममाहमिति।
कर्मकृत॥ २५ यदात्मानमविज्ञाय भगवंतं परं गुरुं। पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक॥ २६ गुणा
भिमानी स तदा कर्माणि कुरुते वशः॥ शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते २७॥ शुक्लात्प्रकाशभूयिष्ठा
ँल्लोकानाप्नोति कर्हिचित॥ दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्क्वचित॥ २८॥ क्वचित्पुमान्क्वचि
च्च स्त्री क्वचिन्नोभयमंधधीः॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः॥ २९॥

धर्मान् अंधत्वादीनिंद्रियधर्मान्कामादीन्मनोधर्मांश्च निर्गुणोप्यात्मन्यध्यस्य कर्मभिर्लब्धान्विषयसुखलेशान्कर्मकृत किमत आ
ह यदेति द्वाभ्यां स्वदृक् स्वप्रकाशस्वभावोपि २६ शुक्लं सात्विकं कृष्णं तामसं लोहितं राजसं यथाकर्म तथा जाय
ते २७ तदेवाह शुक्लादिति द्वाभ्यां प्रकाशो भूयिष्ठो येषु दुःखमुदर्कमुत्तरफलं येषु क्रियया आयासो येषु तान् लो ८१
हितात्तमः शोकोत्कटो येषु तान् कृष्णादिति ते यं नोभयं नपुंसकं यथाकर्म गुणावर्तिकम्प॥ २९॥

तेषु दैववशो न सुखदुःखे आप्नोतीति सदृष्टांतमाह ॥ क्षुधया क्षुधापरीतो व्याप्तः सारमेयश्च ॥ दंडं दंडेन ताडनं ॥३०॥ कामव्याप्तमात्रायो यस्य
३१ ॥ ननु तर्हि सुखस्य संभवाद्दुःखस्य च प्रतीकारसंभवान्नैकांततो हेयत्वं तत्राह ॥ दुःखेष्विति दुःखस्य प्रतीकारस्तावन्नास्ति स्याच्चेत्तस्य तस्य प्रति
क्रिया तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति ॥३२॥ प्रतिक्रियाणामपि दुःखरूपत्वादिति सदृष्टांतमाह
यथा हीति ॥३३॥ दुःखस्य मूलं मतानि तु कर्म्माणि प्रतिक्रियादिकर्म्मभिर्नैव निवर्त्तत इत्याह ॥ नैकांततः अत्यंतं सवासनं केवलं ज्ञानरहितं ॥ अवि
को

क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहं ॥ चरन्विंदति यद्दिष्टं दंडमोदनमेव च ॥३०॥ न ग्रासमात्रायोऽडीव उच्चावचतु यथात्मन
ऊर्ध्वमधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ॥३१॥ दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु ॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रति
क्रिया ॥३२॥ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ॥ तं स्कंधेन स आधत्ते तथा सर्व्वाः प्रतिक्रियाः ॥३३॥ नैकांततः प्रतीका
रः कर्म्मणां कर्म केवलं ॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥३४॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते ॥ मनसा लिंग
रूपेण स्वप्ने विचरतो यथा ॥३५॥ यथात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥३६॥ वासुदे
वे भगवति भक्तियोगः समाहितः ॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥३७॥

घयापुपसृतं प्राप्तं ॥ अतो विरोधान्न निवर्त्यनिवर्तकत्वमिति भावः ॥ सदृष्टांतः स्वप्ने ह यः स्वप्नः प्रबोधं विना यथा तं स्वप्नमत्यंतं न प्रतिकरो
तीत्यर्थः ॥३४॥ ननु तर्हि अज्ञानविलसितत्वेन संसृतिहेतोर्देहादेरप्यसत्वात्किं तन्निवर्त्तनप्रयासेनेत्यत आह ॥ अर्थे हीति लिंगरूपेण उपाधि
रूतेन ॥३५॥ तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह ॥ अथ तस्मात्पुरुषार्थरूपस्यैवात्मनः ॥ यतोऽज्ञात्मनः सेवा अनर्थपरंपरारूपात्संसृ
तिर्भवति ॥ तस्य व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव ॥३६॥ ननु संसृतिनिवृत्तिर्वैराग्यपूर्व्वकत्वात्तज्ज्ञानादेव न तु भक्त्या रतिपरोकमात्मविद्यादि
त
श्रुतेः तत्राह वासुदेव इति ॥ सध्रीचीनेन समीचीनेन प्रकारेण ॥३७॥

भा०च० ननु सोऽन महाकालो न भक्तियोगः कथं स्यादित्यत आह । सत्त्वअच्युतस्य कथामाश्रित्य वर्त्तमानो चिरात्स्यात् ॥ कस्य स्यात्तत्राह शृण्वतः ॥३८॥ कुत्र
८८ स्यात्तत्राह यत्रेति भगवतो गुणानुकथने श्रवणे च व्यग्रं सत्वरं तो येषां ते ॥३९॥ ननु साधुसंगं विना स्वयमेव हरिकथाचिंतनादिना भक्ति
नैवेद्वेत्याशंक्याह । हा स्यां तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिताः मधुभिच्चरित्रमेव पीयूषं तस्य शेषोद्रिक्ता इति । शेषो यासु असारांस
रहिताः मुख्यामृतवाहिन्य इत्यर्थः । अवितृषः । अलं बुद्धिमन्त्याः संतः गाढैः सावधानैः कर्णैर्ये ताः सरितः पिबंति सेवंत । अंतःशेषः श्री

सोचिराद्देवराजर्षे स्यादच्युतकथाश्रयः ॥ शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयत ॥३८॥ यत्र भागवता राजन् साधवो शेष
विशदाशयाः । भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥३९॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः । परितः
स्रवंति । ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः ॥४०॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभाव
पति जैः न करोति हरेर्नूनं कथामृतनिधौ रतिं ॥४१॥ प्रजापतिः साक्षाद्भगवान् गिरिशो मनुः ॥ दक्षादयः प्रजाध्यक्षा
नैष्ठिकाः सनकादयः ॥४२॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः ॥४३॥
अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः । पश्यंतोपि न पश्यंतं परमेश्वरं ॥४४॥
पश्यंति

न स्पृशंति अशनादयस्तान्न स्पृशंती । भक्तिरसिकान्न बाधंत इत्यर्थः ॥४०॥ सत्संगमंतरेण स्वयमेव हरिकथाचिंतनादावा
लस्याद्विना रसावेशाभावाच्च क्षुत्पिपासाद्यभिभूतस्य भक्तिर्न संभवतीत्याह ॥ एतैरिति ॥४१॥ भगवदनुग्रहमंतरेण न कस्या
पि ज्ञानसंभवतीति कैमुत्यन्यायेनाह चतुर्भिः प्रजापतिर्ब्रह्मा ॥४२॥ मदंता अहं नारदोंते येषां ते ॥४३॥ वाचांपतयोपि तपो ८८
विद्यासमाधिभिर्निरुपायैः ॥ पश्यंतो विविचिन्वंतोपि पश्यंतं सर्वसाक्षिणं न पश्यंति ॥४४॥

कुतस्तत्राह ॥ शब्दब्रह्मणि वेदे उरुर्विस्तरो यस्य ॥ अर्थतोपि पारश्च न्यत स्मिन्वर्तमानः ॥ मंत्राणां लिंगैर्वज्रहस्तत्वादिगुणयुक्तविवि
धदेवताभिध्यानसामर्थ्यैः परिछिन्नमेवेंद्रादिरूपं तत्तत्कर्मांगत्वेन गृह्णंतः परमेश्वरं न विदुः ॥ ४५ ॥ तर्हि त्वत्तः को नाम कर्माद्याग्रहं हित्वा
परमेव भजेदत आह ॥ यदा यमनुगृह्णाति ॥ अनुग्रहे हेतुः ॥ आत्मनि भावितः सन् सः तदा लोके लोकव्यवहारे ॥ वेदे च कर्ममार्गे परिनिष्ठि
तां मतिं त्यजति ॥ ४६ ॥ अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु पुरुषार्थबुद्धिं मा कृथाः प्ररोचनाय केवलं श्रोत्रप्रियेषु नस्पृष्टं वस्तु यैः
४७ ॥ ननु वेदे न स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति ॥ कथमस्पृष्टवस्तुत्वमुच्यते तत्राह ॥ ये धूम्रधियो मलिनबुद्धयः सक

तो

शब्दब्रह्मणि दुःपारे चरंत उरुविस्तरे ॥ मंत्रलिंगैर्व्यवछिन्नं भजंतो न विदुः परं ॥ यदा यस्यानुगृह्णाति भगवाना
त्मभावितः स जहाति मतिं लोके वेदे च परिनिष्ठितां ॥ ४६ ॥ तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ॥ मार्थदृष्टिं कृथाः
श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४७ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४८ ॥
आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं ॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं ॥ ४९ ॥ तत्कर्म हरितोषं यत्सा
विद्या तन्मतिर्यया ॥ हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५० ॥

र्मकं कर्मपरं वेदमाहुस्ते अतद्विदः ॥ अवेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकमात्मतत्त्वं वेदतात्पर्यगोचरं न विदुः यत्र देवोस्ति ॥ ४८ ॥ त्वं तु महानुभ

वे

र्वद्यपाह ॥ आस्तीर्येति ॥ बृहद्वधात् बहुपशुघातात् मानी महायज्वाहमित्यहंकारी अत एव स्तब्धः ॥ अविनीतः सन् कर्म नावैषि ॥ परं विद्यास्वरूपं त
च्च न वेत्सि ॥ ४९ ॥ नारदः स्वयं कृपया तद्रूपं निरूपयतीति हरितोषं यत तदेव कर्म्म ॥ यया तस्मिन् हरौ मतिर्भवति ॥ सैव विद्या महाफलत्वा
त् कुत इत्यपेक्षायां हरेः ॥ परमफलत्वं दर्शयन्नाह ॥ हरिर्देहभृतामात्मा ईश्वरश्च ॥ तत्र हेतुः स्वायंस्वातंत्र्येण प्रकृतिकारणं ॥ आ
तस्तेषां तत्पादमूलमेव शरणं आश्रयः यतः यस्मिन् ॥ ५० ॥

मा॰ग॰व॰ ८९ न च तद्धुडुनेऽश्रम्यमण्डन इव इः खं भयं चेत्याह । स इति ॥ इति यो वेद स एव विद्वान् स गुरुरेव हरिरिश्च ॥ ५१ ॥ उक्तमुपसंहरति । एवं च भवतः प्रश्नः सं
छिन्नः परिहृतः तदेवमात्मनो बंधमोक्षप्रकारेण कथारूपकेण कथितेनापि नातिनिर्विण्णं चित्रं पुत्रागमनं प्रतीक्षमाणं संततत्स्वरूप
मेवमहामयं कथितसकलगात्रं गृहान्निर्वासयितुं हरिणरूपकमाह । अत्रेति । वदतो मे वचः शृणु ॥ ५२ ॥ क्षुद्रं मलं चरतीति तद्घातं ॥ अ
लुक सुमनसां पुष्पाणां आरात् । आश्रमे वाटिकां मिथिलां मिथः । परस्परं स्त्रियासह मिलित्वा ॥ तत्रैव रक्तमासक्तं षड् घ्रयोन्नमरास्तेषां सा

सर्वे पिपतमम्बात्मायतोनन्नयमएवपि ॥ इति वेद स वै विद्वान् यो विद्वान्स गुरुर्हरिः ॥ ५१ ॥ नारद उवाच ॥ प्रश्न एवं हि संछि
न्नो भवतः पुरुषर्षभ अत्र मे वदतो गुह्यं निशामय सुनिश्चितं ॥ क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षड्घ्रिगणसामसु लु
ब्धकर्णं ॥ अग्रे वृकानसुतृपो विगणय्य यांतं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नं ॥ ५३ ॥ सुमनःसमधर्मणां स्त्रीणां शरण आ
श्रमे पुष्पमधुगंधवत् ॥ क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जिह्वोपस्थादि विचिन्वंतं मिथुनीभूय तदभिनिवेशि
तमनसं षड्घ्रिगणसामगीतिवदतिमनोहरवनितादिजनालापेष्वतितरामतिलोभितकर्णमग्रे वृकयूथवदात्मन
आयुर्हरतो होरात्रादिकालविशेषानविगणय्य गृहेषु विहरंतं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतान्तोऽन्तः
शरेण यमिह पराविध्यति तमिममात्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसीति यथा मृगयुः हतं मृगमिति ॥ ५५ ॥

मधुगीतेषु लुब्धः कर्णो यस्य तं । परेषामसुभिर्हृते तृ ॥ स्वीयानसून्तर्पयंतीत्यसुतृपः । तान्विगणय्य अगणयित्वा ॥ लुब्धकस्य बा
णेन भिन्नं मृगं मृगय अन्वेषय ॥ ५३ ॥ श्लोकं प्रस्तुतं योजयन् व्याचष्टे सुमनोभिः समानो धर्मः ॥ परिणामविरसत्वं यासां स्त्रीणां मिथिलेत्य
स्य व्याख्या मिथुनीभूय स्त्रीभिः सहेति शेषः । रक्तमित्यस्य व्याख्या तास्वतृप्त इत्यस्य व्याख्या आयुर्हरत इति । यांतमित्यस्य व्याख्या आयु
र्हरत इति ॥ यांतमित्यस्य व्याख्या विहरंतमिति । अंतः नालिकाया गृह्णन् शरेण पराविध्यती हृदा देवताडयति ॥ ५५ ॥ ८९

रुपदेशसारमाह स इति विचक्ष्व विचार्य॥ अंतर्हृदि चित्तं कर्णयोर्धुनीं नदीमिव बहिर्वृत्तिं चित्ते नियच्छ एतच्च सर्वेंद्रियोपलक्षणार्थं।
अंगनाश्रमं च जहि कीदृशं असत्तमानां अतिकामुकानां यूथानि तेषां गाथा वार्ता यस्मिन तं हंसानां जीवानां शरणमीश्वरं॥ एवं च क्रमेण सर्वतो विरम॥ ५५ अर्थांतरं प्रष्टुं पूर्वोक्तमर्थमनुवदति॥ श्रुतमन्वीक्षितं विचारितं च ब्रह्मन् नारद एतत्तत्त्वं कुतः मातात्वं उपाध्यायाः
येषां मम कर्मोपदेष्टारः आचार्यास्ते न जानंति॥ ५६॥ अतस्तत्कृतः उपाध्यायकृतः तद्वाक्यविरोधेनात्मत्वे संभावनारूपो महान् संशयः
संछिन्नस्तत्र त्वया अत्र तु कश्चित्संशयो वर्तते यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति॥ ५७॥ संशयमाह द्वाभ्यां कर्माणि येन देहेन करोति तमत्रैव

सत्वं विचक्ष्व मृगचेष्टितमात्मनोंतश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते। जह्यंगनाश्रममसत्तमयूथगाथं प्रीणीहि हंसश
रणं विरम क्रमेण॥ ५५॥ राजोवाच॥ श्रुतमन्वीक्षितं ब्रह्मन् भगवान् यदभाषत॥ नैतज्जानंत्युपाध्यायाः किन्न ब्रूयुर्विदुर्यदि॥ ५६॥
संशयोत्र तु मे विप्र संछिन्नस्तत्कृतो महान्॥ ऋषयोपि हि मुह्यंति यत्र नेंद्रियवृत्तयः॥ ५७॥ कर्माण्यारभते येन पुमानिह
विहाय तं॥ अमुत्रान्येन देहेन जुष्टानि स यदश्नुते॥ ५८॥ इति वेदविदां वादः श्रूयते तत्र तत्र ह॥ कर्म यत्क्रियते प्रोक्तं परो
क्षं न प्रकाशते॥ ५९॥ श्रीनारद उवाच॥ येनैवारभते कर्म तेनैवामुत्र तत्पुमान्॥ भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं॥ ६०॥ ॥

विहाय॥ अमुत्र लोकांतरे कर्माणि यस्यापि तेनान्येन देहेन जुष्टानि उपयुक्तानि जीवो यत्फलमाप्नोति॥ ५८॥ इति वेदविदां वादः श्रूयते प्राप्य पुण्यकृतां
लोकानिति यावद्देहपातं जीवः कर्मदेहो येन याति स्थावरतां तरम् इति लयाच्च क्षत्रा स्वतीरनु ॥ यातिमिति॥ एतच्च कर्तृत्वे तदेहनेहेन कल
नाघात्कृतास्यागमप्रसंगान्न संगच्छत इति भावः॥ संशयांतरमाह॥ प्रोक्तं वेदोक्तं कर्म क्रियते अनंतरं तच्चानंतरक्षण एव व्यवहितसमये
एव परोक्षं॥ अदृष्टं सन्न ततः प्रकाशते अतः॥ कर्मणो नष्टत्वाज्जोगोपि दुर्घट इति भावः॥ ५९॥ प्रथमस्योत्तरं येनैवेति॥ अव्यवधानेन कर्ता
भोगत्वदेहविच्छेदं विना स्थूलदेहनाशेपि मनःप्रधानस्य लिंगदेहस्य नाशाभावान्नोक्तदोषप्रसंग इत्यर्थः॥ ६०॥

ना.ग.०व. लिंगदेहविशिष्टस्य भोक्तृत्वं स्वप्नदृष्टांतेन स्पष्टयति ॥ शयानमिमं स्थूलदेहं श्वसंतं जीवंतं उत्सृज्य तत्परिमानं त्यक्त्वा आत्मनि मनसि संस्का-
९० ररूपेणाहितं कर्म यथा भुंक्ते तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन देहे नान्येन वायव्यादिदेहेन तथा लोकांतरेपीति भावः ६१ न-
क नुभवतु नाम लिंगविशिष्टस्यानेन दृष्टांतेन भोक्तृत्वं कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह ॥ ममैते पुत्रादयः असा-
वहं असौ अहमिति ब्रुवन् मनसा यद्यद्देहं गृह्णीयात्तो देहाद्याहं क्षिद्धं कर्म पुमान् गृह्णीयात् येन कर्मणा एवमहंकारगृहीतेन पुनर्भवो भ-
वति अन्यथा तन्नानुपपत्तेः ॥ अतो अभिमंतुर्मनोविशिष्टस्यैव कर्तृत्वं अभिमानविषयस्य तु देहस्य पुत्रादिदेहवत् द्वारमात्रत्वमिति भावः

शयानमिममुत्सृज्य श्वसंतं पुरुषो यथा ॥ कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ॥६१॥ ममैते मनसा यद्यदसावहमिति
ब्रुवन् ॥ गृह्णीयात्तत्पुमान् राद्धं कर्म येन पुनर्भवः ॥६२॥ यथानुमीयते चित्तमुभयैरिंद्रियेहितैः ॥ एवं प्राग्देहजं कर्म ल-
क्ष्यते चित्तवृत्तिभिः ॥६४॥ नानुभूतं क्व चानेन देहेनादृष्टमश्रुतं ॥ कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥६५॥ ते-
नास्य तादृशं राजन् लिंगिनो देहसंभवं ॥ श्रद्धत्स्वाननुभूतो र्थो न मनः स्प्रष्टुमर्हति ॥६५॥

६२।६३। यदुक्तं कर्मणैव न खल्वामुत्र भोग इति तत्राह ॥ यथेति ॥ उभयैर्ज्ञानकर्मरूपैरिंद्रियाणामीहितैः ॥ कदाचित्कर्मप्रवृत्तिभिः
श्चित्तमनुमीयते । सत्यपि सर्वेंद्रियविषयसंबंधे युगपज्ज्ञानानुत्पत्तेः तदुक्तमक्षपादेन ॥ युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमिति । एवं चित्तवृत्ति-
भिरपि पूर्वदेहजं कर्म लक्ष्यते । तासामपि युगपदनुत्पत्तेः ६३ इतोपि कर्म लक्ष्यत इत्याह नानुभूतमिति ॥ द्वाभ्यां अनेन वर्त्तमानेन
देहेन क्व च कुत्र विदपि यन्नानुभूतं ॥ अयमुक्तं अदृष्टं वा अश्रुतं च यद्रूपं यदात्मकं यादृक् यत्प्रकारं च तत् कदाचित्स्वप्नमनोरथादि-
षु आत्मनि मनसि उपलभ्यते ॥६४॥ तेन हेतुना अस्य लिंगिनो वासनाश्रयस्य तादृशं तदनुभवादियुक्तं पूर्वदेहसंभवं श्रद्धत्स्व निश्च-
येन मन्यस्व । न ह्यननुभूतो र्थो मनः ॥ स्प्रष्टुं मनसि स्फुरितुमर्हति ॥६५॥ ९०

किंच मनोवत्स्वैव सर्वोपरागाणि। अनात्मधर्मभिमतानि शरीराणि ज्ञायंते इत्याह मन एवेति। नन्वेवं तर्हि सम्यगवधानार्थमाशिंषणानितरदिति। अ
विद्यमानं तद्रूपं भास्यते नन्वविद्यमानं नीचलं प्राप्यते यदि तावीरे। रूपाणि संज्ञाति। मन एवौदार्यकार्यण्यादिवृत्तिभिः। सर्वमध्येव मे भासि
त पश्चाद्दृश्येव मे व भविष्यतीति ज्ञापयतीत्यर्थः। ६६। ननु कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः देवानन्तगात्राणि
स्वशिरः छेदइत्यादि तत्राह। अदृष्टमिति अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे निराश्रयं न संज्ञादिकं वा। अयंगादि क्रियाश्रयं स्व ८
शिरः। छेदनाश्रयं। निद्रादिदोषेण हि प्रतीयत इत्यनुमंतव्यं परस्यापितदनुपपत्तेस्तुल्यत्वादितिभावः। ६७। ननु हरिद्रः। क्वचिदात्मानं
महैश्वर्यं पश्यति। राजाचरंकमात्मानं पश्यतीति तत्कथमसंभावितं संगच्छे तत्राह। सर्वेइति अर्थ्यांतिनोगपत्वेन प्राप्नुवंति च। यांतिचनोगानंतरं

मन एव मनुष्यस्य पूर्वरूपाणि शंसति। न विद्यते अग्रतः इति तथैव न न विद्यतः। ६६। अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्य
ते। यथा तथानुमंतव्यं देशकालक्रियाश्रयं। ६७। सर्वे क्रमानुरोधेन मनसीन्द्रियगोचराः। आयांति च यथा यांति सर्वेस
मनसोऽमनाः। ६८। सत्वेकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि। तमश्चन्द्रमसीवेदमुपरज्यावभासते। ६९। नाहं ममेति भावो
यं पुरुषे व्यवधीयते। यावद्बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान्। ७०।

यदि कश्चिदमनास्स्यात् तर्ह्येवं न स्यात् न त्वेतदस्तीत्याह। सर्वेइति समनसइति। अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमेणप्रवेशा
नात्यंतादृष्टस्वरूपः कस्यापि कश्चिदर्थोऽस्तीत्यर्थः। तदेवं सर्वैरपि सर्वेर्थाः क्रमेणानुभूयत इत्युक्तं। इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवती
त्याह। सत्वैकनिष्ठे भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसि इदं विश्वं उपरज्य संयोगमिव प्राप्यावभासते प्रतीयत न तु हस्यापि कदाचिद्भवती
तोऽदृष्टार्थः। चंद्रमसि उपरज्यतमः। राहुरिव तद्वदिदं शुद्धे मनसि सर्व विषय स्फुरणं। योगप्रत्यक्षमिति प्रसिद्धं। ६९। तदेवं स्थूलदेहव्य
तिरेकेव कर्तृत्वं नोक्तत्वेन तु केवलस्यात्र कदाचित् स्थूलदेहाभावे जीवस्य कर्तृत्वं नोक्तत्वाभावान्मुक्तिप्रसज्येतत त्राह। अहं ममेतिभावः
स्थूलदेहसंबंधः पुरुषे जीवे न व्यवधीयते न विच्छिन्नो भवति किंपर्यंतं। बुद्ध्यादीनां व्यूहः परिणामो लिंगं यावदस्ति अनादिमान् अनादिः सन्। ७०।

भा० च० स्वप्नमिथ्यात्वार्थं वहंकाराद्यध्यासावांतरविच्छेदमात्रं त्र्याह ॥ द्वाभ्यां सुप्त्यादिषु उपतापश्च वियोगादिदुःखं तेषु अहमिति ज्ञानं अहंकारः नेहते
९२ न प्रकाशते ॥ प्राणायतनानां इंद्रियाणां विघातात् ॥ इंद्रियैरिदंकारास्पदं वस्तु गृह्णतो ह्यहंकारः स्फुरति नान्यथेत्यर्थः ॥७१॥ अपौष्कल्यात् असं-
पूर्णत्वात् ॥ प्राणायतनानामिति शेषः ॥ यूनः तरुणस्य यदेकादशविधं एकादशेंद्रियैः ॥ स्फुटं लिंगमहंकारणं तन्न दृश्यते गर्भादिरिति-
शेषः ॥ सतोप्यनभिव्यक्तौ दृष्टांतः कुह्वाममावास्यायां चंद्रमसो लिंगं रूपमिव ॥७२॥ तस्मादहंकारस्य स्थूलदेहस्याविच्छेदाद्वस्तुन्नतार्थो

सुप्तिमूर्छोपतापेषु प्राणायनविघाततः ॥ नेहतेहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥७१॥ गर्भे बाल्येप्यपौष्कल्यादेकादशवि-
धं तदा लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा ॥७२॥ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्त्तते ॥ ध्यायतो विषयानस्य स्वप्नेन-
र्थागमो यथा ॥७३॥ एवं पंचविधं लिंगं त्रिवृत षोडश विस्तृतं ॥ एष चेतनया युक्तो जीव इत्यभिधीयते ॥७४॥ अनेन पुरुषो दे-
हानुपादत्ते विमुंचति ॥ हर्षं शोकं भयं दुःखं सुखं चानेन विंदति ॥७५॥ यथा तृणजलूकैषा नापयात्यपयाति च ॥ न त्यजेन्म्रि-
यमाणोपि प्राग्देहाभिमतिं जनः ॥७६॥ यावदन्यं न विंदेत व्यवधानेन कर्मणां ॥ मन एव मनुष्येंद्र भूतानां भवभा-
वनं ॥७७॥

नावेपि संसृतिनिवृत्तिर्नास्तीत्याह ॥ अर्थे हीति ॥७३॥ यावल्लिंगस्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपंचयति ॥ सार्द्धैस्त्रिभिः पंचविधं पंच-
तन्मात्रात्मकं त्रिवृत त्रिगुणं षोडशविकारात्मना विस्तृतं ॥७४॥७५॥ नन्वेवं देहं विसृज्य देहांतरप्रवेशात् पूर्वं मध्ये देहता स्यादेवेत्यत आह ॥
ता यथेति ॥ नापयाति ॥ पूर्वं तृणस्याग्रादपयाति च तृणांतरधारणं तत्तथा त्यजेत ॥७६॥ अन्यं देहं कर्मणां प्राग्देहारंभकाणां व्यवधानेन विच्छे- ९२
देन समाप्त्या ॥ प्रकरणार्थमुपसंहरति ॥ मन एवेति भवभावं संसारहेतुः ॥७७॥

कथं सतितत्राह॥ यदेति चरितान् अपनुक्तान् यतः॥ कार्म्मणि सति॥ नन्वसंगस्य कुतः॥ कर्म्मेतत्राह॥ अविद्यायां सत्यां अनात्मनो देहादेः कर्म्मणि बंधो भवति॥ ७८ विश्वस्य स्थित्यादयो यतो हरेर्भवंति ७९ हंसयोर्जीवेश्वरयो ८० पुत्राणामिश्चेति पुत्राणामादेशं मत्रिणा

यदा हि सैश्वरितान्ध्यायन्कर्म्मण्याचिनुते स कृत॥ स त्विकर्म्मण्यविद्यायां बंधः कार्म्मण्यमात्मन ७८॥ अतस्तदपवादार्थमंतः सर्वात्मना हरिं॥ पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः॥ ८०॥ मैत्रेय उवाच॥ भगवतमुख्यो भगवानारदो हंसयोर्गतिं॥ प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोगमत् ८१॥ प्राचीनबर्हिराजर्षिः प्रजासर्गाभिरक्षणे॥ आदिश्य पुत्रानगात्त तपसे कपिलाश्रमं ८२॥ तत्रैकाग्रमना धीरो गोविंदचरणांबुजं॥ विमुक्तसंगोनुभजन्भक्त्या तत्साम्यतामगात् ८३॥ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ॥ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ८४॥ एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्य्यमुखनिःसृतमात्मशौचं॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः ८५ अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतं॥ एवं स्त्रियाश्रमः पुंसश्छिन्नो मुत्र च संशयः ८६॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने एकोनत्रिंशोध्यायः २९॥ विदुर उवाच॥ ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य कां॥ १॥

मध्ये कथयित्वा ८१॥ ८३॥ आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदं ८४॥ स्त्रीबुद्धिः तस्या आश्रमो हंकारः छिन्नो भवति अमुत्र कर्म्मफलभोगः कथमिति संशयश्छिन्नः॥ ८६॥ इति चतुर्थे एकोनत्रिंशः॥ २९॥ प्रसंगात्संचनिः प्रोक्तं वृत्तं प्राचीनबर्हिषः वर्ण्यते च पुनर्ध्यांप्रस्तुतं तत्प्रचेतसां॥ १॥ तत्र त्रिंशे तपस्तुष्टाद्विष्णोर्लब्धवरास्ततः॥ आगत्य वार्क्षी मुद्वाह्यराज्यं चक्रुरितीर्य्यते २ हरिं प्रतोष्य कां सिद्धिमापुः॥

हे बार्हस्पत्यकस्यांचिद्विद्यायां बृहस्पते मैत्रेयः शिष्य इति ज्ञातव्यं ॥ ते यदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्व
वर्तिनस्तदनुगृहीताः ॥ संतोन्नूनं परं मोक्षं प्रापुरेव । ततः परं तु इह अथ वा परत्र किं प्रापुः ॥ ३ ॥ रुद्रगीत जपरूपेण यज्ञेन तपसा च पुरं
जनं हरिं ३ तेषां कृच्छ्रं तपः क्लेशं ॥ रुचा कांत्या शाममयन सौतेन सत्त्वेन वपुषा आविर्भूतः ४ ॥ सुपर्णस्कंधमारूढ इत्यादिना बर्हिष्मतः

। किं वा बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं
जनमतो प्रचेतस ३ ॥ दश वर्षसहस्राणि ते पुरुषस्तु सतात तनः । तेषामाविरभूत् कृच्छ्रं शांतेन शममयन रु
चा ४ ॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः ॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ५ ॥ काशि
ष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलसत्किरीटः ॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो ग
रुडकिन्नरगीतकीर्तिता ६ ॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्द्धच्छ्रिया परिवृतो वनमालयाद्यः ॥
॥ बर्हिष्मतः पुरुष आह सुतान्प्रपन्नान पर्जन्यनादरुतया सघृणावलोकः ॥ ७ ॥

सुता नाहे तिवतीयेनान्वयः । कनकमयेन वर्णेन वता विभूषणेन भ्राजमानं कपोलं वदनं यस्य अष्टाभिरायुधैः ॥ गरुड एव किंनर
स्तेन परुस्वनैर्गीता कीर्तिर्यस्य ६ ॥ पीनाश्च ते आयताष्टौ भुजास्तेषां मंडलं समूहः ॥ तन्मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शो
भा यस्याः तया वनमालया परिवृत । आद्यः पुरुषमाह ॥ पर्जन्यस्य नाद इव रुतं नादो यस्याः । तया वा सघृणोऽवलोको यस्य ७ ॥

स्यं मेमतो बृहती धंसौह्द इत्ते नहेतुना ॥ अपृथक् धर्मो यैर्यं यांते षांसंबोधनं ॥ वः परस्परं सौहृदेन तुष्टोहं ॥ ८ ॥ नते षुसौहृदं च भविष्यति ॥ एवं
तेभ्यो दास्ये किं पुनर्युष्मभ्यमिति शेषः ॥ १० ॥ अग्रहीष्ट गृहीतवंतः अथो इति हेतौ ॥ लोकाननु लोकेषु भविष्यति ॥ व्याप्स्यतीत्यर्थः ॥ अन
वमो न्यूनः आत्मनो वीर्येण संततेन ॥ १२ ॥ पुत्रार्थं मादौ भार्यां संपादयति कंडो रिति त्रिभिः ॥ तपो नाशार्थं इंद्र प्रेषितया प्रम्लोचया कं
डुनाम ऋषिर्वकुकालं रेमे ॥ सा च ततः स्वर्गं गच्छंती कंडोर्जातं गर्भं वृक्षेषु त्यक्त्वा जगाम ॥ तदेतदुक्तं अपविद्धां त्यक्तां ॥ १३ ॥ स प्रसिद्धो व

श्रीभगवानुवाच ॥ वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः ॥ सौहृदेनापृथक् धर्मास्तुष्टोहं सौहृदेन वः ॥ ८ ॥ योनुस्मरति सं
ध्यायां युष्माननुदिनं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ॥ ९ ॥ ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः ॥ स्तु
वंत्यहं कामवरान् दास्ये प्रज्ञां च शोभनां ॥ १० ॥ यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ॥ अथो व उशती कीर्तिर्लोका
ननु भविष्यति ॥ ११ ॥ भविता विश्रुतः पुत्रो नवमो ब्रह्मणो गुणैः ॥ य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥ १२ ॥ कं
कन्या डोः प्रम्लोचया लब्धा कमललोचना ॥ तां चापविद्धां जगृहुः भूरुहा नृपनंदनाः ॥ १३ ॥ क्षुत्क्षामायां मुखे राजा सोमः पीयूष
वर्षिणीं ॥ देशिनीं रोदमानाया निदधे स दयान्वितः ॥ १४ ॥ प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता ॥ तत्र कन्यां वरारोहां या
तामुद्वहत माचिरं ॥ १५ ॥ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमाः ॥ अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥ १६ ॥ दि
व्यवर्षसहस्राणां सहस्रमहतौजसः ॥ भौमान् भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम ॥ १७ ॥

नस्पतीन् तोराजा सोमः ॥ अमृतस्राविणीं देशिनीं तर्जनीं रुदंत्यास्तस्या मुखे निदधे अनेन नासौ रोगार्त्तसंतत्वेन महताहारेण च तस्या ला
वण्यं तत्र मलवेदश्चौर्जोध्यादिराहित्यं चोक्तं ॥ मामनुवर्तमानेन पित्रा नियुक्ताः संतः तत्र प्रजासर्गे निमित्ते तामुद्वहत ॥ १५ ॥ ननु वह्नूनां कथमे
कैव पत्नी स्यात्तत्राह ॥ अपृथक् धर्मशीलं च येषां तेषां च पत्नी भूयात् ॥ अर्पितो न वस्तु आशयो यया धर्मशीलयोरैक्यात् ॥ मद्वाक्या
देव न दृष्टविरोध इति भावः ॥ १६ ॥ अहतौजसः अप्रतिहतबलाः संतः ॥ १७ ॥

भा॰ स्कं॰ ४
१८३

पक्वगुणाः दग्धकामादिमलआशया येषां ॥ अतः लोकद्वयभोगान्निर्विद्य मत्स्थानं प्राप्स्यथ ॥१८॥ ननु गृहेषु प्रविशतामस्माकं तदासक्त्या बंध
एव स्यात् ॥ कुतस्तद्भक्तिर्निर्वेदो वा तत्राह ॥ गृहेष्विति ॥ कुशलं मदर्पितं कर्म येषां ॥ मद्वार्त्तया यातो यामः कालो येषां ॥१९॥ त्वद्वार्त्ताश्रो
तृणां गृहे नैव बंधः इति ॥ कुतस्तत्राह ॥ नव्यवदिति यद्यस्मात् कथाश्रवणात् ज्ञः सर्वज्ञोहमीश्वरः ॥ ब्रह्मवादिभिः प्रवक्तृभिर्निमित
रैतैः श्रोतृणां हृदये नव्यवत् प्रतिपदं नूतनवत् ॥ आयेषां प्राप्नोमि ब्रह्मसाक्षात्कारेण वर्तत इत्यर्थः ॥ ननु त्वत्कथाश्रवणेऽपि ब्रह्मसाक्षा

अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः ॥ उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥१८॥ गृहेष्वावि
शतां वापि पुंसां कुशलकर्म्मणां ॥ मद्वार्तायातयामानां न बंधाय गृहा मताः ॥१९॥ नव्यवद्धृदये
यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः ॥ न मुह्यंति न शोचंति न हृष्यंति यतो गताः ॥२०॥ मैत्रेय उवाच ॥ एवं ब्रुवा
णं पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः ॥ तद्दर्शनध्वस्ततमोरजोमला गिरा गृणान्
गद्गद्या सुहृत्तमं ॥२१॥ प्रचेतस ऊचुः ॥ नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वया
य ॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥२२॥

त्कारस्तत्राह ॥ योहं मैतद्देव ब्रह्म ॥ तत्र हेतुः यतो गताः ॥ यं मां प्राप्ताः संतो मोहशोकहर्षान्न प्राप्नुवंति ॥ अतो मत्कथाश्रवणोत्सति नव्य
वन्ममहत्त्वाविर्भावात्स्यैव ब्रह्मसाक्षात्कारत्वाद्गृहेषु वसतामपि न बंध इत्यर्थः ॥२०॥ पुरुषार्थं भाजयति प्रापयतीति तथा तं ॥२१॥ वेदैः
सकलश्रेयःसाधनत्वेन निरूपिता उदारगुणाः आह्वयानामानि यस्य मनोवचसोर्वेगो यस्य ॥ मनोवचसोरगोचरायेत्यर्थः ॥ अत
एव सर्वेषामक्षाणां मार्गैः ॥ अगतः अनवगतो ध्वा यस्य तस्मै नमः ॥२२॥

१८३

स्वनिष्ठया स्वया स्वरूपस्थित्या शुद्धाय अतः शांताय मनसि निमित्ते सति अपार्थं व्यर्थमेव विलसत् विस्फुरितं द्वयं रूपं यस्मिन् गृहीता माया
गुणैर्विग्रहाः ब्रह्मादिमूर्तयो येन । २४ । स्वतस्तु विशुद्धसत्वरूपाय । संसारं हरति ॥ मेधा ज्ञानं यस्य तस्मै । २५ । अयुंक्ष्म हि कृतवंतो वयं । २६
यदुक्तं वरं वृणीध्वमिति । तन्मनसि निधायाहुः ॥ रूपमिति समस्तानां क्लेशानां संक्षयो यस्मात् । नः आविष्कृतं प्रकटितं ॥ अतोन्यत्किमनुकंपि

शुद्धाय शांताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ॥ नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय २४ ॥
नमो विशुद्धसत्वाय हरये हरिमेधसे ॥ वासुदेवाय कृष्णाय प्रभवे सर्वसात्वतां ॥ २५ ॥ नमः कमलनाभाय नमः कमलमालि
ने ॥ नमः कमलपादाय नमस्ते कमलेक्षणः । २६ ॥ नमः कमलकिंजल्कपिशंगामलवाससे ॥ सर्वभूतनिवासाय नमो युं
क्ष्म हि साक्षिणे । २७ । रूपं भगवता त्वेतदशेषक्लेशसंक्षयं ॥ आविष्कृतं नः क्लिष्टानां किमन्यदनुकंपितं ॥ २८ ॥ एताव
त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः ॥ यदनुस्मर्यते काले स्वबुध्याभद्ररंधन ॥ २९ ॥ येनोपशांतिर्भूतानां क्षुल्लकानामपीहि
तां ॥ अंतर्हितोंतर्हृदये कस्मान्नो वेद नाशिषः । २९ ॥ असावेव वरोस्माकमीप्सितो जगतः पते ॥ प्रसन्नो भगवान्येषा
मपवर्गगुरुर्गतिः ॥ ३० ॥

तं । अनुकंपायमेवास्माकं परस्मात् परमानुकंपेत्यर्थः ॥ २७ । कुत इत्यत आह ॥ हे अभद्ररंधन अमंगलनाशन ॥ त्वं प्रभवो विभवः ततः एता
वद्दीनेषु वत्सलैः ॥ प्रभुभिर्भाव्यं कार्यं किं तत्तदाह ॥ यदिति अस्मदीया एत इति ॥ स्वबुध्याप्युपचिते काले अनुस्मर्यत इति येन ॥ त्वयानुरूपम
पि दर्शितमिति भावः । २८ ॥ येनानुस्मरणेन स्मृतानां तेषामुपशांतिः ॥ सुखं भवति किं च क्षुल्लकानामपि भूतानां अंतर्हृदये अंतर्हि
तः अंतर्यामित्वेन स्थितो भवानीहितामिच्छितां तदुपासकानां नोस्माकमाशिषः कस्मात् तान वेद जानात्येवेत्यर्थः । ३० । तथापि वक्त
व्यं चेत्तर्हि ये षाम स्माकं भगवान्प्रसन्नः । असावेव वरः भगवत्प्रसाद एवास्माकमीप्सितो वर इत्यर्थः । अपवर्गगुरुर्मोक्षमार्गप्रबोधकः । गतिः स्व
तंत्रपुरुषार्थभूतः ३० ॥

६

भा॰ ४० यद्यप्येवं त्रथापि हे नाथ त्वत्तः वरमेकं वृणीमहे कुधं त्वतात्परतः कारणादपि परात ॥ अक्षरात अक्षरात्परतः परः इति श्रुतेः अतोपद्यपि त्वं
९८ दातुं समर्थः ॥ नचदेयानां त्वद्विभूतीनामंतो ऽस्ति यतोनंतविभूतित्वादनंत इति गीयसे ३१ तथापिय यासारंगो भ्रमरः पारिजाते लब्धे ऽजसा सुखेन लब्धे स
ति तुलसममन्यं च हृतांतरं न सेवते ॥ तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्यर्थः ॥ [illegible]

वरं वृणीमहे ऽथापि नाथ त्वत्परतः परात ॥ नह्यंतस्त्वद्विभूतीनां सो ऽनंत इति गीयसे ॥ ३१ ॥ पारिजाते ऽंजसा लब्धे सारंगो
न्यन्न सेवते ॥ त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहे ॥ ३२ ॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ॥ तावद्भव
त्प्रसंगानां संगः स्यान्नो भवे भवे ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः
॥ ३४ ॥ यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः ॥ निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥ ३५ ॥ यत्र नारायणः साक्षा
द्भगवान्न्यासिनां गतिः ॥ संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ॥ ३६ ॥ तेषां विचरतां पद्भ्यां तीर्थानां पावनेछया ॥ भी
तस्य किं न रोचेत तावकानां समागमः ॥ ३७ ॥

प्र मर्त्य यद्वा किमप्यन्यत्तुच्छं किमर्थं वृणीमहि तर्हि किं किं वृणीमहे ॥ अत्र तत्त्वे मनोरथानां नवस्थानादित्यर्थः ॥ ३२ ॥ अत एतावदेव प्रार्थया
महइत्याह ॥ यावदिति स्पृष्टाः ॥ व्याप्ताः संततं भगवति येषां संगो ये षां तेषां संगो ऽस्माकं स्यात ३३ नतु राज्यभोगात्स्वर्गापवर्गौ च विहा
य किमिदं प्रार्थ्यते तत्राह ॥ तुलयामेति भगवत्संगस्य लवेनापि ३४ तत्संगस्य प्रशंसा प्रपंचयति ॥ यत्रेति त्रिभिः ॥ यत्र येषु यतः या
भ्यः कथाभ्यः निर्वैरं वैराभावः ३५ ३६ पद्भ्यां पावनेछया संसाराद्भीतस्य ३७ ॥ ९८

तत्संगमफलमस्मान्निरेवानुन्नतमित्याहुः । वयंत्विति तवयः प्रियसखस्य भवस्य अत्यंतमचिकित्स्य भवस्य मृत्योर्भिषक्तमं त्वा
दैत्यं त्वां गतिं प्राप्ताः ॥ ३८ ॥ वरांतरं वृणते यत्र इति द्वाभ्यां नताः नमस्कृताः ॥ ३९ ॥ निरंधसां निरन्नानां अदभ्रं बहुकालं ते परितोषणाय व
लितिवृणीमहे ॥ ४० ॥ अज्ञानामप्यस्माकं त्वत्स्तुतिर्न्याय्येत्याहुः मनुरिति ॥ यस्य त्वन्महिम्नो न दृष्टपारं ये स्तुवंति तं त्वां आत्ममात्रं स्वशक्त्या

वयंतु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन ॥ सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः
स्म ॥ ३८ ॥ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ॥ आर्य्या नताः सुहृदो भ्रातरश्च सर्व्वाणि भू-
तान्यनसूययैव ॥ ३९ ॥ यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु ॥ सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते य
परितोषणाय ॥ ४० ॥ मनुः स्वयंभूर्भगवान् भवश्च येन्ये तपोज्ञानविशुद्धसत्वाः ॥ अदृष्टपारा अपि यन्महिम्नस्तुवं-
त्यथो त्वात्मसमं गृणीमः ॥ ४१ ॥ नमः समाय शुद्धाय पुरुषाय पराय च ॥ वासुदेवाय सत्वाय तुभ्यं भगवते नमः ॥
॥ ४२ ॥ मैत्रेय उवाच ॥ इति प्रचेतोभिरभिष्टुतो हरिः ॥ प्रीतस्तथेत्याह शरण्यवत्सलः ॥ अनिच्छतां यानमतृप्तचक्षुषां
ययौ स्वधामानपवर्गवीर्य्यः ॥ ४३ ॥ अथ निर्य्याय सलिलात् प्रचेतस उदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां
रोद्धुमिवोच्छ्रितैः ॥ ४४ ॥ ततोग्निमारुतौ राजन्नमुंचन्मुखतो रुषा ॥ महीं निर्वीरुधं कर्त्तुं संवर्त्तक इवात्यये ॥ ४५ ॥

तुरूपं यथा स्तुवंति । अथो अतः वयमपि गृणीमः ॥ ४१ ॥ सत्वमूर्त्तये वासुदेवाय ॥ ४२ ॥ यानं प्रयाणं अनिच्छतां स्वधाम ययौ अनपवर्गवी-
र्यः अकुंठितप्रभावः ॥ ४३ ॥ उदन्वतः सिंधोः सलिलान्निर्गत्य गां स्वर्गं रोद्धुमिवोच्छ्रितैर्द्रुमैर्गां महीं । छन्नां वीक्ष्य द्रुमेभ्यो कुप्यन् तदाह प्राची-
नबर्हिषः प्रजाजितत्वाहराडकेकर्म्माणाय नावाल द्रुमैर्न मिच्छिन्नांन्तत ॥ ४४ ॥ निरस्तावीरुधो पियस्य तथा कृतां कर्त्तुंकः । कालाग्निरुद्र ॥
॥ ४५

नयैर्युक्तिभिः ।४६॥ उज्ज्ञाङ्कुः समर्पयामास । मारिषां वार्क्षीं ॥ अजनयोनिर्ब्रह्मा तस्माज्जातो दक्षः । महतश्री महादेवस्यावज्ञाना
त्पूर्वमजनयोनिर्ब्रह्मपुत्रोपि सन् क्षत्रियजातो यस्यामजनि जातः ।४८॥ प्राक्सर्गे चक्षुषे देहे काले विदुते दैवेनेश्वरेण चोदितः सन्
सृष्टाः प्रजास सर्ज दक्ष इति प्रसिद्धः ॥४९। स्वया रुचा प्रनयाते जसा पादत्त आच्छादितवान् । पंचकर्मसाक्षाद्दक्षमब्रुवन् ।५०।त

नस्मसात्क्रियमाणांस्तान्द्रुमानवीक्ष्य पितामहः । आगतः समयामास पुत्रान्बर्हिष्मतो नयैः ।४६॥ तत्रावशि
ष्टा ये वृक्षा भीता दुहितरं तदा । उज्ज्ञाकुस्ते प्रचेतोभ्य उपदिश्याः स्वयंभुवा ।४७। ते च ब्रह्मण आदेशात मारिषामुपयेमि
रे ॥ यस्यां महदवज्ञानादजन्यजनयोनिजः ।४८॥ चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे कालविद्रुते ॥ यः ससर्ज प्रजा इष्टाः
सदक्षो दैवचोदितः ।४९। यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा ॥ स्वयोपादत्तदाक्ष्याच्च कर्मणां दक्षम
ब्रुवन् ।५०॥ तं प्रजासर्गरक्षायामनादिरभिषिच्य च ॥ युद्धयोऽयुयुजेन्यांश्च स वै सर्वप्रजापतीन् ॥५२॥ इति श्री
भागवते महापुराणे चतुर्थस्कंधे प्रचेतसोपाख्याने त्रिंशोऽध्यायः ३०॥ श्रीमैत्रेय उवाच ॥ तत उत्पन्नविज्ञाना
आश्वधोक्षजभाषितं ॥ स्मरंत आत्मजे भार्यां विसृज्य प्रव्रजन् गृहात् ॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ॥ प्रती
च्यां दिशि वेलायां सिद्धोभ्यत्र जाजलिः ॥२॥

मतिषिच्य अनादिर्ब्रह्मा प्रजासर्गरक्षायां प्रयुयोज संबद्धो अन्यानमरीच्यादीन् ततश्च ।
परेषु नियुक्तवान् ।५२॥ इति चतुर्थे टीकायाः ३०॥ एकत्रिंशो सुते दक्षे धुरं न्यस्य वने सतां । नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसां ।१। ततः दिव्य
वर्षसहस्राणां तेउत्पन्नविवेकज्ञाना स्ते । उपायास्य यमध्यामनिर्विघ्न निरपादत । इत्यधोक्षजभाषितं स्मरंत आत्मजे प्रावृजन् ।१॥ ब्रह्मसत्रेण
आत्मविमर्शेन दीक्षिताः । कृतसंकल्पा वभूवुः सर्वेषां आत्मेति मेधा ज्ञानं यस्मिन् तेन वेलायां समुद्रतटे जाजलिर्नाम ऋषिः ।२॥

निर्ज्जिता प्राणमनो वचो हृशो यैस्तान् शांता उपरता । समानाम्मला धारा दारस्त्वमू ऽवे विग्रहा येषां ब्रह्मणियोज्जितस्त्मात्मा येः सुरासु
रैरीड्यो हृत्वा न । ३ ऽत्थायतं प्राणिपत्यय थादेव्ह यथाविधि पूजयिला ॥ ४ ॥ ५ । आदिदं समुपदिष्टं यदात्मत तत्त्वं विस्मृतं । ६ । ७ । ट
ति प्रचेतोभिः पृष्टः । ट अहो ग्रहप्रशक्तयाह रिसेवांविनाराद्धेऽजन्मकर्म्मादिकं व्यर्थं कृतमितितावात ॥ शोचन्नाह तज्जन्मेति ॥ च

तान्निर्ज्जितप्राणमनो वचो हृ प्रोज्जिता धानान् शांतसमानविग्रहान् । परे मले ब्रह्मणि योज्जितात्मतः ॥ सुरासुरे ।
ड्योहदृ शोसमतानदः । ३ । तमागतं तऽत्थाय प्राणिपत्याभिनंद्य च ॥ पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ॥ ४
प्रचेतस ऊचुः स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः ॥ तव चंक्रमणं ब्रह्मन्नभयाय यथा रवे । ५ यदादिष्टं भ
गवता शिवेनाधोक्षजेन च । तद्गृहेषु प्रशक्तानां प्रायेणः क्षपितं प्रभो । ६ तन्नः प्रद्योतयाध्यात्म ज्ञानं तत्त्वार्थद
र्शनं । येनांऽसा तरिष्यामो दुस्तरं भवसागरं ॥ ७ ॥ श्री मैत्रेय उवाच ॥ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः ॥
भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् । ट नारद उवाच । तज्जन्म तानि कर्म्माणि तदायुस्तन्मनो वचः ॥
नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः । ९ ॥ किं जन्मभिस्त्रिभिर्वेह शुक्लसावित्रयाज्ञिकैः ॥ कर्म्मभिर्वा त्रयी
प्रोक्तैः ॥ पुंसोपि विबुधायुषा । १० श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपुणया बलेनेंद्रिय
राधसा । ११ । किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ॥ किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः । १२ ॥ ॥

तृभिः । यतोऽस्मादृ हे हरिसेवैव फलं । अतस्तद्विहीनं सर्वं व्यर्थमित्यभिप्रेत्यः । ९ ॥ शुक्लसंबंधि जन्म विशुद्धमातापितृभ्यां उत्पत्तिः सावित्रम्
पनयनेन । याज्ञिकं दीक्षया विबुधानामिव दीर्घायुषापि ॥ १० वचोभिः वाग्विलासैः चित्तवृत्तिभिः । नानावधानसामर्थ्यैः ॥ इंद्रियं
णां राधसा पाटवे । ११ । योगेन प्राणायामादिना सांख्येन देहात्मविवेकेन विज्ञानेन न्यासेन ॥ संन्यासवेदाध्ययनाभ्यामपि । अन्यैरपि व्रत

भाग० स्कं० टी० ६

नन्वेषांनानाफलसाधनानांहरिसेवानावमात्रेणकुतोवैयर्थ्यं तत्राह॥श्रेयसांफलानामात्मैवअवधिः पराकाष्ठा अर्थतः॥पर
मार्थतः आत्मार्थतः॥आत्मार्थत्वेनैवामीषांप्रियत्वादित्यर्थः॥नवत्वात्माअवधिः॥किमायातंतत्राह श्रेयसांफलानामात्मैवअ
वधिः यसर्व्वेषामपीति॥आत्मनश्चाविद्यानिरासेनस्वरूपाभिव्यंजकः ऐश्वर्येणापिरूपेणावलिप्यतेतिस्य एवात्मनः॥प्रियश्चपरमा
नंदरूपत्वात॥१३॥किंचनानाकर्म्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपिफलानिहरिप्रीत्याभवंति॥केवलंतद्देवताराधनेननतुनकिं
न्ते

॥श्रेयसामपिसर्व्वेषामात्मह्यवधिरर्थतः॥सर्व्वेषामपिभूतानांहरिरात्मात्मदः प्रियः॥१३॥यथातरोर्मूलनि
षेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः॥प्राणोपहाराच्चयथेंद्रियाणांतथैवसर्व्वार्हणमच्युतेज्या॥१४॥य
थैवसूर्यात्प्रभवंतिवारः पुनश्चतस्मिन्प्रविशंतिकाले॥भूतानिभूमौस्थिरजंगमानितथाहरावेवगुणप्रवाँ॥१५॥ ६

चिदिति॥सदृष्टांतमाह॥यथेति॥मूलानितस्यप्रविभागाः॥स्कंधाः तद्विभागाभुजाः तेषामपि उपशाखाः उपलक्षणं॥पत्रपु
ष्पादयोपितृप्यंति॥नतुमूलसेकंविनास्वस्वनिषेचनेन॥प्राणस्योपहारोभोजनं तस्मात्सर्वेंद्रियाणांतृप्तिः॥नतुतत्तदिंद्रियेषुपृ
थगनुलेपनेनतथाच्युताराधनमेवसर्व्वदेवताराधनंनपृथगित्यर्थः॥कुतः सर्व्वभूतत्वादितिसदृष्टांतमाह॥यथैववर्ष्ताः जला
निवर्षाकालेसूर्यादुद्भवंति॥ग्रीष्मेतस्मिन्नेवप्रविशंति॥अस्याप्रसिद्धत्वेनदृष्टांतरमाह॥यथाभूतानिभूमाविति॥गुणप्रवा- भा०
हः॥चेतनाचेतनात्मकःप्रपंचः॥१५॥ टी० ६

ननुहरावेवगुणप्रवाह इत्युक्तेतदाधारत्वेनसोपाधिकत्वंहरेः । स्यादित्याशंक्याह । एतदिति एतद्विश्वंसर्वशास्त्रप्रसिद्धं । पदंपरंसर्वोपा
धिरहितं । तद्युत्पन्नत्वान्नततः पृथगित्यर्थः । तर्हिकथमन्यथातत्राह सकृत्कदाचिद्विभातंस्फुरितंगंधर्वनगरवत् ॥ यथासवितुःप्रभान
ततोभिन्नं यथाचजाग्रतिअसवइंद्रियाणिस्फुरंतिसुषुप्तौ [illegible] तुसुप्तशक्तयोभवंतीत्यर्थः । कथंभूतोहरिः । द्रव्यादीनांत्रिवि
धाहंकारकार्याणांतन्निमित्तस्यभेदभ्रमस्यचात्ययोयस्मात्सः ॥ यद्वाजाग्रतिसुषुप्तौअसवः सुप्तशक्तयोयेषांतेभवंति

एतत्पदंतज्जगदात्मनः परंसकृद्विभातंसवितुर्यथाप्रभा ॥ यथासवोजाग्रतिसुप्तशक्तयोद्रव्यक्रियाज्ञानभिदा
भ्रमात्ययः ॥१६॥ यथानभस्यभ्रतमःप्रकाशाभवंतिभूपानभवंत्यनुक्रमात् ॥ एवंपरेब्रह्मणिशक्तयस्त्वमूर
जस्तमःसत्वमितिप्रवाहः ॥१७॥ तेनैकमात्मानमशेषदेहिनांकालंप्रधानंपुरुषंपरेशं ॥ स्वतेजसाध्वस्तगुण
प्रवाहमात्मैकभावेनभजध्वमद्धा ॥१८॥ दययासर्वभूतेषुसंतुष्ट्यायेनकेनवा ॥ सर्वेंद्रियोपशांत्याचतुष्य
त्याशुजनार्दनः ॥१९॥

द्रव्यादेरप्यत्ययोभवति । सवितुःप्रभेवस्फुरितोदृष्टांतइति ॥१६। नन्वसंगेहरौकथंप्रपंचोत्पत्तिलयौतत्राह यथेति ॥ अभ्र:
तमःप्रकाशाआगमापायिनोरजस्तमः ॥ सत्वस्थानीयाः हेभूपाः प्रचेतसः । अमूःशक्तयः भवंतिलीयंतेइतिएवमयंजग
त्प्रवाहः ॥१७ तेनसर्वप्रकारणत्वेनहेतुना । कालोनिमित्तं ॥ प्रधानमुपादानं ॥ पुरुषःकर्ता ॥ एतत्त्रितयात्मकत्वात्सर्वकार
णंपरमीश्वरं । अद्धासाक्षाद्भजध्वं । आत्मनाएकभावेन अभिन्नत्वेन ॥१८ साधनमाह । दयाभिःशीघ्रंतुष्यति ॥१९॥
दि

भाग०च०
९७

ततो न वशात्विति स्य उत्तरत्याह। अपहता निरस्ताः। सकला एषणाः कामा यस्मात्तस्वासावमल आत्मा मनः। तस्मिन् सतां मनसि
निरंतरमेधितया भावनयोपहूतः। सन् निधापितः हृदो हरिः छिद्रवत् तत्रत्याकाशवत्। ततो न स्परति नापयाति हि। किंतु
ध्वन आत्मनो निजजनवशगत्वं स्वभक्ताधीनत्वं यन् अवगच्छन्। २०। सतामेवं वश्यो सौ असतां तु पूजामपि न गृह्णाती
त्याह। नेति कुमनीषिणां कुत्सितमतीनां अधना अस्वे आत्मधना भगवद्धनाः। ते प्रिया यस्य। रसज्ञः भक्तिसुखज्ञः। के कुम

—

अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः। निजजनवशगत्वमात्मनोयन्नसरति छिद्रवदक्षरः
सतां हि। २०। न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः। श्रुतधनकुलकर्मणां मदै र्ये विदध
ति पापमकिंचनेषु सत्सु। २१। श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यत्स्वपूर्णः। न भजति निजभृ
त्यवर्गतंत्रः। कथममुमुद्विसृजेत्पुमान्कृतज्ञः। २२। श्रीमैत्रेय उवाच। इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः
श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः। २३।

नीषिणस्तानाह। श्रुतादिनिमित्तैर्मदैर्ये संत्सु पापं तिरस्कारं कुर्वंति। २१। भक्ताधीनत्वं प्रपंचयन्नाह। अनुवर्त्तमानामपि श्रियं तद
र्थिनः। सकामान् द्विपदपतीन्नरेंद्रान् विबुधान्देवानपि यो नानुवर्त्तते। यतः स्वेनैव पूर्णः अतः स्वभृत्यवर्गानुरक्त एव। एवं भूतम
मुमीश्वरं पि कथं परित्यजेत। २२। प्रचेतसः कर्म स्रुतान् अन्यांश्च भूतसुनीतेरित्याद्यध्रुवचरिताद्याः सत्रे अगायन् प्रचेतसामित्यु
क्तत्वात्। २३। ९७

भा.गा.च० २३ प्रचेतसांनारदस्यचसंवादरूपमेतदाख्यातंनिहितंहरेः ॥ कीर्तनंयस्मिन्ततः ॥ २४ ॥ यएषवंशः सोनुवर्णितः २५ यःप्रियव्र
पत्र ७ तःस्वर्ग २६ २७ स्वाम्ब्रह्मातीनदिदृक्षुः २९ ना ब्राह्मंचरितमितिशेषः ३० ३१ ॥ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांश्रीधरस्वा
मिविरचितायांचतुर्थस्कंधेटीकायांएकत्रिंशोध्यायः ॥ ३१ ॥ समाप्तोयंचतुर्थस्कंधः ४ ॥ संवत १८ ३५

तेपितन्मुखनिर्यातंयशोलोकमलापहं ॥ हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः ॥ २३ ॥ एवंतेनिहितंक्षत्तर्य
न्मांत्वंपरिपृष्टवान् ॥ प्रचेतसांनारदस्यसंवादंहरिकीर्त्तनं ॥ २४ ॥ श्रीशुकउवाच ॥ यएषउत्तानपदोमान
वस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापिनिबोधनृपसत्तम ॥ २५ ॥ योनारदादात्मविद्यामधिगम्यपुनर्महीं ॥ भुक्
त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं ॥ २६ ॥ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्कथां ॥
प्रवृद्धभावोश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः ॥ २७ ॥ श्रीविदुरउवाच ॥ सोयंतेनमहायोगिन्
भवताकरुणात्मना ॥ दर्शितः स्तमसः पारोयत्राकिंचनगोहरिः ॥ २८ ॥ इत्यानम्यतमामंत्र्यविदुरोगजसाह्वयं
स्वानांदिदृक्षुः प्रययौज्ञातीनांनिर्वृताशयः ॥ २९ ॥ एतद्यः शृणुयाद्राजन्राज्ञांहर्यर्पितात्मनां ॥ आयुर्धनंय
शः स्वस्तिगतिमैश्वर्यमाप्नुयात् ॥ ३० ॥ इतिश्रीभागवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायां
चतुर्थस्कंधेप्रचेतसोपाख्यानेएकत्रिंशोध्यायः ॥ ३१ ॥

मासोत्तममासेपौषमासेशुक्लपक्षेतिथौएकादश्यांसनिवासरे लिख्यकृतंवालकृष्णब्राह्मणचूराणां
मध्ये ॥ पठनार्थलोहागलमध्येस्थामोडाश्रीचेतनदासजीकेसिष्यगंगाविष्णुदासस्वयंपठनार्थे ॥ पत्र ७